इत्येवं परिष्कारेऽपि अव्याप्तिः	२५५७
મહાનસીયવહ્નિ સાધ્યક સ્થલનું અગ્રહણ શાથી ?	
वह्नितार्णाभावः ग्रहीतुं शक्यते एव	२५५८
यावत्साध्यतावच्छेदकतापर्याप्तेत्यादि-लक्षणेऽप्यव्याप्तिः	२५५९
વહ્નિમહાનસીયઅભાવ તો જ લઈ શકાય કે જો...	
वह्नितार्णाभावमादाय सर्वत्राऽसमन्वयः	२५६०
सर्वाण्यपि लक्षणानि दुष्टानि जातानि	२५६१
वह्निमहानसीयाभावग्रहणम्	२५६२
વહ્નિમહાનસીયઅભાવનું લક્ષણાનુસારે ગ્રહણ શક્ય	
વહ્નિમહાનસીયઅભાવને લઈને અવ્યાપ્તિ દુર્વાર	
महानसीयवह्निसाध्यके वह्निमहानसीयाभावो ग्राह्यः	२५६३
મહાનસીયવહ્નિ સાધક સ્થલે પણ અવ્યાપ્તિ શક્ય	
બે સ્થળ વચ્ચેનો તફાવત	
वह्निमहानसीयाभावमादायाऽव्याप्तिर्दुवारा	२५६४
વાત એ જ, શબ્દો ગ્રંથકારના	
तार्णवह्नेः साध्यत्वेऽव्याप्त्युपदर्शनम्	२५६५
प्रतियोगित्व-साध्यत्वयोः समानधर्मावच्छिन्नत्वम्	२५६६
અવ્યાપ્તિનું નિવારણ : ઉત્તરપક્ષ	
अव्याप्तिनिवारणोपदर्शनम्	२५६७
તાર્ણવહ્નિઅભાવ - વહ્નિતાર્ણાભાવ - બન્ને જુદા	

विषय	पृष्ठ
બન્ને અભાવ વચ્ચે અભેદ અશક્ય	
अवच्छेदकरूपैक्यशङ्का	२५६९
तार्णत्ववह्नित्व-वह्नित्वतार्णत्वगतद्वित्वभेदः	२५७०
अभावभेदे प्रतियोगित्वभेदोऽवश्यम्भावी	२५७१
પ્રતિયોગિતાના અધિકરણ જુદા કેવી રીતે ? પ્રશ્ન	
विषयितासम्बन्धापेक्षैक्याऽसम्भवः	२५७२
प्रतियोगित्वभेदे अवच्छेदकभेदोऽवश्यम्भावी	२५७३
પ્રતિયોગિતાઅવચ્છેદક ભેદ પણ કેવી રીતે ?	
पूर्वापरभावेन उद्देश्य-विधेयभावनिर्णयः	२५७४
अपेक्षाबुद्धिविषयतारूपद्वित्वभेदः	२५७५
પ્રસ્તુત બે અભાવીય પ્ર.અવચ્છેદકનો ભેદ અશક્ય	
यच्च प्रतियोगितायां तच्च साध्यतायां समानमेव	२५७६
તાર્ણવહ્નિ - વહ્નિતાર્ણ વચ્ચેની ભેદરેખા	
द्वित्वद्वये भेदोऽभ्युपगन्तव्यः	२५७७
અભાવભેદે પ્રતિયોગિતાભેદ	
साध्यत्व-प्रतियोगित्वयोरसमानधर्मावच्छिन्नत्वम्	२५७८
તાર્ણવહ્નિનિષ્ઠપ્રતિયોગિતાસમાન પ્રકૃત સાધ્યતા	
अनुयोगितावच्छेदकरूपभेदसिद्धिः	२५७९
તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વ વહ્નિત્વ-તાર્ણત્વગતદ્વિત્વ - જુદા જુદા	
वह्नितार्णाभावग्रहणे विघ्नापातः	२५८०
प्रतियोगिकोटौ अवच्छेदकं वह्नित्व-तार्णत्वगतद्वित्वमेव	२५८१
વહ્નિતાર્ણાભાવ લેવા મથામણ	
વહ્નિતાર્ણાભાવ લઈ નહીં શકાય	
तार्णवह्न्यभावमादाय लक्षणसमन्वयान्नाऽव्याप्तिः	२५८४
यत्किञ्चित्प्रतियोगिता... इत्यादिपरिष्कारेऽपि समन्वयः	२५८५
यावत्साध्यतावच्छेदकतेत्यादिलक्षणस्याऽपि समन्वयः	२५८६
सर्वाण्यपि लक्षणानि अदुष्टानि	२५८७
શબ્દાનુસારી શબ્દભેદી અર્થ	
प्रतियोगिताभेदं विनाऽभावभेदाऽसम्भवः	२५८८
अपेक्षाबुद्धिभेदाद् रूपभेदः	२५८९
लक्षणानुसारेण वह्नितार्णाभावाग्रहणम्	२५९०
वह्नितार्णाभावमादाय अव्याप्त्यसम्भवः	२५९१
विस्तृतोक्तिप्रयोजनजिज्ञासा	२५९२
अपेक्षाबुद्धिभेदः विषयभेदाधीनः	२५९३
सिध्यमानानामर्थानां क्रमशः दर्शनम्	२५९४
અસંભવદોષઆપાદન માટેની પૂર્વ તૈયારી	
पूर्वोपन्यस्तशङ्काविन्यासः	२५९५
મૂળભૂત લક્ષણ	
आदौ परिष्कारसङ्ग्रहप्रदर्शनम्	२५९६
बृहद्-बृहत्तरपरिष्कारोपदर्शनम्	२५९७
સાધ્યતાઅવચ્છેદકતાત્વના ત્રણ અર્થ	
लक्षणम् उभयत्र सम्बन्धघटितम्	२५९८
उभयत्र परम्परासंसर्गमनिवेश्य लक्षणम्	२५९९
નાના પરિષ્કાર સમન્વયથી નાના લક્ષણ	
एकत्र सम्बन्धघटितानि तत्तत्परिष्काराश्रयेण लक्षणानि	२६००
परिष्कारत्रयसम्मीलनेन लक्षणानि	२६०१
દ્વિતીય પરિષ્કારનો સમન્વય	
द्वितीय-तृतीयपरिष्कारमिश्रितलक्षणम्	२६०२
साध्यतावच्छेदकताकोटौ तृतीयपरिष्कारघटितानि लक्षणानि	२६०३
૩ પરિષ્કારના અનુવેધથી ૯ લક્ષણ	

विषय	पृष्ठ
साध्यतावच्छेदकताकोटौ सम्बन्धघटितलक्षणानि	२६०४
ઉભયતઃ સંબંધને આશ્રયીને નવ લક્ષણ	
नव लक्षणानि साध्यतावच्छेदकताकोटौ सम्बन्धघटितानि	२६०५
प्रथमपरिष्कारमाश्रित्य त्रीणि लक्षणानि	२६०६
द्वितीयपरिष्कारमादाय त्रीणि लक्षणानि	२६०७
तृतीयपरिष्कारमनुलक्ष्य त्रीणि लक्षणानि	२६०८
विभिन्नरीत्या त्रीणि लक्षणानि	२६०९
પરંપરા સંબંધ ન સ્વીકારતા થતા ૯ લક્ષણ	
उभयत्र सम्बन्धघटितानि नव लक्षणानि	२६१०
प्रथमपरिष्कारं गृहीत्वा लक्षणत्रयसम्भवः	२६११
द्वितीयपरिष्कारं समाश्रित्य लक्षणत्रयी	२६१२
तृतीयपरिष्कारं समादाय लक्षणत्रितयम्	२६१३
સાધ્યતાકોટિમાં સંબંધ સ્વીકારી થતા અન્ય ૯ લક્ષણ	
उभयत्र सम्बन्धाऽघटितानि नव लक्षणानि	२६१४
आदिमलक्षणत्रये प्रथमपरिष्कारः आदौ	२६१५
मध्यमलक्षणत्रिके द्वितीयपरिष्कारः	२६१६
अन्तिमलक्षणत्रितये तृतीयपरिष्कारः	२६१७
નાના પરિષ્કાર સમન્વયથી થતા કુલ લક્ષણો - ૩૬	
यावत्त्व-पर्याप्तिघटितपरिष्कारानुसारेण लक्षणानि	२६१८
કયા લક્ષણ કોના મતે સંભવશે ?	
लक्षणचतुष्टयोपदर्शनम्	२६१९
લઘુમાં લઘુ ચાર લક્ષણ	२६२०
સા. અ. એક માનતા બાર લક્ષણ સંભવિત	२६२०
દ્વિતીય પરિષ્કાર લેતા અવ્યાપ્તિ	२६२१
પ્રથમ પરિષ્કાર સ્વીકારતા લક્ષણસમન્વય	२६२२

विषय	पृष्ठ
તદ્દ્રવ્યક્તિત્વને અવચ્છેદક માનતા લઘુતમ ચાર લક્ષણ	२६२३
પ્રતિ અ. એક માનતા ફક્ત ચાર જ લક્ષણ સંભવિત	२६२४
પ્રસ્તુત પદાર્થ તરફ ગતિ	२६२५
अव्याप्त्यापादनारम्भः	२६२६
અસંભવ દોષના પડઘમ	
स्थलद्वये आपत्त्यापादनम्	२६२७
पूर्वोक्तपरिष्कारानुसारेण आपत्तिवारणम्	२६२८
अव्याप्तिद्विकनिवारणप्रदर्शनम्	२६२९
वह्निसाध्यके यथा नाऽव्याप्तिः तथोपदर्शनम्	२६३०
असम्भवदोषराजापादनम्	२६३१
वह्निसाध्यके लक्षणाऽसमन्वयः	२६३२
स्वस्मिन्नपि स्वभेदः	२६३३
સાધ્યતાઅવચ્છેદકતાત્વઅતિરિક્તત્વની વ્યાખ્યા	
साध्यतावच्छेदकतात्वमपि साध्यतावच्छेदकतात्वभिन्नम् !	२६३४
ગગનમિશ્રિત ભેદને લઈને લક્ષણઅસમન્વય	
घटकाऽप्रसिद्ध्या लक्षणाऽप्रसिद्ध्यापत्तिः	२६३५
અન્ય પરિષ્કાર ઘટિત લક્ષણમાં પણ અસંભવ	
मुख्यलक्षणेऽसम्भवप्रदर्शनम्	२६३६
દ્વિતીય પરિષ્કાર ઘટિત લક્ષણમાં અસંભવઆપાદન	
वह्न्यभावोऽपि धर्तुं न शक्यते !	२६३७
પોતે જ પોતાનાથી ભિન્ન - અહો આશ્ચર્યમ્ !!	
वह्न्यभावो यथा न धर्तव्यस्तथोपदर्शनम्	२६३८
साध्यत्वावच्छेदकतात्वोभयावच्छिन्ना प्रतियोगिताऽप्यग्राह्या	२६३९
અસંભવ દોષ આવી ગયો	

विषय	पृष्ठ
उभयभेदमादायाऽसम्भवापत्तिः	२६४०
પ્રથમ પરિષ્કાર ઘટિત લક્ષણમાં પણ અસંભવ	
अभीष्टप्रतियोगिताऽप्रसिद्धिः	२६४१
સર્વ લક્ષણો અસંભવ દોષથી દુષ્ટ !!	
प्रतियोगितावच्छेदकताकोटौ अपि अप्रसिद्धिः	२६४२
अन्यल्लक्षणेषु अपि असम्भव एव	२६४३
घटकाऽप्रसिद्ध्या घटिताप्रसिद्धिः दुर्वारा	२६४४
लक्षणसमन्वयार्थमभाव एव न प्राप्यते	२६४५
यावत्त्व-पर्याप्तिघटितलक्षणेऽसम्भवः	२६४६
इतराऽनिरूपकत्वप्रवेशावश्यकता	२६४७
तत्प्रवेशे उक्ताऽव्याप्तिवारणम्	२६४८
महानसीयवह्निसाध्यकेऽव्याप्त्यनुपपादनम्	२६४९
तन्निवारणाय सम्बन्धकोटावपि परिष्कारनिवेशः	२६५०
उभयत्रेतराऽनिरूपकत्वप्रवेशसिद्धिः	२६५१
नास्त्येव कुत्राऽप्यव्याप्तिः परिष्कारादरे	२६५२
महानसीयवह्निसाध्यकस्थलीयाऽव्याप्तिवारणम्	२६५३
पुनरव्याप्त्याशङ्का	२६५४
अव्याप्तिनिवारणोपदर्शनम्	२६५५
तथाविधपरिष्काराङ्गीकारे पुनरसम्भव	२६५६
नास्ति कोऽपि लक्षणसमन्वायकोऽभावः	२६५७
अवच्छेदकतात्वावच्छिन्नत्वमाश्रित्याऽसम्भवः	२६५८
વાત એ જ, શબ્દો ગ્રંથકારના	
उभयभेदमादायाऽसम्भवप्रसक्तिः	२६५९
અસંભવને અસંભવિત કરવા મથામણ	
असम्भवनिवारणायाऽऽयासः	२६६०
નૂતનપરિષ્કારઘટિત લક્ષણ	
वह्निसाध्यकेऽसम्भवाऽसम्भवनिरूपणम्	२६६१
ગગનમિશ્રિત ભેદનું વારણ	

विषय	पृष्ठ
उभयभेदनिवारणम्	२६६२
गगनघटितभेदः न धर्तुं शक्यते	२६६३
વહ્નિસાધ્યક સ્થલે લક્ષણસમન્વય, અસંભવ દૂર !	
वह्न्यभावस्य ग्राह्यत्वोपपत्तिः	२६६४
लक्षणसमन्वयादसम्भववारणम्	२६६५
अन्येषु सर्वेषु लक्षणेषु समाना गतिः	२६६६
गगनघटितोभयभेदवारणम्	२६६८
वह्न्यभावमादाय भवति समन्वयः	२६६९
एकत्रैव परिष्कारादरे असम्भववारणाऽसम्भवः	२६७१
परिष्कारादरे असम्भववारणसम्भवः	२६७२
गगनत्वावच्छिन्नप्रतियोगिताकभेदग्रहणाऽसम्भवः	२६७३
शुद्धभेदमादायाऽप्रसिद्धिवारणम्	२६७४
अप्रसिद्धिनिवारणान्न स्यादेवाऽसम्भवः	२६७५
यावत्त्वघटितपरिष्कारेऽपि असम्भववारणम्	२६७७
सर्वाणि लक्षणानि असम्भवमुक्तानि जातानि	२६७९
असम्भववारणप्रयासनैरर्थक्याऽऽपादनम्	२६८०
નૂતન પરિષ્કારમાં પણ ભેદપ્રવેશ, અસંભવ દુર્વાર	
तथापरिष्कारादरे अनवस्थापादनम्	२६८१
પરિષ્કારોનો અંત ન આવતા અનવસ્થા	
पुनः पुनः असम्भवापत्त्या परिष्कारानन्त्यम्	२६८२
અસંભવ કે અનવસ્થા આવ્યે જ છૂટકો, તમામ લક્ષણમાં	
प्रथमलक्षणेऽनवस्थाप्रदर्शनम्	२६८३
इतरत्वानुप्रवेशेन परिष्कारानुपरमः	२६८४
अन्येषु लक्षणेषु अपि अनवस्थापत्तिः	२६८५
प्रतियोगितावच्छेदकतात्व-गगनोभयभेदमादाय पुनरसम्भवः	२६८६
असम्भववारणाय पुनः परिष्कारः	२६८७

विषय	पृष्ठ
पुनः असम्भवः पुनश्च परिष्कारः	२६८८
असम्भववारणाय पुनः परिष्कारः	२६८९
तृतीयलक्षणे यथाऽनवस्था भवति तथा प्रदर्शनम्	२६९०
तादृशवृत्तित्व-गगनोभयभेदवारणाय परिष्कारः	२६९१
पुनः तादृशवृत्तित्वत्व-गगनोभयभेदमादायाऽसम्भवः	२६९२
परिष्कारविरामाऽसम्भवादनवस्था	२६९३
यावत्त्वघटितपरिष्कारेऽपि अनवस्थाप्रदर्शनम्	२६९४
तादृशप्रतियोगित्वत्व-गगनोभयभेदमादायाऽसम्भवः	२६९५
असम्भवनिवारकपरिष्काराऽविरामादनवस्था	२६९६
पूर्वोक्तपद्धतित्यागप्रयोजनजिज्ञासा	२६९८
पूर्वोक्तपद्धत्यनुसारेण सर्वत्राऽसम्भवसम्भवः	२६९९
प्रथमलक्षणेऽसम्भवप्रदर्शनम्	२७००
परिष्कारादसम्भववारणमापातत एव	२७०२
तादृशेतरधर्मावच्छिन्नत्व-गगनोभयाभावमादाय पुनरसम्भवः	२७०३
एकसत्त्वेऽपि द्वयं नास्तीति न्यायादुभयाभावग्रहणम्	२७०४
परिष्कारादरेऽपि असम्भवो दुर्वार एव	२७०५
पुनः परिष्कारादरे पुनरसम्भवाऽऽपत्तिः	२७०६
परिष्कारानन्त्यम्	२७०८
द्वितीयलक्षणेऽपि अनवस्थाऽऽपत्तिः	२७१०
तादृशनिरूपितत्व-गगनोभयाभावमादायलक्षणाऽसमन्वयः	२७११
उभयाभावमादाय सर्वत्र लक्षणाऽसमन्वयः	२७१२
निरूपितत्वविशिष्टेऽपि निरूपितत्वाभावः	२७१३
निरूपितत्वत्वेतराऽनवच्छिन्न-प्रतियोगिताकाभावप्रवेशः	२७१४
परिष्काराद् यथाऽसम्भववारणम्, तथा प्रदर्शनम्	२७१५
उभयाभाववारणम्, निरूपितत्वाभावः शुद्धः एव ग्राह्यः	२७१६
पुनरुभयाभावमादायाऽऽपत्तिप्रदर्शनम्	२७१७
निरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावग्रहणम्	२७१८
तादृशनिरूपितत्व-गगनोभयाभावग्रहणसम्भवः	२७१९
सर्वत्र उभयाभावमादाय लक्षणाऽसमन्वयः	२७२०
तादृशोभयाभाववारणाय पुनः परिष्काराश्रयणम्	२७२१
तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभाववारणम्	२७२२
तादृशनिरूपितत्व-गगनोभयाभावस्याऽपि वारणम्	२७२३
पुनः उभयाभावग्रहणम्	२७२४
उभयाभावमादाय स्यादेव सर्वत्राऽसमन्वयः	२७२५
पुनः तथैव परिष्कारादरः	२७२६
पुनरुभयाभावमादायाऽसमन्वयः	२७२७
परिष्कारानुपरत्या अनवस्था दुरन्ता	२७२८
तृतीयलक्षणेऽनवस्थाप्रदर्शनम्	२७२९
तादृशधर्मावच्छिन्नत्व-गगनोभया-भावमादायाऽऽपत्तिः	२७३०
उभयाभाववारणाय परिष्कारः	२७३१
परिष्कारादरे लक्षणसमन्वयः आपातत एव	२७३२
पुनरवच्छिन्नत्व-गगनोभयाभावग्रहणम्	२७३३
उभयाभावमादाय भवत्येव सर्वत्राऽसमन्वयः	२७३४
पुनस्तथैव उभयाभाववारणाय नूतनः परिष्कारः कर्तव्यः	२७३५
लक्षणाऽसमन्वयनिवारणमापातत एव	२७३८
एवं हि परिष्कारानुपरतेर्दुरन्ताऽनवस्था	२७३९
चतुर्थेऽपि लक्षणेऽनवस्थाप्रदर्शनम्	२७४०

विषय	पृष्ठ
लक्षणाऽसमन्वयवारणाय परिष्कारः	२७४१
पुनरुभयाभावमादाय आपत्तिः	२७४२
यथा च पूर्वं परिष्कारः कृतः तथैव नूतनपरिष्कारः	२७४३
नूतनपरिष्कारप्रवेशेऽपि पुनरसमन्वयः	२७४४
पुनः परिष्कारः, पुनरसमन्वयः	२७४५
परिष्कारानन्त्यप्रसङ्गादनवस्था	२७४६
व्याप्तिपञ्चकमाथुरीरहस्यसंवादोपदर्शनम्	२७४७
तया रीत्याऽनवस्थाऽसङ्गतिः	२७४८
भेदमादायाऽसम्भवादिप्रदर्शनम् उचितम्	२७४९
अवच्छेदकतात्वभेदस्याऽपि परिष्कारेऽनवस्था	२७५०
ગ્રંથકાર કહી રહ્યા છે તે જ વાત	
अनवस्थादिवारणाय प्रयासः	२७५१
અસંભવ થશે દૂર 'વિલક્ષણ પ્રતિયોગિતા'થી	
विलक्षणप्रतियोगिताप्रवेशः	२७५२
અવ્યાપ્તિના મૂળની તપાસ	
विलक्षणप्रतियोगितासंसर्गघटितलक्षणम्	२७५३
प्रतियोगितायाः स्वनिष्ठप्रतियोगितानिरूपकत्वमर्थः	२७५४
અસંભવદોષની દવા	
विलक्षणप्रतियोगितायाः ओघेनैव निर्वचनम्	२७५५
ઉભયભેદનું નિવારણ	
विलक्षणप्रतियोगिताघटितलक्षणस्य समन्वयः	२७५६
महानसीयवह्न्यभावनिवारणम्	२७५७
વિલક્ષણ પ્રતિયોગિતા તરીકે ગ્રાહ્ય પ્રતિયોગિતા	
भिन्न-भिन्नाभावीयप्रतियोगिता विलक्षणा एव भवति	२७५८

विषय	पृष्ठ
महानसीयवह्न्यभावं विहाय वह्न्यभाव एव ग्राह्यः	२७५९
જો મહાનસીયવહ્નિઅભાવ લેવો હોય તો...	
वह्न्यभावीयप्रतियोगिता धर्तुं शक्यते	२७६०
लक्षणसमन्वयः सुकरः	२७६१
વહ્નિત્વવૃત્તિતાવિશિષ્ટઅવચ્છેદકતાવૃત્તિ પ્રતિયોગિતા અગ્રાહ્ય	
महानसीयवह्निसाध्यके नूतनलक्षणसमन्वयोपदर्शनम्	२७६२
ઉભયભેદનું ગ્રહણ અશક્ય	
महानसीयवह्न्यभावमादाय समन्वयः	२७६३
द्वितीयलक्षणानुसारेणाऽपि असम्भववारणम्	२७६४
विलक्षणप्रतियोगितासंसर्गप्रवेशः द्वितीयलक्षणेऽपि	२७६५
उभयभेदादीनां वारणम्	२७६६
शुद्धभेदः एव धर्तव्यः	२७६७
महानसीयवह्न्यभावस्य अग्राह्यत्वोपपत्तिः	२७६८
धूमहेतुकस्थले सञ्जायते समन्वयः	२७६९
तज्ज्ञानत्वहेतुकस्थलेऽपि समन्वयसम्भवः	२७७०
द्वितीयलक्षणे नास्ति असम्भवो अनवस्था वा	२७७१
तृतीयलक्षणानुसारेण अनवस्थादिनिवारणम्	२७७२
संसर्गविधया विलक्षणप्रतियोगितायाः लक्षणे प्रवेशः	२७७३
वह्निसाध्यके लक्षणसमन्वयादसम्भववारणम्	२७७४
असम्भववारणाद्धि अनवस्थाऽसम्भवः	२७७५
चतुर्थलक्षणे नूतनपरिष्कारप्रवेशः	२७७६
परिष्कारप्रवेशप्रभावाद् असम्भवादिप्रलयः	२७७७
महानसीयवह्न्यभावो निवार्यते	२७७८
पर्वतपक्षके समन्वयसम्भवः	२७७९
तज्ज्ञानपक्षकस्थलेऽपि समन्वयसम्भवः	२७८०
पुनरसमन्वयापत्तिशङ्का	२७८१

● ● ●

अथ पूर्वमेव प्रतिज्ञातं खलु अस्माभिः - 'अव्याप्तिराक्षसी न जातु भवल्लक्षणं मोक्ष्यति' इति, तथापि तदविस्मृत्य किमर्थं पुनः पुनः तन्निराकरणाय प्रयत्यते भवता, पश्यतु, भवतः पश्यतः सतः कथमव्याप्तिराक्षसी भवल्लक्षणं ग्रसति - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्ना भवति, यतः वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतात्वेनैवाऽवच्छिन्ना, यद्वा तद्व्यक्तित्वेनाऽवच्छिन्ना, तादृशं वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतात्वं तद्व्यक्तित्वञ्चोभयमपि पर्याप्तिसम्बन्धेन वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतायामेव वर्तते, नान्यत्र कुत्रचिदिति वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतात्वं वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतापर्याप्तधर्मः, तद्व्यक्तित्वमपि च तथा । वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकता न न साध्यतावच्छेदकता, येन वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतापर्याप्तधर्मः साध्यतावच्छेदकतापर्याप्तः न स्यादिति वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतापर्याप्तं वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतात्वं तद्व्यक्तित्वञ्चापि साध्यतावच्छेदकतापर्याप्तधर्मविधयाऽपि ग्रहीतुं शक्येते एवेति वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतात्वेन तद्व्यक्तित्वेन वा अवच्छिन्ना सा वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्ना भवत्येवेति साध्यतावच्छेदकतापर्याप्तधर्मविधया ग्राह्यतद्व्यक्तित्वाद्यवच्छिन्नवह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वं स्यादेव ।

तादृशवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते एवेति साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्न/प्रकृताऽभावीयप्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते

इति वह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवं 'साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रकृताभावीयप्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिरस्त्येव, साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव वर्तते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया एव भवति, वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया न भवति, किन्तु या वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया स्यादेव, वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वात् । तादृशवह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेनाऽवच्छिन्ना वर्तते, वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वञ्च महानसीयत्वनिष्ठमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां नैव वर्तते, वह्नित्वनिष्ठमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव सा पर्याप्ता, तथापि वह्नित्वनिष्ठमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता प्रतियोगितावच्छेदकता तु अस्त्येवेति वह्नित्वनिष्ठमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां पर्याप्तं न न प्रतियोगितावच्छेदकतापर्याप्तम्, किन्तु प्रतियोगितावच्छेदकतापर्याप्तं कथ्यते एवेति प्रतियोगितावच्छेदकतापर्याप्तधर्मविधया ग्राह्यवह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्ततादृशवह्नित्ववृत्तितावविशिष्टप्रतियोगितावच्छेदकतात्वावच्छिन्ना वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता प्रकृतमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्ततादृशप्रतियोगितावच्छेदकतात्वधर्मावच्छिन्ना स्यादेव ।

ततश्च वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽपि, प्रकृताऽभावीयप्रतियोगितावच्छेदकता-

य शो ल ता

पर्याप्ततादृशवह्नित्ववृत्तितावैशिष्ट्यप्रतियोगितावच्छेदकतात्वधर्मावच्छिन्नत्वस्यापि च सत्त्वात् साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रकृताऽभावीयप्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते । तादृशप्रतियोगिताश्रयावच्छेदकताविधया वह्नित्ववृत्तितावैशिष्ट्य-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता एव प्राप्यते, तन्निरूपितप्रतियोगितानिरूपकाभावः = महानसीयवह्न्यभावः, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिरिति साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नत्वप्रवेशेऽपि स्यादेवाऽऽपत्तिः ।

न च यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नत्वं प्रवेश्य 'यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयनिरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणं यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नत्वमपि प्रवेश्य 'यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणमङ्गीकरणीयम् । ततश्च नोक्ताऽऽपत्तिः । तथा हि - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतापर्याप्तवह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतात्वावच्छिन्ना सम्भवति, किन्तु यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्ना न सम्भवति, महानसीयत्ववृत्तिसाध्यतावच्छेदकतायां वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतात्वस्याऽसत्त्वेन वह्नित्ववृत्तिसाध्यतावच्छेदकतायामेव सत्त्वेन यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतात्वस्याऽग्राह्यत्वात्, वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतायामेव तस्य पर्याप्तत्वात् । तथा च यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितावैशिष्ट्यसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता एव धर्तुं शक्यते, तादृशप्रतियोगितायाः साध्यता-वच्छेदकतात्वोभयधर्मेणाऽवच्छिन्नत्वात्, साध्यतावच्छेदकतात्वोभयस्य महानसीयत्वनिष्ठसाध्यता-

वच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च सत्त्वेन तदितरेषु चाऽसत्त्वेन यावत्साध्यतावच्छेदकतापर्याप्तत्वात् । तादृशसाध्यतावच्छेदकतात्वेन यावत्साध्यतावच्छेदकतापर्याप्तेन अवच्छिन्ना प्रतियोगिता महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तमाना भवेत्, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तमाना भवेत्, ततश्च यावत्साध्यतावच्छेदकतापर्याप्तसाध्यतावच्छेदकतात्वोभयावच्छिन्नोभयसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् । महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः वह्न्यभावीयप्रतियोगितावच्छेदकतायामसत्त्वाद् महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव सत्त्वात्, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तितादृशप्रतियोगितायाः प्रतियोगितात्वावच्छेदकतात्वोभयातिरिक्तधर्मेण अनवच्छिन्नत्वात्, प्रतियोगित्वावच्छेदकतात्वोभयस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठप्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः एव ग्राह्यत्वम्, न वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः इति महानसीयवह्न्यभावः एव ग्राह्यः, न वह्न्यभावः । महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्काऽपि ?

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्रापि महानसीयवह्न्यभावीयवह्नित्ववृत्तितावविशिष्टप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेनावच्छिन्ना, तादृशप्रतियोगितावच्छेदकतात्वस्य वह्नित्ववृत्तिप्रतियोगितावच्छेदकतायां सत्त्वेऽपि महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामसत्त्वेन यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वाभावात्, यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मविधया महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायां वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाञ्च वर्तमानं तदतिरिक्तेषु अवर्तमानं प्रतियोगितावच्छेदकतात्वोभयमेव

या शो ल ता

प्राप्यते, तदवच्छिन्ना च प्रतियोगिता महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायां वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामुभयत्राऽपि भवेदिति तादृशप्रतियोगिता महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया एव भवेत्, वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया नैव भवेदिति यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठप्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते । वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव अस्ति, (महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां नास्ति) इति यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्न/यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते । ततश्च वह्न्यभावः एव ग्राह्यः, न महानसीयवह्न्यभावः इति वह्न्यभावाधिकरणे धूमहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिरिति यावन्निवेशे सर्वं सुस्थं भवति ***इति वाच्यम्;***

अव्याप्तितादवस्थ्यात् । तथा हि - पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिः यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नत्वं निवेश्य 'यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाङ्गीकारेऽपि स्यादेव, यतः यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपन्तु वह्नित्वगतैकत्वमेव

वर्तते, वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां न वर्तते, किन्तु महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता एव वर्तते, तथापि वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव । वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्यप्रतियोगित्वावच्छेदकतात्वैतत्त्रितयेनाऽवच्छिन्ना, तत्र प्रतियोगित्वावच्छेदकतात्वोभयं महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते इति यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मविधया तादृशप्रतियोगितावच्छेदकतात्वोभयं ग्राह्यमेव । तेनावच्छिन्ना हि सा वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्ना स्यादेव ।

ततश्च वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्यापि सत्त्वात् यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नत्वस्यापि सत्त्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण तादृशवह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति तादृशप्रतियोगिताश्रयवह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणविधया महानसीयवह्न्यभावाधिकरणं पर्वतादिकं लभ्यते, तत्र च धूमहेतोः वृत्तितया लक्षणासमन्वयात् स्यादेव अव्याप्तिः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादायाऽव्याप्तिः स्यात्, यतः वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतायाः वह्नित्वे पर्याप्तत्वेन वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव स्यात्, वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्य-साध्यतावच्छेदकतात्वैतत्त्रितयेन अवच्छिन्ना वर्तते । तत्र वह्नित्ववृत्तितावैशिष्ट्यस्य महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामवर्तमानत्वेन यावत्साध्यतावच्छेदकतापर्याप्तत्वाऽसम्भवेऽपि साध्यतावच्छेदकतात्वोभयस्य महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि

य शो ल ता

वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च वर्तमानत्वेन यावत्साध्यतावच्छेदकतापर्याप्तत्वं सम्भवत्येवेति यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया ग्राह्येण साध्यतावच्छेदकतात्वोभयेन अवच्छिन्ना वह्नित्व-वृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्ना स्यादेव । तथा च यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तिता-विशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते एव, वह्नित्ववृत्तितावविशिष्टसाध्यतावच्छे-दकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया पूर्वोक्तरीत्या वह्नित्वगतैकत्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव स्यात् ।

वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छे-दकतायां सम्भवत्येवेति यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव, वह्न्यभावीयप्रतियोगितावच्छेदकता हि तादृशप्रतियोगिताश्रयभूता इति वह्न्यभावो धर्तुं शक्यते, वह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणासमन्वयात् स्यादेवाऽव्याप्तिः ।

यदि चैतदव्याप्तिनिवारणाय साध्यतावच्छेदकतापर्याप्तधर्मेतरानवच्छिन्नत्वं निवेश्य 'साध्यताव-च्छेदकतापर्याप्तधर्मेतरानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रति-योगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियो-गितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवम्, प्रतियोगितावच्छेदकतापर्याप्तधर्मेतरान-वच्छिन्नत्वम् प्रतियोगितविशेषणविधया निवेश्य 'साध्यतावच्छेदकतापर्याप्तधर्मेतरानवच्छिन्नप्रतियो-गितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रकृताभावीयप्रतियो-गितावच्छेदकतापर्याप्तधर्मेतरानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावा-धिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणमङ्गीक्रियते, ततश्च नोक्ताऽव्याप्तिः स्यात्,

या शो ला ता

यतः 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितावच्छेदकसाध्यतावच्छेदकतात्वोभयं साध्यतावच्छेदकतापर्याप्तम्, वह्नित्ववृत्तितावैशिष्ट्यं न साध्यतावच्छेदकतापर्याप्तम्, वह्नित्ववृत्तितावि‌शिष्टप्रकारतावच्छेदकतादौ अपि सत्त्वादिति साध्यतावच्छेदकतापर्याप्तधर्मेतरवह्नित्ववृत्तितावैशिष्ट्येन अवच्छिन्ना स्यादेव तादृशवह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता इति वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतापर्याप्तेतरानवच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते । किन्तु या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा तु साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, साध्यत्वावच्छेदकत्वोभयातिरिक्तेनाऽनवच्छिन्ना, साध्यत्वावच्छेदकतात्वोभयस्य च साध्यतावच्छेदकतायां पर्याप्तत्वेन तेनैवाऽवच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यत्वावच्छेदकतात्वोभयलक्षणसाध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्ना स्यादेव । तथा च साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते, तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वं स्यादेव ।

य शो ल ता

महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव वर्तते, न वह्न्यभावीयप्रतियोगितावच्छेदकतायाम् । अतः साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठप्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रकृताभावीयप्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, ततश्च महानसीयवह्न्यभावः एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः ?

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्रापि उक्तलक्षणानुसारेण महानसीयवह्न्यभावमादायाऽ-

व्याप्तिः नैव भवेत्, यतः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायान्तु साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता नास्त्येव, किन्तु वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव (तादृशप्रतियोगितावच्छेदकतायाः वह्नित्वे पर्याप्तत्वेन) साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वर्तते । परन्तु वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्येन प्रतियोगितावच्छेदकतात्वोभयेन चैवाऽवच्छिन्ना, (नान्येन केनचित्), तत्र प्रतियोगित्वावच्छेदकतात्वोभयस्य महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि सत्त्वेन प्रतियोगितावच्छेदकतापर्याप्तधर्मविधया प्रतियोगित्वावच्छेदकतात्वोभयं धर्तुं शक्यते, किन्तु वह्नित्ववृत्तितावैशिष्ट्यं न प्रतियोगितावच्छेदकतापर्याप्तम् । अतः तदवच्छिन्ना वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मावच्छिन्ना स्यादेवेति ।

ततश्च तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य सत्त्वेऽपि प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नतायाः असत्त्वात् साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते । प्रतियोगित्वावच्छेदकतात्वोभयेनैव अवच्छिन्ना, तदतिरिक्तेनाऽनवच्छिन्ना या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा प्रतियोगितावच्छेदकतात्वोभयस्य प्रतियोगितावच्छेदकतापर्याप्तत्वेन प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्ना एव स्यादिति तादृशप्रतियोगितायां साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नत्वस्य च सत्त्वात् साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय

-प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तव्या इति वह्न्यभावः एव धर्तुं शक्यते, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः ?

न च 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावग्रहणाय या वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगिता गृहीता तस्याः वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतात्वेन तद्व्यक्तित्वेन वाऽवच्छिन्नत्वम्, वह्नित्ववृत्तितावैशिष्ट्य-साध्यतावच्छेदकतात्वत्रितयस्य तादृशाऽखण्डधर्मे समावेशात्, तादृशसाध्यतावच्छेदकताया ऐक्ये गुरुधर्मस्याऽनवच्छेदकत्वे च तद्व्यक्तित्वस्य तन्निष्ठप्रतियोगितावच्छेदकतयाऽभ्युपगमस्यावश्यकत्वात् । वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतात्वं तद्व्यक्तित्वञ्च वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतायामेव वर्तेते, नान्यत्र कुत्रचिदिति वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतापर्याप्तं हि वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतात्वं तद्व्यक्तित्वञ्च । ततश्च वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकता न न साध्यतावच्छेदकता, येन वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतापर्याप्तं वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतात्वं तद्व्यक्तित्वञ्च साध्यतावच्छेदकतापर्याप्तं न भवेदिति साध्यतावच्छेदकतापर्याप्तेन वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतात्वेन तद्व्यक्तित्वेनैव वाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना सा वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्ना स्यादेव । अर्थात् साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते एव । तादृशवह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्य प्राप्तेः साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वं स्यादेवेति वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-

य शो ल ता

वच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण च धर्तुं शक्यते इति वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेव अव्याप्तिः ।

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्र साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं वर्तते । महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः असत्त्वेऽपि वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वर्तते एव । वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेनैवाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना । वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वस्य वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामेव सत्त्वेन, तदितरस्मिन् असत्त्वेन च वह्नित्वनिष्ठप्रतियोगितावच्छेदकतापर्याप्तं हि वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वम्, वह्नित्वनिष्ठप्रतियोगितावच्छेदकता न न प्रतियोगितावच्छेदकता इति वह्नित्वनिष्ठप्रतियोगितावच्छेदकतापर्याप्तं वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वं प्रतियोगितावच्छेदकतापर्याप्तमपि कथ्यते एवेति वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेनैवाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना वह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्ना स्यादेवेति वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नत्वस्य च सत्त्वात् साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव । तादृशप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावो धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेव अव्याप्तिः । ततश्च न प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नत्वादिप्रवेशेऽपि अव्याप्तिनिराकरणं सम्भवति ***इति वाच्यम्;***

यावत्प्रतियोगितावच्छेदकताऽपर्याप्तधर्मानवच्छिन्नत्वादेः प्रवेशेन तन्निवारणसम्भवात् । तथा चैवं लक्षणम् - यावत्साध्यतावच्छेदकताऽपर्याप्तधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावः इत्येवम्, यावत्प्रतियोगितावच्छेदकताऽपर्याप्तधर्मानवच्छिन्नत्वं निवेश्य यावत्साध्यतावच्छेदकताऽपर्याप्तधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकताऽपर्याप्तधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवं वा । अत्र यावत्प्रतियोगितावच्छेदकताऽपर्याप्तधर्मानवच्छिन्नत्वं यावत्साध्यतावच्छेदकताऽपर्याप्तधर्मानवच्छिन्नत्वं = यावत्यः प्रतियोगितावच्छेदकताः साध्यतावच्छेदकताः वा तावतीषु सर्वासु पर्याप्ताः ये ये धर्माः तदितरेणाऽनवच्छिन्नत्वम् - इत्यर्थकं ज्ञेयम् । ततश्च न कुत्राऽपि अव्याप्तिः । तथा हि -

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतात्वेन तद्व्यक्तित्वेन वा अवच्छिन्ना गृहीता, तत्र वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतात्वं तद्व्यक्तित्वं वा वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव पर्याप्तम्, महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां तस्याऽवर्तमानत्वात् तादृशवह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतात्वं तद्व्यक्तित्वं वा यावत्साध्यतावच्छेदकतापर्याप्तं नैव कथ्यते, किन्तु यत्किञ्चित्साध्यतावच्छेदकतापर्याप्तमेव कथ्यते इति यावत्साध्यतावच्छेदकतापर्याप्तभिन्नं हि वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतात्वम्, तेनावच्छिन्ना वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मावच्छिन्ना एव कथ्यते, अतः यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं नैव शक्यते ।

किन्तु साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायाः साध्यतावच्छेदकतात्वेनाऽवच्छिन्नत्वात्, साध्यतावच्छेदकतात्वस्य च महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि, वह्नि-

त्वनिष्ठसाध्यतावच्छेदकतायामपि च वर्तमानत्वेन यावत्साध्यतावच्छेदकतापर्याप्तत्वात् । तथा च यावत्साध्यतावच्छेदकतापर्याप्तसाध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्ना सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते। तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् । महानसीयत्व-वह्नित्वगत-द्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः महानसीयवह्न्यभावीयप्रतियोगितावच्छेद-कतायामेव सत्त्वाद् वह्न्यभावीयप्रतियोगितावच्छेदकतायामसत्त्वाच्च यावत्साध्यतावच्छेदकतापर्याप्ते-तरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपाव-च्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्ना-वच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसी-यत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्ते-तरधर्मानवच्छिन्नप्रतियोगितारूपेण च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, न वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता इति महानसीयवह्न्यभावः एव ग्राह्यः, न वह्न्यभावः, महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षण-समन्वयात् कुतोऽव्याप्तिः ?

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्राऽपि यावत्साध्यतावच्छेदकतापर्याप्तेन साध्यतावच्छेदकता-त्वेन तद्व्यक्तित्वेन वा अवच्छिन्ना तदितरेणाऽनवच्छिन्ना च या प्रतियोगिता तन्निरूपकपर्याप्त्यनु-योगितावच्छेदकरूपविधया वह्नित्वगतैकत्वमेव प्राप्यते । वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतायां वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वर्तते, किन्तु सा वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेन तद्व्यक्तित्वेन वाऽवच्छिन्ना, महानसीयवह्न्यभावीयवह्नित्ववृत्तितावैशिष्टप्रतियोगितावच्छेदकतात्वं तद्व्यक्तित्वं वा वह्नित्वनिष्ठमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव वर्तते, नान्यत्र कुत्रचिदिति वह्नित्वनिष्ठप्रतियोगितावच्छेदकतापर्याप्तम्, प्रतियोगितावच्छेदकता तु महानसीय-त्वेऽपि वर्तते, तत्राऽवर्तमानं तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छे-

दकतात्वं तद्व्यक्तित्वं वा कथं यावत्प्रतियोगितावच्छेदकतापर्याप्तं भवेदिति तादृशवह्नित्ववृत्तिता-विशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेन तद्व्यक्तित्वेन वा अवच्छिन्ना वह्नित्व-वृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तभिन्नधर्मावच्छिन्ना एव स्यात् । ततः यावत्प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशवह्नित्ववृत्तिमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं नैव शक्यते ।

अत्र महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तु यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितावच्छेदतात्वभिन्नधर्मानवच्छिन्नाऽपि वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया नास्तीति यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते ।

तथा च या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तस्याः प्रतियोगितावच्छेदकतात्वेनैव तद्व्यक्तित्वेनैव वाऽवच्छिन्नत्वेन प्रतियोगितावच्छेदकतात्व-तद्व्यक्तित्वोभयस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वेन च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तभिन्नधर्मानवच्छिन्ना भवत्येव, यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीया तु अस्त्येवेति यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते । अतः वह्न्यभावः एव धर्तव्यः, तदधिकरणे च धूमहेतोः अवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्काऽपि ? ***इति विभाव्यते;***

तदापि न निस्तारः, अव्याप्तितादवस्थ्यात् । तथा हि - अत्र महानसीयवह्निः - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावि‌शिष्ट-साध्यतावच्छेदकतात्वेन तद्व्यक्तित्वेन वा अवच्छिन्ना वह्नित्ववृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगिता

यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते, अत्र न विवदामहे वयम्, किन्तु यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगितारूपेण अन्या का प्रतियोगिता धर्तुं शक्यते ? इति तु उच्यताम् । या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा साध्यत्वावच्छेदकतात्वोभयेनावच्छिन्ना, साध्यत्वावच्छेदकतात्वोभयञ्च न यावत्साध्यतावच्छेदकतापर्याप्तम्, यतः निरूपितत्वसम्बन्धेन साध्यत्वं साध्यतानिरूपितेषु सर्वेषु भवेत्, न केवलं साध्यतावच्छेदकतायाम्, एवमवच्छेदकतात्वमपि न केवलसाध्यतावच्छेदकतायाम्, किन्तु सर्वेषु अवच्छेदकत्वेषु । ततश्च साध्यत्वमपि अवच्छेदकतात्वमपि च यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया धर्तुं नैव शक्यते । ततः तदवच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्ना कथं कथ्यते ?

यद्यपि साध्यतावच्छेदकतात्वं साध्यतावच्छेदकतायामेव पर्याप्तमिति साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिता साध्यतावच्छेदकतापर्याप्तधर्मावच्छिन्ना भवति, तथापि साध्यत्वमवच्छेदकतात्वञ्चाऽपि साध्यतावच्छेदकतानिष्ठप्रतियोगितायाः अवच्छेदकविधया एव गृह्येते, न तु साध्यत्वमवच्छेदकतात्वं वा साध्यतावच्छेदकतानिष्ठप्रतियोगितायाः अनवच्छेदकमिति कोऽपि प्राज्ञः वदेत् । तथा च सर्वासां साध्यतावच्छेदकतानिष्ठप्रतियोगितानां साध्यत्वावच्छेदकतात्वोभयावच्छिन्नत्वावश्यम्भावात् ताः सर्वाः अपि प्रतियोगिताः यावत्साध्यतावच्छेदकतापर्याप्तभिन्नधर्मावच्छिन्ना एव भवेयुः । ततश्च यावत्साध्यतावच्छेदकतापर्याप्तभिन्नधर्मानवच्छिन्नप्रतियोगिताऽप्रसिद्धेः लक्षणाऽसमन्वयोऽव्याप्तिश्च, एवं सर्वत्र लक्षणाऽसमन्वयात् स्यादेवाऽसम्भवः दुर्वारः इति महदसमञ्जसं भवल्लक्षणम् ***इति चेत्*** ?

य शो ल ता

अत्र केचित् - निरूपितत्वसम्बन्धेन साध्यत्वमवच्छेदकतात्वञ्च साकल्येनाऽवच्छेदकम्, न तु स्वातन्त्र्येणेति उभयमेवावच्छेदकतया प्राप्यते, न तु एकमिति साध्यत्वावच्छेदकतात्वोभयस्य यावत्साध्यतावच्छेदकतापर्याप्तत्वात् तदितरानवच्छिन्ना प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्ना भवत्येवेति न दोषः ।

[1]***अन्ये तु*** - "यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वनिवेशेनोक्ताऽऽपत्तिवारणसम्भवात् । तथा चैवं लक्षणम् अत्र अभ्युपगन्तव्यम् - यावत्साध्यतावच्छेदकतावच्छेदकता-

१. अन्येषां मतनिरूपणं पृ.२५२४ इत्यत्र पूर्णतामेष्यति ।

पर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपित-प्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति, यद्वा यावत्प्रतियोगितावच्छेदकता-वच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वमपि निवेश्य यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्य-धिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्या-प्तीय-यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगिताश्रयावच्छेदकता-निरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति लक्षणमभ्युपगन्तव्यम् ।

ततश्च न स्यादेव कश्चिदपि दोषः । तथा हि - अत्र महानसीयवह्निः - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र यावत्साध्यतावच्छेदकताविधया महानसीयत्वनिष्ठसाध्यतावच्छेदकताऽपि गृह्यते, वह्नित्वनिष्ठसाध्यतावच्छेदकताऽपि गृह्यते इति महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयमेव यावत्साध्यता-वच्छेदकताविधया गृह्यते, तादृशसाध्यतावच्छेदकतावच्छेदकधर्मः साध्यत्वमवच्छेदकतात्वञ्च, (वस्तुतः साध्यतावच्छेदकतावच्छेदकः धर्मः महानसीयत्वत्वं वह्नित्वत्वं वा भवेत्, न तु साध्यतावच्छेदकतात्वम्, किन्तु अत्र साध्यतावच्छेदकतापर्याप्तं यत् प्रकारत्वादि तदवच्छेदकता साध्यतावच्छेदकतात्वनिष्ठा अभिप्रेता साध्यतावच्छेदकतावच्छेदकतारूपेण । तत्प्रयोजनञ्चाऽग्रे वक्ष्यते इति, ततश्च साध्यतावच्छेदकतावच्छेदकता साध्यत्वावच्छेदकतात्वोभयस्मिन्नेव भवेत्।) साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणमपि साध्यत्वावच्छेदकतात्वोभयमेव भवेत्, वह्नित्व-वृत्तितावैशिष्ट्यादिकं साध्यतावच्छेदकतावच्छेदकं नास्ति एव । अतः केवलसाध्यत्वावच्छेद-कतात्वोभयावच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतावच्छेदकता-पर्याप्त्यधिकरणधर्मावच्छिन्ना स्यादेव । तथा च साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्या-प्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकता-वच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसी-यत्व-वह्नित्वगतद्वित्वमेव भवेत् । तादृशमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपक-पर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव विद्यते, वह्न्यभावीयप्रतियो-गितावच्छेदकतायां नैव, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायाः प्रतियो-

य शो ल ता

गित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात्, तदतिरिक्तेनाऽनवच्छिन्नत्वाच्च महानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां प्रतियोगितावच्छेदकतात्वोभयनिष्ठप्रतियोगिता-वच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं सम्भवत्येव ।

प्रकृतमहानसीयवह्न्यभावीययावत्प्रतियोगितावच्छेदकताविधया महानसीयत्वनिष्ठप्रतियोगिता-वच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयमेव प्राप्यते । तादृशप्रतियोगितावच्छेदकता-वच्छेदकं प्रतियोगित्वावच्छेदकतात्वोभयमिति तादृशप्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्य-धिकरणं प्रतियोगित्वावच्छेदकतात्वोभयमेव, तेनावच्छिन्ना हि सा महानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्ना कथ्यते एव । तथा च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्य-तावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य निरूपितत्वसम्बन्धाव-च्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मा-वच्छिन्नत्वस्याऽपि च सत्त्वात् तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयो-गितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतावच्छेदकतापर्या-प्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्व-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरण-धर्मावच्छिन्नप्रतियोगितारूपेण च धर्तुं शक्यते इति तादृशमहानसीयवह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्नास्त्येव अव्याप्तिः ।

यदि च यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्ते-तरधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्ति-

त्वाभावः - इत्येवं लक्षणमभ्युपगम्यते तदापि असम्भवः दुर्निवारः एव स्यात्, यतः 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्य प्राप्तौ अपि, महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां सत्त्वेऽपि न हि तादृशी प्रतियोगिता लभ्यते या यावत्प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्ना भवेत्, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चावच्छिन्ना स्यादेव, तत्र प्रतियोगित्वमपि यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मविधया न गृह्यते, अवच्छेदकतात्वमपि च, प्रतियोगित्वावच्छेदकतात्वोभयस्यापि प्रतियोगितावच्छेदकतेतरेषु वर्तमानत्वात्। प्रतियोगितावच्छेदकतात्वं यावत्प्रतियोगितावच्छेदकतापर्याप्तं वर्तते, किन्तु प्रतियोगितावच्छेदकतात्वस्य तादृशप्रतियोगितावच्छेदकत्वाऽभ्युपगमेऽपि प्रतियोगित्वावच्छेदकतात्वोभयस्य तादृशप्रतियोगितावच्छेदकत्वं प्रत्याख्यातुमशक्यमेव ।

तथा च तादृशप्रतियोगित्वावच्छेदकतात्वोभयेनावच्छिन्ना सा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मावच्छिन्ना एव स्यात्, न यावत्प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्ना इति यावत्प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नप्रतियोगिताऽप्रसिद्ध्या सर्वत्र लक्षणाऽप्रसिद्धेः स्यादेव असम्भवः । अतः यावत्प्रतियोगितावच्छेदकतापर्याप्तेतरधर्मानवच्छिन्नत्वमनिवेश्य यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वं निवेश्य पूर्वोक्तं लक्षणमङ्गीकार्यम् । ततश्च न स्यात् कुत्राऽपि आपत्तिः, यतः पूर्वोक्तरीत्या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणप्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना इति यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते इति नाऽप्रसिद्धिः, न वा तत्प्रयुक्ताऽसम्भवः।

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्राऽपि साध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतात्वेन, साध्यत्वावच्छेदकतात्वोभयेन, तद्व्यक्तित्वेन वा अवच्छिन्ना, तत्र साध्यतावच्छेदकतात्वमपि यावत्साध्यतावच्छेदकतावच्छेदकम्, साध्यतावच्छेदकतात्वोभयमपि, तद्-

व्यक्तित्वमपि च तथा । तथा च साध्यतावच्छेदकतात्वमपि यावत्साध्यतावच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणम्, साध्यत्वावच्छेदकतात्वोभयमपि, तद्व्यक्तित्वमपि च । तथा च साध्यत्वावच्छेदकतात्वोभयेन, साध्यतावच्छेदकतात्वेन, तद्व्यक्तित्वेन वा अवच्छिन्ना सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्ना एव कथ्यते, साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वप्राप्तेः यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वमेव भवेत् । वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायामेव विद्यते, न महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाम्, वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता तु प्रतियोगित्वेनावच्छेदकतात्वेन चैवाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना इति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता भवत्येव ।

एवं वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता प्रतियोगित्वावच्छेदकतात्वोभयेन, प्रतियोगित्वावच्छेदकतात्वेन, तद्व्यक्तित्वेन वाऽवच्छिन्ना भवेत्, प्रतियोगितावच्छेदकतात्वम्, प्रतियोगित्वावच्छेदकतात्वोभयम्, तद्व्यक्तित्वं वा वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामेव वर्तते, नान्यत्र कुत्रचिदिति प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणविधया तत्तद् ग्रहीतुं शक्यते । अतः प्रतियोगितावच्छेदकतात्वेन, प्रतियोगित्वावच्छेदकतात्वोभयेन, तद्व्यक्तित्वेन वाऽवच्छिन्ना सा प्रतियोगिता यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्ना एव भवेत् ।

तथा च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य, यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-

वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितारूपेण च तादृश-वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति वह्न्यभावः धर्तव्यः, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्न स्यादेव अव्याप्तिः।

ननु अव्याप्तिनिवारणप्रयासोत्साहः अखण्डितश्चेत्, करोतु नूतनपरिष्कारान् भवान्, किन्तु अव्याप्तिः नैव स्यादिति नैव उद्घोषयतु, मिथ्याजल्पप्रसङ्गात्, तादृशपरिष्कारेणाऽपि अव्याप्त्यनिवारणात्, अव्याप्तिश्चैवम् - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकता गृह्यते, वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता च वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्य-साध्यत्वावच्छेदकतात्वैतत्त्रितयेन, तद्व्यक्तित्वेन वाऽवच्छिन्ना, तत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वस्य तद्व्यक्तित्वस्य च वह्नित्वनिष्ठसाध्यतावच्छेदकतामात्रवृत्तित्वात् तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्तत्वम्, न तु यावत्साध्यतावच्छेदकतापर्याप्तत्वम् । अतः यावत्साध्यतावच्छेदकतावच्छेदकधर्मविधया वह्नित्ववृत्तितावैशिष्ट-साध्यतावच्छेदकतात्वं तद्व्यक्तित्वं वा न प्राप्यते । किन्तु पूर्वोक्तरीत्या यावत्साध्यतावच्छेदकतावच्छेदकधर्मविधया साध्यत्वावच्छेदकतात्वोभयं साध्यतावच्छेदकतात्वमेव वा प्राप्यते इति यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मविधया साध्यत्वावच्छेदकतात्वोभयं साध्यतावच्छेदकतात्वञ्च प्राप्येते, साध्यत्वावच्छेदकतात्वोभयस्याऽपि साध्यतावच्छेदकतात्वस्याऽपि च स्वातन्त्र्येण यावत्साध्यतावच्छेदकतावच्छेदकत्वात् ।

तादृशवह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतात्वेनाऽनवच्छिन्ना, किन्तु साध्यत्वावच्छेदकतात्वोभयेन तु अवच्छिन्ना एव, साध्यत्वावच्छेदकतात्व-वह्नित्ववृत्तितावैशिष्ट्यैतत्त्रितयस्मिन् साध्यत्वावच्छेदकतात्वोभयस्य समावेशादिति यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयावच्छिन्ना हि सा वह्नित्ववृत्तिता-

विशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरण-धर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, वह्नित्ववृत्तितात्रिशिष्टसाध्यतावच्छेदकतानिष्ठ-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्य प्राप्तेः यावत्साध्यता-वच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वं स्यादेव । वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां सम्भवति । वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वावच्छेदकतात्वोभयातिरिक्ताऽनवच्छिन्ना इति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ -प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽ-निरूपिता भवत्येव । प्रतियोगित्वावच्छेदकतात्वोभयञ्च यावत्प्रतियोगितावच्छेदकतावच्छेदकं भवतीति यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मविधया प्रतियोगित्वावच्छेदक-तात्वोभयमपि धर्तुं शक्यते । ततश्च तेनावच्छिन्ना हि वह्न्यभावीयप्रतियोगितावच्छेदकता-वृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्ना स्यादेव ।

तथा च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकता-वच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्व-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगिता-वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य, यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वस्य च सत्त्वाद् यावत्साध्यता-वच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ -प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेद-कताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्य-भावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते एव । ततश्च वह्न्यभावोऽपि धर्तुं शक्यते । वह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र यथाऽव्याप्तिः वह्न्यभावमादाय दुर्वारा जाता तथैव पर्वतो वह्निमान् धूमाद् - इत्यत्राऽपि अव्याप्तिः दुर्वारा भवत्येव यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वप्रवेशे, तद्यथा - प्रकृते पूर्वोक्तरीत्या यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मविधया साध्यतावच्छेदकतात्वं साध्यत्वावच्छेदकतात्वोभयं तद्व्यक्तित्वं वा एव प्राप्यते, तदवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वप्राप्तेः यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव भवेत् । वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता न केवलवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव विद्यते, अपि तु वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामपि विद्यते । वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्य-प्रतियोगित्वावच्छेदकतात्वत्रितयेन, तद्व्यक्तित्वेन वाऽवच्छिन्ना भवति ।

यावत्प्रतियोगितावच्छेदकतावच्छेदकधर्मविधया प्रतियोगितावच्छेदकतात्वोभयमेव प्राप्यते, प्रतियोगितावच्छेदकतात्वं वा, किन्तु वह्नित्ववृत्तितावैशिष्ट्यम्, वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वम्, तद्व्यक्तित्वं वा न प्राप्यते । प्रतियोगितावच्छेदकतात्वोभयेन तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता अवच्छिन्ना अस्त्येव, प्रतियोगित्वावच्छेदकतात्व-वह्नित्ववृत्तितावैशिष्ट्यैतत्त्रितयस्मिन् प्रतियोगित्वावच्छेदकतात्वोभयस्याऽपि समावेशात् । तथा च यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणप्रतियोगितावच्छेदकतात्वोभयावच्छिन्ना हि सा तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते ।

तथा च वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य यावत्प्रतियोगितावच्छेदकताव-

च्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितारूपेण तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीयवह्न्यभावोऽपि धर्तुं शक्यते, तादृशप्रतियोगिताश्रयवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिरूपितप्रतियोगितानिरूपकत्वात् तादृशमहानसीयवह्न्यभावस्येति महानसीयवह्न्यभावाधिकरणे धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेव अव्याप्ति***रिति चेत्*** ?

मैवं वोचः, यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वनिवेशेन तन्निवारणात् । तथा चैवं लक्षणम् - यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति । यद्वा यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य प्रतियोगितावैशेषणविधया निवेशमङ्गीकृत्य 'यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपगन्तव्यम् । ततश्च न स्यादेवोक्तरीत्या अव्याप्तिः ।

तथा हि - 'अत्र महानसीयवह्निः ?' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्य-साध्यत्वावच्छेदकतात्वत्रितयेन, तद्व्यक्तित्वेन वाऽवच्छिन्ना। तत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वं वह्नित्ववृत्तितावैशिष्ट्यं तद्व्यक्तित्वञ्च यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणं नास्त्येव । यावत्साध्यता-

वच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मविधया साध्यत्वावच्छेदकतात्वोभयमेव प्राप्यते। तथा च यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयभिन्नवह्नित्ववृत्तितावैशिष्ट्यादिना अवच्छिन्ना वह्नित्ववृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण कथं धर्तुं शक्यते ? किन्तु या साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना भवेत् सैव प्रतियोगिता ग्राह्या, या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा साध्यत्वावच्छेदकतात्वोभयेन साध्यतावच्छेदकतात्वेन वा अवच्छिन्ना, साध्यत्वावच्छेदकतात्वोभयमपि यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणम्, साध्यतावच्छेदकतात्वमपि च तथा, एतदतिरिक्तेन साध्यतावच्छेदकतानिष्ठप्रतियोगिता अनवच्छिन्ना इति साध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते एव ।

तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् । महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव वर्तते । अतः वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य च सत्त्वेऽपि यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽसत्त्वाद् यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्नकिञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्ना-

नवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं नैव शक्यते, किन्तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तव्या इति महानसीयवह्न्यभावो धर्तुं शक्यते, महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्न स्यादेवाऽव्याप्तिः ।

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्राऽपि यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरण-धर्मभिन्नानवच्छिन्नप्रतियोगितारूपेण साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते, साध्यतावच्छेदकतानिष्ठप्रतियोगिता च साध्यत्वावच्छेदकतात्वोभयेनावच्छिन्ना इति साध्यतावच्छेदकतात्वोभयस्य यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणत्वात्, तदतिरिक्तवह्नित्व-वृत्तितावैशिष्ट्यादिना तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायाः अनवच्छिन्नत्वाच्च यावत्साध्यता-वच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वं साध्यतावच्छेदकतानिष्ठप्रतियोगितायां स्यादेव, साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्व-गतैकत्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वमेव स्यात् । वह्नित्वगतैकत्वावच्छिन्नानु-योगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायामपि वर्तते, महानसीय-वह्न्यभावीयवह्नित्ववृत्तितावैशिष्टप्रतियोगितावच्छेदकतायामपि वर्तते । तत्र वह्नित्ववृत्तिता-वैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावैशिष्टमहान-सीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्य-प्रतियोगितावच्छेदकतात्वत्रि-तयेन, तद्व्यक्तित्वेन वा अवच्छिन्ना, तत्र वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतात्वम्, वह्नित्ववृत्तितावैशिष्ट्यम्, तद्व्यक्तित्वञ्च न यावत्प्रतियोगितावच्छेदकतावच्छेदकता-पर्याप्त्यधिकरणधर्मरूपेण धर्तुं शक्यन्ते, ततश्च तेनाऽवच्छिन्ना हि तादृशवह्नित्ववृत्तितावैशिष्टमहान-सीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतावच्छेदकता-पर्याप्त्यधिकरणधर्मभिन्नधर्मावच्छिन्ना एव भवेत्, तथा च यावत्प्रतियोगितावच्छेदकतावच्छेदकता-पर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितारूपेण महानसीयवह्न्यभावीयवह्नित्ववृत्तितावैशिष्ट-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते । तथा च वह्नित्ववृत्तितावैशिष्ट-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतावच्छेदकता-पर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्व-

रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य सत्त्वेऽपि यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वाऽसत्त्वाद् यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता धर्तुं न शक्यते ।

या वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता सा प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, प्रतियोगितावच्छेदकतात्वोभयातिरिक्तधर्मेणाऽनवच्छिन्ना, (प्रतियोगितावच्छेदकतात्वेन, तद्व्यक्तित्वेन वा अवच्छिन्ना, एतदतिरिक्तेन तु अनवच्छिन्ना एव) प्रतियोगितावच्छेदकतात्वं प्रतियोगितावच्छेदकतात्वोभयं तद्व्यक्तित्वं वा यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणम्, तेषां सर्वेषां यावत्प्रतियोगितावच्छेदकतायाः स्वातन्त्र्येणाऽवच्छेदकत्वात् । तथा तादृशधर्मैरवच्छिन्ना, तदितरेणाऽनवच्छिन्ना सा वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्ना स्यादेव । ततश्च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते । अतः वह्न्यभावः एव ग्राह्यः, न महानसीयवह्न्यभावः, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिरिति ।

ननु यावत्त्वं किमर्थं नूतनपरिष्कारे निवेश्यते, उभयत्र तत्प्रवेशं परिहृत्य 'साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-

भिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवम्, 'साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणमङ्गीक्रियताम् ? किं बाधकम्? येन यावत्त्वप्रवेशः आदृतः भवता ***इति चेत्*** ?

शृणु - यावत्पदाऽप्रवेशे उक्ताऽव्याप्तिद्वितयं पुनरपि त्रौकते । तथा हि - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकता गृह्यते । तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्य-साध्यत्वावच्छेदकतात्वत्रितयेन, तद्व्यक्तित्वेन वा अवच्छिन्ना। तत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वम्, वह्नित्ववृत्तितावैशिष्ट्यम्, तद्व्यक्तित्वं वा वह्नित्ववृत्तिसाध्यतावच्छेदकतायामेव वर्तते, महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां न वर्तते इति वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतायाः महानसीयत्ववृत्तितावैशिष्टसाध्यतावच्छेदकतायाश्चाऽर्थाद् यावत्साध्यतावच्छेदकतायाः अवच्छेदकता वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वे वह्नित्ववृत्तितावैशिष्ट्ये, तद्व्यक्तित्वे वा न सम्भवति।

ननु दूरे आस्ताम् अव्याप्तिनिवारणम्, यावत्पदसार्थक्यप्रक्रिया वा, आमूलचूलं दुष्टमिदं लक्षणम् । कथं हि एतल्लक्षणं निरूप्यते भवता ? इत्येव न ज्ञायते । किं साध्यतावच्छेदकतायाः अवच्छेदकता कदापि वह्नित्ववृत्तितावैशिष्ट्ये साध्यतावच्छेदकतादौ वा भवेत् ? साध्यतावच्छेदकता यदि वह्नित्वनिष्ठा तदा वह्नित्वत्वं साध्यतावच्छेदकतावच्छेदकं भवेत्, पर्वतो वह्निमान् धूमाद् - इत्यादौ तु साध्यतावच्छेदकस्य वह्नित्वस्य शब्दतः अनुल्लेखात् कोऽपि साध्यतावच्छेदकतावच्छेदकमेव नास्ति, तर्हि साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मविधया साध्यतावच्छेदकतात्वस्य ग्रहणं महानर्थावहम्, देवानांप्रियत्वद्योतक***श्चेति चेत्*** ?

वत्स ! किमधुनैव सुप्तोत्थितः ? येन एतावत् सर्वं सम्यक् श्रुत्वा सहसा अन्तरा एवैतत्प्रश्नः समुपस्थाप्यते । लक्षणप्रदर्शनं यदा कृतं तदैव एतच्छङ्कनीयम्, अस्तु तावत् - शङ्काऽधुना उपन्यस्तेति अधुनैव तन्निवारणं प्रदर्श्यतेऽस्माभिः । शङ्का हि एषा वस्तुतः

सत्या, न हि साध्यतावच्छेदकतायाः अवच्छेदकता कदापि वह्नित्ववृत्तितावैशिष्ट्ये साध्यतावच्छेदकतात्वादौ वा सम्भवति, किन्तु साध्यतावच्छेदकतानिष्ठप्रतियोगितादेः अवच्छेदकता तु साध्यतावच्छेदकतात्वादौ सम्भवत्येव । अतः 'साध्यतावच्छेदकतायाः अवच्छेदकता' - इत्येवं यत्र यत्र निर्दिष्टम्, तत्र तत्र सर्वत्र साध्यतावच्छेदकतासम्बन्ध्यवच्छेदकता इत्यर्थः, ततश्च स्वपर्याप्तधर्मनिरूपितत्वसम्बन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदकता इत्यर्थः बोध्यः। अर्थात् साध्यतावच्छेदकताः यावत्यः वर्तन्ते तावतीषु सर्वासु पर्याप्त्या वर्तमानं यत् प्रकारत्वादिकम्, तस्य = तन्निरूपिता यावच्छेदकता तस्याः पर्याप्त्यधिकरणं यद् भवति तेन अवच्छिन्ना प्रतियोगिता ग्राह्या इत्यर्थः, यावत्साध्यतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वस्य बोध्यः । ततश्च यावत्साध्यतावच्छेदकताविशिष्टावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नत्वस्यापि यावत्साध्यतावच्छेदकतापर्याप्तं यत् प्रकारत्वादिकं तदवच्छेदकतापर्याप्त्यधिकरणं यत् तद्भिन्नेनाऽनवच्छिन्नत्वमित्येवाऽर्थः । एतादृशक्लिष्टोपन्यासप्रयोजनं खलु एतदेव - प्रतियोगित्वस्य विशेषणविधया एतत्परिष्कारो निवेशितः । अभिप्रेतप्रतियोगितायाः एव ग्रहणं स्यात्, तदर्थं निवेशितपरिष्कारे पुनः तत्प्रतियोगितायाः एव प्रवेशे (अर्थाद् यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्ना... इत्यादिरीत्या परिष्कारादरे) तादृशप्रतियोगिता-विशेषणविधया पुनः स एव परिष्कारः निवेशनीयः, अन्यथा अनभिप्रेतप्रतियोगिताग्रहणाऽऽपत्तेः। यदि च पूर्वं परिष्कारमनिवेश्य यावत्साध्यतावच्छेदकतापर्याप्तत्वादिविशेषणेनैव अभिप्रेत-प्रतियोगिताग्रहणमिष्यते तदा तदेव हि विशेषणं साक्षात् प्रतियोगित्वस्यैव योज्यताम्, किमर्थं द्वितीयप्रतियोगितानिवेशः इष्यते ? इति सूक्ष्मधीगम्यमत्रत्यं तत्त्वं पुनः पुनः भावनीयम् ।

तथा च स्वपर्याप्तधर्मनिरूपितत्वसम्बन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदकतापर्याप्त्य-धिकरण... इत्यादिरीत्या लक्षणमत्रानुगन्तव्यम् । मास्तु वा मन्दमतीनां क्लेशः इति एवं लक्षणं बोध्यम् - यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्ना-नवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपि-तत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेद-कताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपका-भावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवम्, यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छे-दकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्ना-

य शो ल ता

नुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवं वा । एवं हि लक्षणाभ्युपगमे नास्त्येव अव्याप्तिः, लक्षणसमन्वयात् । तथा हि -

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता ग्रहीतुमिष्यते । प्रकृते यावत्साध्यतावच्छेदकताविधया महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयमेव प्राप्यते। महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयपर्याप्तं प्रकारत्वं तदेव स्याद् यद् महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि भवेत्, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि भवेत्, एतद्द्वितयातिरिक्तेषु कुत्राऽपि न वर्तेत । तादृशयावत्साध्यतावच्छेदकतापर्याप्तं = महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यताच्छेदकतोभयपर्याप्तं हि तादृशं प्रकारत्वादिकं साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्नं भवेत्, नान्येन केनचिदिति यावत्साध्यतावच्छेदकतापर्याप्तप्रकारत्वादिधर्मनिरूपिताऽवच्छेदकतायाः पर्याप्त्यधिकरणं साध्यत्वावच्छेदकतात्वोभयं साध्यतावच्छेदकतात्वं वा, साध्यतावच्छेदकतात्वस्याऽपि स्वातन्त्र्येण तादृशयावत्साध्यतावच्छेदकतापर्याप्तप्रकारतादेरवच्छेदकतासम्भवात् । अतः साध्यत्वावच्छेदकतात्वोभयभिन्नेन साध्यतावच्छेदकतात्वभिन्नेन चावच्छिन्ना प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणभिन्नावच्छिन्ना एव भवेत्, न तु अनवच्छिन्ना ।

या वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता सा साध्यतावच्छेदकतात्व-वह्नित्ववृत्तितावैशिष्ट्यत्रितयेन, वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वेन, तद्व्यक्तित्वेन वाऽवच्छिन्ना, तत्र वह्नित्ववृत्तितावैशिष्ट्यं वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वं तद्व्यक्तित्वं वा यावत्साध्यतावच्छेदकतापर्याप्तप्रकारतादिधर्मनिरूपितावच्छेदकतायाः अधिकरणविधया नैव धर्तुं शक्यते । तादृशप्रकारतावच्छेदकतायाः तेषु (न्यूनाधिकवृत्तित्वात्तेषाम्) असम्भवात् तादृशवह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयादिभिन्नवह्नित्ववृत्तितावैशिष्ट्यादिना अवच्छिन्ना एव स्यात् । ततः तादृशवह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता

यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते ।

किन्तु या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा एव ग्राह्या, तादृशप्रतियोगितायाः महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि सत्वाद् वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च सत्त्वात् तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यत्वावच्छेदकतात्वोभयेनैव साध्यतावच्छेदकतात्वेनैव वा अवच्छिन्ना, नान्येन केनचित् । साध्यत्वावच्छेदकतात्वोभयं साध्यतावच्छेदकतात्वञ्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मविधया धर्तुं शक्यते एवेति साध्यत्वावच्छेदकतात्वोभयातिरिक्तसर्वधर्मानवच्छिन्ना हि सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्ना स्यादेवेति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितारूपेण तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तव्या, तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वमेव प्राप्यते इति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव सम्भवति, वह्न्यभावीयप्रतियोगितावच्छेदकतायां नैव। महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तितादृशप्रतियोगितायां प्रतियोगितावच्छेदकतात्वोभयातिरिक्तधर्मानवच्छिन्नत्वसत्त्वाद् निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं तु वर्तते एव । किञ्च, महानसीयवह्न्यभावीययावत्प्रतियोगितावच्छेदकतावविधया प्राप्यमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयस्मिन् पर्याप्तप्रकारतादेः प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात्, तदतिरिक्तेनाऽनवच्छिन्नत्वाच्च (प्रतियोगितावच्छेदकतात्वस्य प्रतियोगित्वावच्छेदकतात्वोभयस्मिन् समावेशात्) तादृशयावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणविधया प्रतियोगितावच्छेदकतात्वोभयस्यैव प्राप्तिः, तथा च

य शो ल ता

प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, तदितरेणाऽनवच्छिन्ना हि सा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते एव ।

ततश्च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण (निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नेत्यादिपरिष्कारं परित्यज्य नूतनपरिष्काराभ्युपगन्तृमते) यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीययावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते ।

वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य च सत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽसत्त्वात् तादृशवह्न्यभावीयप्रतियो-

गितावच्छेदकतावृत्ति-प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते ।

ततश्चोक्तलक्षणानुसारेण वह्न्यभावो धर्तुं न शक्यते, केवलमहानसीयवह्न्यभावः एव धर्तव्यः, महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्न स्यादेव अव्याप्तिः।

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्र साध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, साध्यत्वावच्छेदकतात्वोभयातिरिक्तेन न केनाऽप्यवच्छिन्ना, यावत्साध्यतावच्छेदकतापर्याप्तप्रकारत्वादिकमपि साध्यतावच्छेदकतात्वोभयेनैवाऽवच्छिन्नं भवतीति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मविधया साध्यत्वावच्छेदकतात्वोभयं प्राप्यते एव। ततश्च साध्यत्वावच्छेदकतात्वोभयातिरिक्तानवच्छिन्ना हि सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयातिरिक्तधर्मानवच्छिन्ना एव स्यात् । तथा च साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वमेव स्यात् ।

वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्ववृत्तितावि‍शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामपि वर्तते, वह्न्यभावीयप्रतियोगितावच्छेदकतायामपि वर्तते। तत्र वह्नित्ववृत्तितावि‍शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता

वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेन वह्नित्ववृत्तितावैशिष्ट्य-(महानसीयवह्न्यभावीय)प्रतियोगित्वावच्छेदकतात्वत्रितयेन, तद्व्यक्तित्वेन वाऽवच्छिन्ना । तत्र वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वम्, वह्नित्ववृत्तितावैशिष्ट्यं तद्व्यक्तित्वञ्च यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रकारतादेरवच्छेदकविधया न प्राप्यते, यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रकारतादेः महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि सत्त्वाद् वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि च सत्त्वात्, तादृशवह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वादेः महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामवर्तमानत्वाच्च । तादृशमहानसीयवह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रकारत्वादेरवच्छेदकविधया प्रतियोगित्वावच्छेदकतात्वोभयमेव प्राप्यते, वह्नित्ववृत्तितावैशिष्ट्यादिकं नेति यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणप्रतियोगित्वावच्छेदकतात्वोभयभिन्नवह्नित्ववृत्तितावैशिष्ट्यादिना अवच्छिन्ना सा वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण कथं धर्तुं शक्यते ? ततश्च वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य सत्त्वेऽपि यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वाऽसत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशवह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं नैव शक्यते । तादृशप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकः महानसीयवह्न्यभावोऽपि धर्तुं न शक्यते ।

किन्तु या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा प्रतियोगित्वावच्छेदकतात्वोभयभिन्नेन अनवच्छिन्ना, प्रतियोगित्वावच्छेदकत्वोभयधर्मेणैवाऽवच्छिन्ना । प्रतियोगितावच्छेदकतात्वोभयञ्च यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतायाः पर्याप्त्यधिकरणं वर्तते

एव । ततश्च प्रतियोगितावच्छेदकतात्वोभयातिरिक्तधर्मानवच्छिन्ना हि सा वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्ना स्यादेव । तादृशप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं यद् वह्नित्वगतैकत्वरूपं तदवच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वमपि वर्तते ।

ततश्च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्यापि च सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते इति वह्न्यभावः एव ग्राह्यः, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणाऽसमन्वयाभावान्न स्यादेवाऽव्याप्तिः ।

अत्र एतल्लक्षणे यावत्त्वाप्रवेशे यथा अव्याप्तिः भवति तथा प्रदर्श्यते इत्यनुसन्धेयम् । 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकता गृह्यते, तादृशसाध्यतावच्छेदकता पूर्वोक्तरीत्या वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्य-साध्यत्वावच्छेदकतात्वत्रितयेन, तद्व्यक्तित्वेन वाऽवच्छिन्ना । तत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वं महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां न वर्तते इति महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन् वा पर्याप्तप्रकारतादेरवच्छेदकं वह्नित्वनिष्ठसाध्यतावच्छेदकतात्वं न भवेत् । किन्तु वह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्तप्रकारतादेरवच्छेदकं भवेदेव । तथा च वह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्तप्रकारतावच्छेदकधर्मविधया वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वमपि प्राप्यते, यद्वा वह्नित्ववृत्तितावैशिष्ट्य-साध्यत्वावच्छेदकतात्वत्रितयमपि प्राप्यते, यद्वा तद्व्यक्तित्वमपि प्राप्यते । वह्नित्वनिष्ठ-

साध्यतावच्छेदकता न न साध्यतावच्छेदकता इति वह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्तप्रकारत्वाद्यवच्छेदकविधया प्राप्यं वह्नित्ववृत्तितात्वविशिष्टसाध्यतावच्छेदकतात्वम्, साध्यतावच्छेदकतात्ववह्नित्ववृत्तिता-वैशिष्ट्यत्रितयम्, तद्व्यक्तित्वं च साध्यतावच्छेदकतापर्याप्तधर्मप्रकारत्वाद्यवच्छेदकविधयाऽपि प्राप्यमेव । वह्नित्ववृत्तितात्वविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मविधया ग्राह्यवह्नित्ववृत्तितात्वविशिष्टसाध्यतावच्छेदकतात्वादिभिन्नधर्मैरनवच्छिन्ना एव वर्तते इति वह्नित्ववृत्तितात्वविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्ना स्यादेव। तादृशवह्नित्ववृत्तितात्वविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वं स्यादेव ।

वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां भवेदेव । वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता च प्रतियोगित्वावच्छेदकतात्वोभयभिन्नधर्मेणाऽनवच्छिन्ना, प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात् तादृशप्रतियोगितायाः । प्रतियोगितावच्छेदकतात्वोभयञ्च यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रकारत्वादिधर्मस्य स्वातन्त्र्येण अवच्छेदकमिति यावत्प्रतियोगिंतावच्छेदकतापर्याप्तप्रकारत्वादिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मविधया प्रतियोगित्वावच्छेदकतात्वोभयं गृह्यते एव । प्रतियोगितावच्छेदकतात्वोभयभिन्नानवच्छिन्ना हि सा वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्ना भवेदेव । निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण तु सा वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव ।

तथा च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य यावत्प्रतियोगितावच्छेदकता-

पर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य च सत्त्वात् साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव । तथा च वह्न्यभावः ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेव अव्याप्तिः ।

या शो ला ता

एषा हि अव्याप्तिः एकत्र यावत्प्रवेशं निराकृत्य 'साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं 'साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिनिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयाऽवच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणाभ्युपगमे दर्शिता ।

यदि 'यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रति-

योगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपगम्यते तदा नोक्ताऽव्याप्तिः, यतः वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठ-प्रतियोगिता वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्य-साध्यत्वा-वच्छेदकतात्वत्रितयेन तद्व्यक्तित्वेन वा अवच्छिन्ना, एतत्त्रितयमपि वह्नित्ववृत्तितावैशिष्टसाध्यता-वच्छेदकतापर्याप्तप्रकारत्वादिधर्मावच्छेदकं भवति, किन्तु महानसीयत्वनिष्ठसाध्यतावच्छेदकता -वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन् पर्याप्तप्रकारत्वादेरवच्छेदकं न भवति, वह्नित्ववृत्तिता-वैशिष्ट्यादेः महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामवर्तमानत्वात् ।

तथा च साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मविधया वह्नित्व-वृत्तितावैशिष्टसाध्यतावच्छेदकतात्वस्य, वह्नित्ववृत्तितावैशिष्ट्य-साध्यत्वावच्छेदकतात्वत्रितयस्य, तद्व्यक्तित्वस्य च ग्रहणसम्भवेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्य-धिकरणधर्मविधया वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतात्वं वह्नित्ववृत्तितावैशिष्ट्यं तद्व्यक्तित्वं वा धर्तुं नैव शक्यते । यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरण-धर्मविधया साध्यत्वावच्छेदकतात्वोभयमेव धर्तुं शक्यते । साध्यतावच्छेदकतात्वोभयञ्च यावत्साध्यतावच्छेदकतावृत्ति इति यावत्साध्यतावच्छेदकतापर्याप्तप्रकारत्वादेः अवच्छेदकं स्यादेव। वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्म-निरूपितावच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयावच्छिन्ना, तदतिरिक्तेन वह्नित्व-वृत्तितावैशिष्ट्यादिनाऽपि अवच्छिन्ना इति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकता-पर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं नैव शक्यते । या प्रतियोगिता केवलसाध्यतावच्छेदकतात्वेन साध्यत्वावच्छेदकतात्वोभयेनैव वा अवच्छिन्ना, तदतिरिक्तेन न केनाऽपि अवच्छिन्ना सैव यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरण-धर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते । साध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, तदतिरिक्तेन न केनाऽप्यवच्छिन्ना इति यावत्साध्यता-वच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते। तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकता-पर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि

महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् ।

वह्न्यभावीयप्रतियोगितावच्छेदकतायां तु वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता एव वर्तते, महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता नैव वर्तते । अतः वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां तादृशप्रतियोगितायाः प्रतियोगितावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात्, तादृशोभयातिरिक्तसर्वधर्मानवच्छिन्नत्वात्, तादृशोभयस्य प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वाच्च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य च सत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽसत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितावच्छेदकतानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते ।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात्, तदतिरिक्तेनाऽनवच्छिन्नत्वात्, प्रतियोगितावच्छेदकतात्वोभयस्य प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वाच्च तादृशप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्म-

निरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य सत्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपिताऽवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्माऽनवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्न-प्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते । तथा च महानसीयवह्न्यभावः एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोर-वृत्तितया लक्षणसमन्वयात् कुतो भवताम् अव्याप्तिशङ्काऽपि समुल्लसति ?

किन्तु उक्तलक्षणाऽभ्युपगमे 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिः दुर्वारा एव, यतः प्रकृते यावत्साध्यतावच्छेदकतापर्याप्तप्रकारत्वादिधर्मावच्छेदकतापर्याप्त्यधिकरणविधया साध्यतावच्छेदकतात्वम्, साध्यत्वावच्छेदकतात्वोभयं तद्व्यक्तित्वं वा एव प्राप्यते इति या प्रतियोगिता साध्यतावच्छेदकतात्वेन साध्यतावच्छेदकतात्वोभयेन तद्व्यक्तित्वेन वा अवच्छिन्ना भवेत्, एतदतिरिक्तेन न केनाऽप्यवच्छिन्ना भवेत्, सा प्रतियोगिता एव यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते । या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सैव साध्यत्वावच्छेदकतात्वोभयेनैव अवच्छिन्ना, तदतिरिक्तेन चानवच्छिन्ना भवेत् । अतः यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते । साध्यतावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वेन साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्याऽप्राप्तेः वह्नित्वगतैकत्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वं नैव भवेत्, वह्नित्वगतैकत्वमेव भवेत् ।

वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्ववृत्तिताविशिष्ट-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते । वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतात्वेन वह्नित्ववृत्तितावैशिष्ट्य-प्रतियोगितावच्छेदकतात्वत्रितयेन तद्व्यक्ति-त्वेन वा अवच्छिन्ना । वह्नित्ववृत्तिमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रकारत्वादि-कमपि वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेन वह्नित्ववृत्तिता-वैशिष्ट्य-प्रतियोगित्वावच्छेदकतात्वत्रितयेन तद्व्यक्तित्वेन वा एव अवच्छिन्नम् इति वह्नित्ववृत्तिता-विशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरण-धर्मविधया वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वमपि धर्तुं शक्यते, वह्नित्ववृत्तिताविशिष्टत्व-प्रतियोगितावच्छेदकतात्वत्रितयमपि, तद्व्यक्तित्वमपि च धर्तुं शक्यते इति । वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितावच्छेदक-धर्मविधया ग्राह्योक्तधर्मत्रितयमपि प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्य-धिकरणं भवत्येव, वह्नित्ववृत्तिताविशिष्टप्रतियोगितावच्छेदकतायाः प्रतियोगितावच्छेदकतातोऽ-नतिरेकात्, वह्नित्ववृत्तिताविशिष्टप्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्य-धिकरणधर्मस्य प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वाऽवश्य-म्भावात् ।

तथा च वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेनैव, वह्नित्व-वृत्तितावैशिष्ट्य-प्रतियोगितावच्छेदकतात्वत्रितयेनैव, तद्व्यक्तित्वेनैव वाऽवच्छिन्ना, तदतिरिक्तेनाऽ-नवच्छिन्ना सा वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्माभिन्नधर्मानवच्छिन्ना स्यादेव। तथा च महानसीयवह्न्यभावीयवह्नित्ववृत्तिताविशिष्टप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्माभिन्नधर्मानवच्छिन्नप्रति-योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-त्वस्य प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्माभिन्नधर्मानवच्छिन्न-त्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्म-भिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयो-

गितानिरूपकपर्याप्तीयप्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्म-भिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीयवह्न्यभावः धर्तुं शक्यः भवेत् । तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः खलु ।

अतः एतदव्याप्तिनिराकरणाय उभयत्र यावत्पदनिवेशमादृत्य 'यावत्साध्यतावच्छेदकता-पर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्म-निरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रति-योगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः'- इत्येवं लक्षणमभ्युपगन्तव्यम्, तथा च नोक्ताऽ-व्याप्तिः, यतः वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्य-प्रतियोगितावच्छेदकतात्वत्रितयेन, तद्व्यक्तित्वेन वा अवच्छिन्ना । वह्नित्ववृत्तितावैशिष्टमहानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतात्वादिधर्मत्रिकं प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणं भवेत्, किन्तु यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकता-पर्याप्त्यधिकरणं नैव भवेत्, तादृशधर्मत्रिकस्य महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-यामवर्तमानत्वात् कथं हि तन्निष्ठप्रकारत्वादेरवच्छेदकं भवेंत् ? प्रतियोगितावच्छेदकतात्वो-भयमेव यावत्प्रतियोगितावच्छेदकतावृत्ति इति यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मविधया प्रतियोगितावच्छेदकतात्वोभयमेव प्राप्यते ।

ततश्च या प्रतियोगिता प्रतियोगितावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, तादृशोभयधर्मातिरिक्तेन अनवच्छिन्ना सैव यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्न-धर्मानवच्छिन्ना भवेत् । वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगिता न केवलप्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, किन्तु तदतिरिक्तेन वह्नित्व-वृत्तितावैशिष्ट्यादिनाऽपि अवच्छिन्ना इति यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशवह्नित्ववृत्तितावैशिष्ट-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैव धर्तुं शक्यते । तादृशमहानसीय-

वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात् तदतिरिक्तेनाऽनवच्छिन्नत्वाच्च यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, किन्तु तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं नास्ति, तादृशप्रतियोगितायां महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्यैव सत्त्वात् । तथा च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावरूपेण महानसीयवह्न्यभावो धर्तुं नैव शक्यते।

वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीत्वस्य सत्त्वात्, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः प्रतियोगितावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन, प्रतियोगितावच्छेदकतात्वोभयस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वेन च यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य सत्त्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति वह्न्यभावः ग्राह्यः एव, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येव अव्याप्त्याशङ्काऽपि ? इति उभयत्र यावत्पदनिवेशः सार्थकः इति स्थितम् ।

नन्वस्तु यावत्पदसार्थक्यम्, किन्तु पर्याप्तत्वनिवेशः सर्वथाऽयोग्यः, उभयत्र तन्निवेशं

तिरस्कृत्य 'यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं 'यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणाभ्युपगमेऽपि नास्त्येव कुत्राऽप्यव्याप्तिः । तथा हि -

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावि शिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावि शिष्टसाध्यतावच्छेदकतात्वेन, वह्नित्ववृत्तितावैशिष्ट्य-साध्यत्वावच्छेदकतात्वत्रितयेन, तद्व्यक्तित्वेन वा अवच्छिन्ना, एतत्त्रितयमपि वह्नित्ववृत्तितावि शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता-प्रकारत्वादिधर्मावच्छेदकं भवेत्, किन्तु यावत्साध्यतावच्छेदकतावृत्तिप्रकारत्वादिधर्मावच्छेदकं नैव भवेत्, न हि वह्नित्ववृत्तिसाध्यतावच्छेदकतामात्रवृत्तिप्रकारत्वादिकं यावत्साध्यतावच्छेदकतावृत्तिधर्मविधया धर्तुं शक्यते, यावत्साध्यतावच्छेदकताविधया महानसीयत्वनिष्ठसाध्यतावच्छेदकतायाः अपि प्राप्तेः इति महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च वर्तमानं प्रकारत्वादिकमेव यावत्साध्यतावच्छेदकतावृत्तिप्रकारत्वादिधर्मरूपेण गृह्यते, उक्तवह्नित्ववृत्तितावि शिष्टसाध्यतावच्छेदकतात्वादिरूपधर्मत्रितयं तु वह्नित्ववृत्तिसाध्यतावच्छेदकतायामेव वर्तते, महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां नैव वर्तते इति कथं महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तमानप्रकारत्वादेः तादृशधर्मत्रितयम् अवच्छेदकं भवेत् ? अतः यो धर्मः यावत्साध्यतावच्छेदकतायां वर्तमानः भवेत् स एव यावत्साध्यतावच्छेदकतावृत्तिधर्मावच्छेदको भवेत्, अर्थाद् यावत्साध्यतावच्छेदकतावृत्तिसाध्यतावच्छेदकतात्वोभयमेव यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणं भवेत् । ततश्च या प्रतियोगिता साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, तदितरेणानवच्छिन्ना च सैव प्रतियोगिता यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते एव,

य शो ल ता

या वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता तस्याः साध्यत्वावच्छेदकतात्वोभयातिरिक्तवह्नित्ववृत्तितावैशिष्ट्यादिना अवच्छिन्नत्वात् तादृशवह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं नैव शक्यते । या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना इति साध्यत्वावच्छेदकतात्वोभयातिरिक्तानवच्छिन्ना सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते एव । तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव सत्त्वाद् वह्न्यभावीयप्रतियोगितावच्छेदकतायामसत्त्वाच्च तादृशाभावद्वयनिरूपितप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां प्रतियोगितावच्छेदकतात्वोभयातिरिक्ताऽनवच्छिन्नत्वेन प्रतियोगितावच्छेदकतात्वोभयस्य यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वेन च यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य च सत्त्वेऽपि यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैवेति महानसीयवह्न्यभावः

एव ग्राह्यः, न वह्न्यभावः, ततश्च महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः ?

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रापि महानसीयवह्न्यभावमादायाऽव्याप्तिः नैव भवेत्, यतः यावत्साध्यतावच्छेदकतावृत्तिप्रकारत्वादिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणविधया साध्यत्वावच्छेदकतात्वोभयमेव प्राप्यते, साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना तदतिरिक्तेनाऽनवच्छिन्ना च या प्रतियोगिता सा साध्यतावच्छेदकतानिष्ठा इति सैव यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण गृह्यते । तादृशसाध्यतावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वेन तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वमेव प्राप्यते । वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितारूपेण वह्नित्ववृत्तित्वविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतारूपेण च धर्तुं शक्यते एव । तत्र वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेन वह्नित्ववृत्तितावैशिष्ट्य-प्रतियोगितावच्छेदकतात्वत्रितयेन तद्व्यक्तित्वेन वा अवच्छिन्ना । एतद्धर्मत्रितयमपि यावत्प्रतियोगितावच्छेदकतासु नैव वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामेव वर्तते, तत्कथं महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रकारत्वादिधर्मावच्छेदकं भवेत्? तादृशधर्मत्रितयं वह्नित्ववृत्तिप्रतियोगितावच्छेदकतावृत्तिप्रकारत्वादेरवच्छेदकं भवेत्, किन्तु वह्नित्ववृत्तिप्रतियोगितावच्छेदकतामात्रवृत्तिप्रकारत्वादिकं यावत्प्रतियोगितावच्छेदकतावृत्ति कथं कथ्यते ? तथा च यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगित्वावच्छेदकतात्वोभयमेव यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणं भवेत् । तादृशप्रतियोगितावच्छेदकतात्वोभयातिरिक्तधर्मानवच्छिन्नप्रतियोगितारूपेण यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तव्या, तथा च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगतावच्छेदकतावृत्तिप्रतियोगिता नैव।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं नास्ति ।

तथा च वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं वर्तते, किन्तु यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वं न वर्तते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाञ्च यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वं वर्तते, किन्तु यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं नास्ति, महानसीयत्वनिष्ठमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायान्तु यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वमपि नास्ति, यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वमपि नास्ति, तत्कथं यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावः धर्तुं शक्यः भवेत् ?

वह्न्यभावीयप्रतियोगितावच्छदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, तादृशप्रतियोगितायाः प्रतियोगित्वावच्छेदकतात्वोभयातिरिक्तधर्मेणाऽनवच्छिन्नत्वेन, प्रतियोगितावच्छेदकतात्वोभयस्य यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वेन च यावत्प्रतियोगिता-

वच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव । ततश्च वह्न्यभाव एव धर्तव्यः, महानसीयवह्न्यभावः धर्तुं नैव शक्यः भवेत् । वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयात् कुतः स्याद् अव्याप्तिः ? एवं पर्याप्तत्वाऽनिवेशेऽपि सर्वत्र लक्षणसमन्वयान्निरर्थकं गौरवग्रस्तमेव च तादृशपदोपादान***मिति चेत् ?***

न, अव्याप्तितादवस्थ्यात् । 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादायाऽव्याप्त्यसम्भवेऽपि तार्णमहानसीयवह्न्यभावमादायाऽव्याप्तिः दुर्वारा एव, तथा हि - तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतैतत्त्रितयवृत्तिप्रकारता तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयत्वेनैवाऽवच्छिन्ना, नान्येन केनचित् । इयञ्च तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रकारता यावत्साध्यतावच्छेदकतावृत्तिः भवत्येव, महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च तादृशप्रकारतायाः सत्त्वात्, एतदतिरिक्तसाध्यतावच्छेदकतायाः असत्त्वाच्च । तथा च तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रकारता यावत्साध्यतावच्छेदकतावृत्तिधर्मविधया धर्तुं शक्यते एव । अतः तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रकारतानिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मविधया प्राप्यमाणं तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयत्वं यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मविधयाऽपि प्राप्यते एव ।

तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यता-

वच्छेदकतात्रितयवृत्तिप्रतियोगिता तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयत्वेनैवाऽवच्छिन्ना, नान्येन केनचित् । तादृशत्रितयत्वञ्च यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणम् । तथा च तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयत्वेनैवाऽवच्छिन्ना, तदतिरिक्तेनाऽनवच्छिन्ना सा तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्ना भवत्येव। तादृशप्रतियोगिताश्रयतार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयस्य तार्णत्व-महानसीयत्व-वह्नित्वेषु एव पर्याप्तत्वात् तादृशतार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वं भवतीति यावत्साध्यतावच्छेदकतावृत्तिप्रकारत्वादिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वं स्यादेव ।

तादृशतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां भवेदेव, तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः अपि तार्णत्व-महानसीयत्व-वह्नित्वत्रितयस्मिन्नेव वर्तमानत्वात्पर्याप्त्या। तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, नान्येन केनचित् । प्रतियोगित्वावच्छेदकतात्वोभयञ्च तार्णत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि च वर्तते । अतः यावत्प्रतियोगितावच्छेदकतावृत्तिप्रकारत्वादिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणं प्रतियोगितावच्छेदकतात्वोभयमिति तादृशप्रतियोगित्वावच्छेदकतात्वोभयेनैवावच्छिन्ना, तदन्येन केनचिदपि अनवच्छिन्ना तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतावृत्तिप्रकारत्वादिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्ना स्यादेव ।

तथा च तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगतारूपेण च तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एवेति तादृशतार्णमहानसीयवह्न्यभावोऽपि धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रापि महानसीयवह्न्यभावमादाय अव्याप्तिः दुर्वारा एव, यतः महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रकारता यावत्साध्यतावच्छेदकतावृत्तिधर्मविधया धर्तुं शक्यते, यावत्साध्यतावच्छेदकताविधया ग्राह्य-वह्नित्वनिष्ठसाध्यतावच्छेदकतायां तादृशप्रकारतायाः वर्तमानत्वात्। तादृशमहानसीयत्वनिष्ठ-प्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रकारतायाः अवच्छेदकं महानसीयत्व-निष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयत्वमेव भवेत् । ततश्च तादृश-महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रकारतानिरूपिता-वच्छेदकतापर्याप्त्यधिकरणं महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदक-तोभयत्वं यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मविधयाऽपि धर्तुं शक्यते एव । महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्ति-

प्रतियोगिताऽपि महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयत्वेनैव यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणविधया ग्राह्येण अवच्छिन्ना, नान्येन केनचिदिति महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभय-वृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मा-नवच्छिन्ना स्यादेव । तादृशप्रतियोगिताश्रयमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठ-साध्यतावच्छेदकतोभयस्य महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वात् तादृशमहानसीयत्वनिष्ठ-प्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयो-गितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तिरिति यावत्साध्यतावच्छेदकता-वृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् ।

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता तस्याः पर्याप्तिसम्बन्धेन महानसीयत्व-वह्नित्वोभयस्मिन् वर्तमानत्वात् तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वर्तते एव । सा च प्रतियोगिता प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽच्छिन्ना, नान्येन केनचित्, प्रतियोगितावच्छेदकतात्वोभयञ्च यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणं भवत्येव । अतः महान-सीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरू-पितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य, यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छे-दकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽ-निरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरण-धर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्व-

य शो ल ता

रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकता-पर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीयवह्न्यभावोऽपि ग्राह्यः, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः । पर्याप्तत्वाऽनिवेशे एतदव्याप्तिद्वितयं दुर्वारमेव ।

यदि एकत्र पर्याप्तत्वं निवेश्य 'यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकता-पर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानु-योगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छे-दकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकता-निरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं 'यावत्साध्यतावच्छेदकता-पर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगिता-निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणमभ्युपगम्यते तदा उक्तरीत्याऽ-व्याप्तिः न सम्भवति, यतः तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रकारता यावत्साध्यतावच्छेदकतावृत्तिधर्मविधया धर्तुं शक्यते, किन्तु यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया धर्तुं नैव शक्यते, महानसीयत्वनिष्ठ-साध्यतावच्छेदकतायाम् अपि, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च वर्तमानत्वेन तादृश-प्रकारतायाः यावत्साध्यतावच्छेदकतावृत्तित्वसम्भवेऽपि साध्यतावच्छेदकताऽतिरिक्ततार्णत्वनिष्ठ-प्रतियोगितावच्छेदकतायामपि तादृशप्रकारतायाः वर्तमानत्वेन यावत्साध्यतावच्छेदकतापर्याप्तत्वाऽ-सम्भवात् । तथा च यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया उभयसाध्यतावच्छेदकतायां वर्तमानं तदितरस्मिन् अवर्तमानमर्थात् तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यता-वच्छेदकतोभयवृत्तिप्रकारता एव धर्तुं शक्यते । तादृशप्रकारतावच्छेदकं तार्णत्वनिष्ठप्रतियोगिता-वच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयत्वं नैव भवति, किन्तु साध्यत्वावच्छेदकतात्वोभयमेव भवति, अतः तादृशयावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणधर्मविधया तादृशत्रितयत्वं नैव प्राप्यते, किन्तु साध्यतावच्छेदकतात्वो-

भयमेव प्राप्यते ।

तथा च या प्रतियोगिता साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना भवेत्, तदतिरिक्तेन अनवच्छिन्ना भवेत् सैव यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरण-धर्मभिन्नधर्मानवच्छिन्ना स्यात् । या तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यता-वच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगिता सा साध्यत्वावच्छेदकतात्वो-भयातिरिक्ततादृशत्रितयत्वेनावच्छिन्ना इति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकता-पर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महान-सीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगिता धर्तुं न शक्यते। किन्तु या साध्यतावच्छेदकतानिष्ठप्रतियोगिता तस्याः साध्यत्वावच्छेदकतात्वोभयाति-रिक्तेनाऽनवच्छिन्नत्वात् तादृशसाध्यतांवच्छेदकतानिष्ठप्रतियोगिता एव यावत्साध्यतावच्छेदकता-पर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते। तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व -वह्नित्वगतद्वित्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरण-धर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि महानसीयत्व-वह्नित्वगत-द्वित्वमेव स्यात् । महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव भवेत्, तार्णमहानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतायां नैव भवेत् । तथा च तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगितायां महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाञ्च प्रतियोगितावच्छेदकतात्वोभयभिन्नाऽनवच्छिन्नत्वसत्त्वात् प्रतियोगितावच्छेदकतात्वोभयस्य यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वाच्च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽ-निरूपितत्वस्य यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मा-नवच्छिन्नत्वस्य च सत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरण-धर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्व-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगितायामेव सत्त्वात्, तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता-

यामसत्त्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, न तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता इति महानसीयवह्न्यभावः एव ग्राह्यः, न तार्णमहानसीयवह्न्यभावः, महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्न स्यादेव अव्याप्तिः ।

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयवह्न्यभावमादाय अपि अव्याप्तिः न भवेत्, यतः महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रकारतायाः यावत्साध्यतावच्छेदकतावृत्तिधर्मविधया ग्रहीतुं शक्यत्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधयाऽग्राह्यत्वमेव, यावत्साध्यतावच्छेदकतारूपेण ग्राह्यवह्नित्वनिष्ठसाध्यतावच्छेदकतायां तादृशमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितायाः वर्तमानत्वेन यावत्साध्यतावच्छेदकतावृत्तित्वस्य तादृशप्रतियोगितायां सम्भवेऽपि तादृशप्रतियोगितायाः यावत्साध्यतावच्छेदकताभिन्नमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तमानत्वेन यावत्साध्यतावच्छेदकतापर्याप्तत्वस्याऽसम्भवात् । तथा च यः धर्मः वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव भवेत्, तदितरेषु न कुत्रापि भवेत् स एव यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया ग्रहीतुं शक्यते, अर्थात् तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रकारता एव यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया ग्राह्या । तादृशप्रकारता च साध्यतावच्छेदकतात्वोभयेन तद्व्यक्तित्वेन वा अवच्छिन्ना इति या प्रतियोगिता साध्यतावच्छेदकतात्वोभयेन तद्व्यक्तित्वेन एव वाऽवच्छिन्ना भवेत्, तदितरेणाऽवच्छिन्ना नैव भवेत् सैव यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्ना भवेत् ।

या महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्ति-प्रतियोगिता सा महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयत्वेना-ऽवच्छिन्ना, एतदुभयत्वञ्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरण-धर्मविधया नैव प्राप्यते इति तादृशोभयत्वेनावच्छिन्ना सा महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता -वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं नैव शक्यते । तथा च या साध्यतावच्छेदकतानिष्ठा साध्यत्वावच्छेदकतात्वोभयेन तद्व्यक्तित्वेन वाऽवच्छिन्ना, तदतिरिक्तेन न केनाऽप्यवच्छिन्ना प्रतियोगिता सैव यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकता-पर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, साध्यतावच्छेदकतात्वोभयस्य तद्व्यक्तित्वस्य च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वात् । तादृशसाध्यतावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वेन तन्निष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव स्यात् ।

वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः वह्न्यभावीयप्रति-योगितावच्छेदकतायामेव सम्भवः, न तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाम् । तथा च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः वह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगितायाश्च प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात्, तादृशप्रतियोगि-त्वावच्छेदकतात्वोभयस्य च यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगित्व-प्रकारत्वादिधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणत्वाच्च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यावत्प्रति-योगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य च महान-सीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगितायां च सत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्य-धिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छि-न्नानुयोगितानिरूपकपर्याप्तीयत्वस्य महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता-

यामसम्भवात्, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामेव सम्भवाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, न महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता, अतः वह्न्यभावः एव धर्तुं शक्यते, न महानसीयवह्न्यभावः। वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येव अव्याप्तिः ।

तथापि एकत्रैव पर्याप्तत्वनिवेशे = यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्म... इत्यादिस्थाने यावत्प्रतियोगितावच्छेदकतावृत्तिधर्म... इत्यादेः प्रवेशे 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादाय अव्याप्तिः दुर्वारा एव स्यात् । तथा हि - पूर्वोक्तरीत्या यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता एव गृह्यते इति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्। यद्यपि महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां न सम्भवति, तथापि महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयस्य महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वाद् महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयस्मिन् महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता स्यादेव । तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयत्वेनैवाऽवच्छिन्ना, नान्येन केनचित् ।

महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रकारतायाः यावत्प्रतियोगितावच्छेदकताविधया प्राप्यवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां वर्तमानत्वाद् यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मविधया सा गृह्यते । तादृशप्रकारतायाः अवच्छेदकं महानसीयत्व-निष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयत्वमेव भवेदिति तादृशोभयत्वं यावत्प्रतियोगितावच्छेदकतावृत्तितादृशप्रकारत्वधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मविधया गृह्यते । अतः तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभय-वृत्तिप्रतियोगितायाः तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकत्वो-भयत्वेनैव यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणीभूतेनाऽ-वच्छिन्नत्वात्, तदतिरिक्तेन केनाऽप्यनवच्छिन्नत्वाच्च यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयत्वनिष्ठसाध्यता-वच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता धर्तुं शक्यते । तादृशप्रतियोगितायां महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वन्तु अस्त्येव ।

इत्थञ्च तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकता-वृत्तिप्रतियोगितायां यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्न-धर्मानवच्छिन्नत्वस्य यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्न-धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्ना-नुयोगितानिरूपकपर्याप्तीयत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकता-पर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व -वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशमहानसीयत्वनिष्ठसाध्यता-वच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता धर्तुं शक्यते । तादृशप्रतियोगिता-श्रयवह्नित्वनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वस्य वह्न्यभावीयप्रतियोगितायां सत्त्वाद् वह्न्य-भावः गृह्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एतदव्याप्तिनिवारणाय यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधि-करणधर्मभिन्नधर्मानवच्छिन्नत्वं निवेश्य = उभयत्र पर्याप्तत्वप्रवेशमादृत्य 'यावत्साध्यतावच्छेदकता-

पर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकता*पर्याप्त*धर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपगन्तव्यम् । तथा च न स्यादेवोक्तरीत्याऽव्याप्तिः, यतः महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रकारता यावत्प्रतियोगितावच्छेदकतारूपेण ग्राह्यवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां वर्तमानत्वेन यावत्प्रतियोगितावच्छेदकतावृत्तिधर्मरूपेण धर्तुं शक्यते। किन्तु तादृशप्रकारतायाः वह्नित्वनिष्ठप्रतियोगितावच्छेदकताभिन्नमहानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वर्तमानत्वेन वह्नित्वनिष्ठप्रतियोगितावच्छेदकतापर्याप्तत्वं तादृशप्रकारतायां न सम्भवतीति यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मविधया महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रकारता न गृह्यते, किन्तु या प्रकारता केवलवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामेव वर्तमाना भवेत्, तदतिरिक्तेषु न कुत्रापि वर्तमाना भवेत् सैव प्रकारता यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मविधया गृह्यते ।

अर्थाद् वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रकारता एव यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मविधया धर्तुं शक्यते, तादृशप्रकारतायाः वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामेव सत्त्वात्, अन्यत्र असत्त्वाच्च । तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रकारतावच्छेदकविधया प्रतियोगित्वावच्छेदकतात्वोभयमेव, तद्व्यक्तित्वमेव वा लभ्यते । तथा च या प्रतियोगिता प्रतियोगितावच्छेदकतात्वोभयेन तद्व्यक्तित्वेन वाऽवच्छिन्ना भवेत्, तदतिरिक्तेन अनवच्छिन्ना भवेत् सैव प्रतियोगिता यावत्प्रतियोगितावच्छेदकतावृत्तिप्रकारतादिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते । महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयत्वेनैवाऽवच्छिन्ना, नान्येन केनचिदिति तादृशोभयत्वस्य यावत्प्रतियोगितावच्छेदकतावृत्तिप्रकारत्वादिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वाऽसम्भवात्तेनावच्छिन्ना सा महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते। किन्तु या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-

प्रतियोगिता तस्याः प्रतियोगित्वावच्छेदकतात्वोभयनैवाऽवच्छिन्नत्वात् तदतिरिक्तेनाऽनवच्छिन्नत्वाच्च यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्न-प्रतियोगितारूपेण तादृशप्रतियोगिता धर्तुं शक्यते ।

तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वह्नित्वगतैकत्वावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयत्वमेव विद्यते, महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं नैव विद्यते । 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र पूर्वोक्तरीत्या यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्य-धिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्व-गतद्वित्वमेव विद्यते । तथा च महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगिता-वच्छेदकतोभयवृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्य-धिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगत-द्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य सत्त्वेऽपि यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्म-निरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्याऽसत्त्वात् तादृशवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाञ्च यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य सत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्म-निरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्यासत्त्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगिता-निरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्न-धर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया वह्न्यभावः धर्तुं नैव शक्यते ।

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता तस्याः पर्याप्तिसम्बन्धेन महानसीयत्व -वह्नित्वोभयस्मिन्नेव वर्तमानत्वात् तादृशप्रतियोगितावच्छेदकतायां महानसीयत्व-वह्नित्वगतद्वित्वा-वच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वर्तते, तादृशप्रतियोगिता च प्रतियोगितावच्छेदक-

तात्वोभयधर्मेणैव अवच्छिन्ना, तदतिरिक्तेन न केनाऽपि अवच्छिन्ना, प्रतियोगितावच्छेदकतात्वोभयस्य च महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि च वर्तमानत्वाद् यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रकारत्वादेरवच्छेदकविधया तादृशोभयधर्मौ गृह्येते एव । तथा च प्रतियोगितावच्छेदकतात्वोभयभिन्नेनाऽनवच्छिन्ना सा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्ना स्यादेव । अतः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते। ततश्च महानसीयवह्न्यभावः एव ग्राह्यः। तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तिताऽभावाल्लक्षणसमन्वयात् कुतोऽव्याप्त्याशङ्काऽपि ? एवमुभयत्र पर्याप्तत्वनिवेशः आवश्यकः।

य शो ल ता

ननु अस्तु पर्याप्तत्वनिवेशः, किन्तु पर्याप्त्यधिकरणनिवेशः किमर्थम् ? प्रयोजनाऽभावात्। उभयत्र तन्निवेशं परिहृत्य 'यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं 'यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणाङ्गीकारे नास्त्येव काचिदपि आपत्तिः । तथा हि -

'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्व-निष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रकारता पूर्वोक्तरीत्या यावत्साध्यतावच्छेदकतायां वर्तमानत्वेन यावत्साध्यतावच्छेदकतावृत्तिः भवति, किन्तु साध्यतावच्छेदकताभिन्नेषु अवर्तमानत्वाऽभावाद् यावत्साध्यतावच्छेदकतापर्याप्ता न भवति । अतः यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रकारता न गृह्यते, किन्तु वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव वर्तमाना प्रकारता धर्तव्या, तादृशप्रकारतायाः यावत्साध्यतावच्छेदकतायां वर्तमानत्वात्, तदतिरिक्तेषु अवर्तमानत्वाच्च यावत्साध्यतावच्छेदकता-पर्याप्तत्वं भवति। तादृशप्रकारतावच्छेदकधर्मविधया साध्यत्वावच्छेदकतात्वोभयमेव, तद्व्यक्तित्वमेव वा प्राप्यते । वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता साध्यत्वावच्छेदकतात्वोभयेनैव तद्व्यक्तित्वेनैव वा अवच्छिन्ना, तदतिरिक्तेन न केनाऽप्यवच्छिन्ना इति वह्नित्ववृत्तिसाध्यता-वच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकसाध्यत्वावच्छेदकतात्वो-भयाद्यतिरिक्तधर्मानवच्छिन्ना एव भवति । तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव भवति, न महानसीयत्व-वह्नित्वगतद्वित्वमिति-यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकरूपमपि वह्नित्वगतैकत्वमेव भवेत्, महानसीयत्व-वह्नित्वगतद्वित्वं कथं भवेत् ?

वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामपि भवेत्, वह्न्यभावीयप्रतियोगितावच्छेदकता-यामपि भवेत् । वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वावच्छेदकतात्व-वह्नित्ववृत्तितावैशिष्ट्यत्रितयेनावच्छिन्ना भवति, तद्व्यक्तित्वेन वा। अत्र यावत्प्रतियोगितावच्छेदकताविधया महानसीयत्वनिष्ठप्रतियोगितावच्छेदकताऽपि प्राप्यते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकताऽपि प्राप्यते । यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मविधया एतादृशप्रतियोगितावच्छेदकतोभयस्मिन्नपि वर्तमाना, तदतिरिक्तेषु अवर्तमाना च प्रकारता गृह्यते। तादृशप्रकारता प्रतियोगित्वावच्छेदकतात्वोभयनैवाऽवच्छिन्ना भवेत्, तदतिरिक्तेन न केनाऽप्यवच्छिन्ना भवेत् । अतः यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकविधया प्रतियोगित्वा-वच्छेदकतात्वोभयं प्राप्यते । वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता-वृत्तिप्रतियोगिता तादृशप्रतियोगित्वावच्छेदकतात्वोभयेनाऽवच्छिन्ना वर्तते एव, किन्तु तदतिरिक्तेन

वह्नित्ववृत्तितावैशिष्ट्यादिना यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नेनाऽपि अवच्छिन्ना, न हि महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामवर्तमानं वह्नित्ववृत्तितावैशिष्ट्यादिकं महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रकारत्वादेरवच्छेदकं भवितुमर्हति। तथा च तादृशवह्नित्ववृत्तितावैशिष्ट्यादिना अवच्छिन्ना वह्नित्ववृत्तितावैशिष्ट्यादिना अवच्छिन्ना वह्नित्ववृत्तितावैशिष्ट्यविशिष्ट-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्त-धर्मावच्छेदकभिन्नधर्मानवच्छिन्ना नैव भवेत् ।

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा प्रतियोगित्वावच्छेदकतात्वोभयेनैव अवच्छिन्ना, नान्येन केनचित् । प्रतियोगित्वावच्छेदकतात्वोभयञ्च पूर्वोक्तरीत्या यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकमिति प्रतियोगित्वावच्छेदकतात्वोभयभिन्नेनानवच्छिन्ना सा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्त-धर्मावच्छेदकभिन्नधर्मानवच्छिन्ना स्यादेव । किन्तु तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदक-तायाः महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तत्वात् तादृशमहानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतायां महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता एव सम्भवति, वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता नास्ति महानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतायाम्, यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेवाऽस्ति, न महानसीयत्व-वह्नित्वगतद्वित्वम् ।

तथा च वह्नित्ववृत्तितावैशिष्ट्यविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य सत्त्वेऽपि यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वं न सम्भवति, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वमपि न सम्भवति, तादृशप्रतियोगितायाः प्रतियोगित्वावच्छेदकतात्वोभयातिरिक्त-वह्नित्ववृत्तितावैशिष्ट्येनाऽप्यवच्छिन्नत्वात् । महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगितायाञ्च यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वस्य निरूपि-

द्या शो ला ता

तत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य च सत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं नास्तीति यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकधर्मभिन्नधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया च महानसीयवह्न्यभावो नैव धर्तुं शक्यते । ततः कुतः तमादायाऽव्याप्तिः ?

या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वर्तते सा वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीया भवति, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे पर्याप्तत्वात् । सा च प्रतियोगिता प्रतियोगित्वावच्छेदकतात्वोभयेनैव, तद्व्यक्तित्वेनैव वा अवच्छिन्ना । प्रतियोगित्वावच्छेदकतात्वोभयमपि तद्व्यक्तित्वमपि च वह्न्यभावीयवह्नित्ववृत्तिप्रतियोगितावच्छेदकतापर्याप्तप्रकारत्वादिधर्मावच्छेदकं भवत्येवेति प्रतियोगित्वावच्छेदकतात्वोभयातिरिक्ताऽनवच्छिन्ना सा वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतारूपेण प्राप्यवह्नित्ववृत्तिप्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नेनाऽनवच्छिन्ना स्यादेव । तथा च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य (तादृशप्रतियोगितायाः प्रतियोगित्वावच्छेदकतात्वोभयातिरिक्तेनाऽनवच्छिन्नत्वेन) च सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपक-

य शो ल ता

पर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेद-कतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्व-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेद-कतावृत्तिप्रतियोगिता धर्तुं शक्यते । अतः वह्न्यभावोऽपि धर्तुं शक्यते एव, तदधिकरणे च धूमहेतोः अवृत्तितया लक्षणसमन्वयान्नास्त्येव अव्याप्तिः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्रापि तार्णमहानसीयवह्न्यभावमादाय वह्न्यभावमादाय वा नास्त्येवाऽव्याप्तिः, तद्यथा - प्रकृते तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्व-निष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रकारता यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया धर्तुं नैव शक्यते, यावत्साध्यतावच्छेदकताविधया महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यता-वच्छेदकतोभयस्यैव प्राप्तेः, तादृशप्रकारतायाः च एतदतिरिक्ततार्णत्वनिष्ठप्रतियोगितावच्छेदकता-यामपि वर्तमानत्वात् । अतः यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया महानसीयत्वनिष्ठ-साध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन्नेव वर्तमानः, तदतिरिक्तेषु अवर्तमानः एव प्रकारत्वादिधर्मः ग्राह्यः । तादृशप्रकारतावच्छेदकधर्मविधया साध्यत्वावच्छेदकतात्वो-भयमेव प्राप्यते । या वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता सा वह्नित्ववृत्तिता-वैशिष्ट्य-साध्यत्वावच्छेदकतात्वत्रितयेनाऽवच्छिन्ना, अर्थात् तादृशवह्नित्ववृत्तितावैशिष्टसाध्यता-वच्छेदकतानिष्ठप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकसाध्यत्वावच्छेदकतात्वो-भयधर्मावच्छिन्नत्वं वर्तते, किन्तु तादृशधर्मेणैवाऽवच्छिन्नत्वं तदितरेणाऽनवच्छिन्नत्वं न वर्तते । तादृशप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्येनाऽपि अवच्छिन्ना वर्तते, वह्नित्ववृत्तितावैशिष्ट्यञ्च महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां न वर्तते, ततः कुतः महानसीयत्वनिष्ठसाध्यतावच्छेदकता -वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रकारताऽवच्छेदकं तद् भवेत् ? तथा च वह्नित्ववृत्तिता-वैशिष्ट्यादिना महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामवर्तमानेन, अत एव यावत्साध्यतावच्छेदकता-पर्याप्तधर्मानवच्छेदकेनावच्छिन्ना सा वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण कथं धर्तुं शक्यते? या साध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, तदतिरिक्तेन

केनाऽपि अनवच्छिन्ना सैव यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकधर्मभिन्नधर्मानवच्छिन्न-प्रतियोगितारूपेण धर्तुं शक्यते, महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदक-तोभयपर्याप्तप्रकारत्वादिधर्मावच्छेदकसाध्यत्वावच्छेदकतात्वोभयभिन्नेन तादृशसाध्यतावच्छेदकता-निष्ठप्रतियोगितायाः अनवच्छिन्नत्वात् । तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकता-पर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महान-सीयत्व-वह्नित्वगतद्वित्वमेव भवेत्। वह्नित्वगतैकत्वमपि न भवेत्, तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वमपि न भवेत् ।

महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महान-सीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयस्मिन् वर्तते । किन्तु सा प्रतियोगिता प्रतियोगितावच्छेदकतात्वोभयातिरिक्तेन महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्व-निष्ठप्रतियोगितावच्छेदकतोभयत्वेनाऽवच्छिन्ना, एतादृशमुभयत्वं यावत्प्रतियोगितावच्छेदकता-विधया प्राप्यवह्नित्वनिष्ठप्रतियोगितावच्छेदकतापर्याप्तप्रकारत्वादेरवच्छेदकं नैव भवेत्, प्रतियोगिता-वच्छेदकतातिरिक्तसाध्यतावच्छेदकतायामपि वर्तमानत्वात् तस्य। किन्तु यावत्प्रतियोगितावच्छेदकता-पर्याप्तप्रतियोगितावच्छेदकतात्वोभयमेव यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकं भवेत्। तादृशप्रतियोगितावच्छेदकतात्वोभयभिन्न-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मानवच्छेदकतादृशो-भयत्वेनाऽवच्छिन्ना महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभय-वृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकप्रतियोगित्वावच्छेदकतात्वोभयभिन्न-धर्मावच्छिन्ना निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नतादृशोभयत्वनिष्ठप्रतियोगितावच्छेदकतानिरूपिता चैव भवेत् ।

या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा प्रतियोगित्वावच्छेदकतात्वोभयेनैव यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकेनाऽवच्छिन्ना, तदतिरिक्तेन न केनाऽपि इति यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकता-

वृत्तिप्रतियोगिता धर्तुं शक्यते । किन्तु वह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वेन वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वमेव तादृशवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां भवेत्, महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयत्वं नैव भवेत् । यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपन्तु महानसीयत्व-वह्नित्वगतद्वित्वमेवाऽस्ति, न तु वह्नित्वगतैकत्वम् ।

तथा च महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्ति-प्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य सत्त्वेऽपि यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वस्य निरूपितत्वसम्बन्धा-वच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितत्वस्य च असत्त्वात्, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यावत्प्रतियोगितावच्छेदकता-पर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वस्य च सत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदक-भिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपा-वच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽसत्त्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदक-भिन्नानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपा-वच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रया-वच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदक-भिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपाव-च्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानव-च्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया च वह्न्यभावः धर्तुं नैव शक्यते, ततः कुतः वह्न्यभावमादायाऽव्याप्तिः स्यात् ?

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तस्यां महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य सत्त्वात्, तादृशप्रतियोगितायाः प्रतियोगित्वावच्छेदकतात्वोभयेनैव यावत्प्रतियोगितावच्छेदकताविधया प्राप्यमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयपर्याप्तधर्मावच्छेदकेन अवच्छिन्ना, तदतिरिक्तेन न केनाऽपि इति महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण च ग्राह्यत्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नानवच्छिन्नप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीयवह्न्यभावः धर्तव्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिः । ततश्च निरर्थकः एव पर्याप्तिनिवेशः ***इति चेत् ?***

न, अव्याप्तितादवस्थ्यात् । तथा हि - 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकविधया साध्यत्वावच्छेदकतात्वोभयं तद्व्यक्तित्वं वा लभ्यते । तत्र 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेनैवाऽवच्छिन्ना, नान्येन केनचित् । अवच्छेदकतात्वञ्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकमेव, न तु यावत्साध्यतावच्छेदकतापर्याप्तधर्मानवच्छेदकम्, वह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्तप्रकारत्वादिधर्माणां साध्यत्वेन अवच्छेदकतात्वेन चावच्छिन्नत्वात् । तादृशप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वातिरिक्तेनाऽनवच्छिन्ना इति यावत्साध्यतावच्छेदकतापर्याप्त(= वह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्त)धर्मावच्छेदकसाध्यत्वावच्छेदकतात्वाद्यतिरिक्तधर्मानच्छिन्नप्रतियोगितारूपेण सा अवच्छेदकतानिष्ठप्रतियोगिता धर्तुं

शक्यते। तादृशप्रतीतौ सा अवच्छेदकता महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्ता भासते इति तादृशावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्व-गतद्वित्वमेव भवति । अतः यावत्साध्यतावच्छेदकतापर्याप्तधर्मभिन्नधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते एव । महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता-वृत्तिप्रतियोगिता प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, प्रतियोगित्वावच्छेदकतात्वोभयातिरि-क्तेन अनवच्छिन्ना, प्रतियोगितावच्छेदकतात्वोभयञ्च यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकं भवत्येवेति यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगिता-वच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण च तादृशमहानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते एव । तथा च यावत्साध्यतावच्छेदकता-पर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रति-योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगिता-निरू-पकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीय-वह्न्यभावः धर्तुं शक्यते । तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेव अव्याप्तिः ।

यत्तु "यदि तद्व्यक्तित्वस्यैव प्रकृतसाध्यतावच्छेदकतापर्याप्तप्रकारत्वादेः अवच्छेदकतयाऽ-भ्युपगमेन अवच्छेदकतात्वस्य यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मत्वं परिभाव्य 'द्वे महानसीयत्व-वह्नित्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेणाऽग्राह्यत्वमङ्गीक्रियते

तदाऽपि अव्याप्तिः स्यादेव, तथा हि - तादृशाभ्युपगमानुसारेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितायाः एव ग्राह्यत्वात् तादृशयावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत् । वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्वपर्याप्तावच्छेदकतादौ भवेदिति 'एकं वह्नित्वमवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतायाः वह्नित्वपर्याप्तत्वेन वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता तादृशावच्छेदकतायां स्यादेव । तादृशावच्छेदकतानिष्ठप्रतियोगिता केवलाऽवच्छेदकतात्वेनैवावच्छिन्ना, तदितरेण केनाऽप्यनवच्छिन्ना इति प्रतियोगितावच्छेदकतात्वोभयातिरिक्तानवच्छिन्नत्वं तु तादृशप्रतियोगितायां स्यादेव । किञ्च महानसीयवह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रकारत्वादिधर्मः महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयपर्याप्तप्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना इति अवच्छेदकतात्वमपि यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकमेव, न तु यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नम् । अतः केवलावच्छेदकतात्वेनैवाऽवच्छिन्ना तदितरेणाऽनवच्छिन्ना तादृशप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते एव ।

तथा च तादृशप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठप्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशाव-

च्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते इति स्यादेव अव्याप्तिः, एतन्निवारणाय पर्याप्तिः निवेशनीया" ***इति;***

तन्न, अव्याप्तेः विरहात् । न हि पर्वतो वह्निमान् धूमाद् - इत्यत्र यावत्साध्यतावच्छेदकता-पर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्व-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छे-दकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता-श्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदक-भिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगिता-निरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगिता-श्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया वा महानसीयवह्न्यभावः धर्तुं शक्यते, यतः 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानव-च्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च ग्राह्यत्वेऽपि तादृशप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया न कोऽप्यभावः प्राप्यते इति पूर्वमुक्तमेव, तादृशावच्छेदकतायाम् उक्तप्रतीतिविषयीभूतायां प्रतियोगित्वादिना केनाऽपि निरूपितत्वाऽभावात् ।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियो-गितानिरूपकाभावविधया महानसीयवह्न्यभावः धर्तुं शक्यते, किन्तु महानसीयवह्न्यभावीयप्रतियो-गितावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधमनवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगिता-

वच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्त-धर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्व-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मा-नवच्छिन्नप्रतियोगितारूपेण वा धर्तुं न शक्यते, अत एव महानसीयवह्न्यभावः धर्तुं न शक्यते, किन्तु वह्न्यभावः एव ग्राह्यः, तदधिकरणे च धूमहेतोः अवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिः। ततश्च तद्व्यक्तित्वस्यैव यावत्साध्यतावच्छेदकतापर्याप्तप्रकारत्वादेरवच्छेदकतयाऽभ्युपगमे 'पर्वतो वह्निमान् धूमाद्' - इत्यत्राऽव्याप्तिः न सम्भवति ।

परन्तु तदा 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादाय तार्णवह्न्यभावमादाय चाऽव्याप्तिरापादनीया । तथा हि - 'एकं वह्नित्वमवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता -अवच्छेदकतात्वेनैवाऽवच्छिन्ना, नान्येन केनचित् । अवच्छेदकतात्वञ्च यावत्साध्यतावच्छेदकता-पर्याप्तधर्मावच्छेदकमेव, यावत्साध्यतावच्छेदकताविधया प्राप्यमहानसीयत्वनिष्ठसाध्यतावच्छेदकता -वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयपर्याप्तप्रकारत्वादेः साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्न-त्वात् । तथा च अवच्छेदकतात्वेतरधर्मानवच्छिन्ना तादृशप्रतीतौ भासमानावच्छेदकतानिष्ठप्रति-योगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्ना स्यादेव । अवच्छेद-कतात्वावच्छिन्नतादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वं स्यादेव । वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगितायां वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वमस्त्येव । तादृश-प्रतियोगितायाः प्रतियोगित्वावच्छेदकतात्वोभयातिरिक्तसर्वधर्मानवच्छिन्नत्वात्, तादृशप्रतियोगिता-वच्छेदकतात्वोभयस्य च यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रकारत्वादेरवच्छेदकत्वाच्च यावत्प्रति-योगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वं निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽ-निरूपितत्वमपि च स्यातामेव तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाम् ।

तथा च यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपक-

पर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति वह्न्यभावोऽपि धर्तुं शक्यते एव, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेव अव्याप्तिः ।

एवं 'त्रीणि तार्णत्व-महानसीयत्व-वह्नित्वानि अवच्छेदकानि' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिताऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, यतः तादृशप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेनैवाऽवच्छिन्ना, अवच्छेदकतात्वेतरेणाऽनवच्छिन्ना, अवच्छेदकतात्वञ्च यावत्साध्यतावच्छेदकतापर्याप्तप्रकारत्वादिधर्माणामवच्छेदकमेव वर्तते, न तु अनवच्छेदकम्, महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रकारतायाः साध्यत्वेन अवच्छेदकतात्वेन चाऽवच्छिन्नत्वात् । तथा च अवच्छेदकतात्वेनाऽवच्छिन्ना, अवच्छेदकतात्वभिन्नानवच्छिन्ना सा अवच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्ना स्यादेव। तथा च तादृशावच्छेदकतायाः तार्णत्व-महानसीयत्व-वह्नित्वेषु पर्याप्तत्वात् तादृशावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वमेव भवेत्, ततश्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वं स्यादेव, तादृशतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-तादृशाऽवच्छेदकतानिष्ठप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण ग्राह्यत्वात् ।

तादृशतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितारूपा भवति । तार्णमहानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता च प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना,

तदतिरिक्तेन न केनाऽपि अवच्छिन्ना, प्रतियोगित्वावच्छेदकतात्वोभयञ्च तार्णत्वनिष्ठप्रतियोगिता-वच्छेदकता-महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतात्रितयेषु वर्तते इति तादृशप्रतियोगितावच्छेदकतात्रितयस्मिन् वर्तमानस्य = यावत्प्रतियोगितावच्छेदकतापर्याप्त-प्रकारत्वादेरवच्छेदकं भवत्येव । तथा च यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रकारत्वाद्यवच्छेदकेन प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, तदतिरिक्तेन न केनाऽपि अवच्छिन्ना सा तार्ण-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चि-न्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपिता यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्ना च स्यादेव ।

ततश्च तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां याव-त्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्न-धर्मानवच्छिन्नत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रति-योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वरूपावच्छिन्नानु-योगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽ-वच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयो-गितावच्छेदकतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रति-योगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तार्णमहानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एवेति तार्णमहानसीयवह्न्यभावः ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणसमन्वयाभावात् स्यादेव अव्याप्तिः।

एतदव्याप्तिनिवारणाय उभयत्र पर्याप्तिनिवेशो नाऽऽवश्यकः, एकत्र साध्यतावच्छेदकताकोटौ एव तत्प्रवेशे सामञ्जस्यात्, प्रतियोगितावच्छेदकताकोटौ तत्प्रवेशस्याऽनर्थकत्वादिति बोध्यम्। तथा चैवं लक्षणमङ्गीकर्तव्यम् - (निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-

...इत्यादिप्रवेशे) यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्न-धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगिता-वच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगिता-निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवम् । यद्वा यावत्साध्यतावच्छेदकतापर्याप्तधर्म-निरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्न-धर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्ति-त्वाभावः इत्येवं लक्षणमङ्गीकर्तव्यम् । तथा च न कुत्राऽप्यव्याप्तिसम्भवः ।

तथा हि - पर्वतो वह्निमान् धूमाद् - इत्यत्र तद्व्यक्तित्वस्य साध्यतावच्छेदकतानिष्ठप्रकार-त्वादेरवच्छेदकत्वाऽभ्युपगमे नास्त्येवाऽव्याप्तिरिति प्राक् प्रदर्शितम् । यदि साध्यत्वावच्छेदकतात्वो-भयस्याऽवच्छेदकत्वमङ्गीक्रियते तदापि नास्ति अव्याप्तिः, यतः यावत्साध्यतावच्छेदकता-पर्याप्तधर्मविधया वह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्तधर्मः प्रकारत्वादिकः गृह्यते, तस्याऽ-वच्छेदकविधया अवच्छेदकतात्वस्य प्राप्तौ अपि तादृशप्रकारत्वादिकं न केवलावच्छेदकतात्वेनैव अवच्छिन्नम्, साध्यत्वेनाऽपि अवच्छिन्नत्वादिति तादृशयावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणविधया नावच्छेदकतात्वं गृह्यते, किन्तु साध्यत्वावच्छेदकतात्वोभयमेव प्राप्यते । एतदतिरिक्तं सर्वमपि केवलसाध्यत्व-केवलाऽवच्छेदकतात्वादिकं यावत्साध्यता-वच्छेदकतापर्याप्तधर्मनिरूपिताऽवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नमेव । तथा च केवलाऽवच्छेदक-तात्वेनाऽवच्छिन्ना सा अवच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मावच्छिन्ना एव भवेदिति 'महानसीयत्व-वह्नित्वे द्वे अवच्छेदके' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्म-निरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते । किन्तु या प्रतियोगिता साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना भवेत्, तदतिरिक्तेन न केनाऽ-प्यवच्छिन्ना भवेत् सैव प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्य-धिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते इति यावत्साध्यतावच्छेदकतापर्याप्त-धर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, तदितरेण न

केनाऽप्यवच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव यावत्साध्यतावच्छेदकतापर्याप्तधर्म-निरूपितावच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते । तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-रूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकता-पर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्व-गतैकत्वमेव भवेत् ।

वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्ववृत्तिताविशिष्ट-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां भवेत्, किन्तु तादृशप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगितायाः प्रतियोगित्वावच्छेदकतात्वभिन्नेन यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रकारत्वादिधर्म-निरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नेन वह्नित्ववृत्तितावैशिष्ट्यादिना अवच्छिन्नत्वात् तादृश-वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मा-नवच्छिन्नत्वस्य चाऽसम्भवः एवेति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्य-धिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपाव-च्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपिताऽवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रति-योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च वह्नित्व-वृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं नैव शक्यते ।

या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा प्रतियोगित्वावच्छेदकतात्वोभयेनैव यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकेनैवावच्छिन्ना, नान्येन केनचिदिति तादृशवह्न्य-भावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगिता-वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-

या शो ला ता

प्रतियोगितारूपेण यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च धर्तुं शक्यते एव । तादृशप्रतियोगिताश्रयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वाद् वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां सम्भवेदेवेति तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽपि सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते । ततश्च वह्न्यभावोऽपि धर्तुं शक्यते। तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादाय, तार्णमहानसीयवह्न्यभावमादाय वा पूर्वोक्तरीत्याऽव्याप्तिः न सम्भवति, यतः 'एकं वह्नित्वम् अवच्छेदकम्', 'त्रीणि तार्णत्व-महानसीयत्व-वह्नित्वानि अवच्छेदकानि' - इत्याद्यकारकप्रतीतौ भासमानाऽवच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेनाऽवच्छिन्ना भवति, अवच्छेदकतात्वं महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयपर्याप्तप्रकारतावच्छेदकं भवति, किन्तु अवच्छेदकतात्वमेव तादृशप्रकारतावच्छेदकं न भवति, तदतिरिक्तसाध्यत्वादिकमपि भवति, अर्थात् तादृशयावत्साध्यतावच्छेदकतापर्याप्तप्रकारत्वादिधर्मनिरूपितावच्छेदकताधिकरणम् अवच्छेदकतात्वं भवति, किन्तु यावत्साध्यतावच्छेदकतापर्याप्तप्रकारत्वादिधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणं न भवति, तादृशप्रकारत्वादिधर्मावच्छेदकतापर्याप्त्यधिकरणविधया साध्यत्वावच्छेदकतात्वोभयमेव प्राप्यते । अवच्छेदकतात्वं यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मविधया एव ग्रहीतुं

शक्यते इति तादृशप्रतीतिप्रतिभासमानावच्छेदकतानिष्ठप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकताधिकरणेन यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयभिन्नेन अवच्छेदकतात्वेन अवच्छिन्नायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वसत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नत्वाऽसम्भवाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता धर्तुं नैव शक्यते ।

किन्तु केवलसाध्यत्वावच्छेदकतात्वोभयेनैव यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मेण अवच्छिन्नत्वात्, तदतिरिक्तेनाऽनवच्छिन्नत्वाच्च साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते । तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वरूपमेव प्राप्यते, वह्नित्वगतैकत्वमपि न प्राप्यते, तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वमपि न प्राप्यते इति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात्, वह्नित्वगतैकत्वं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वं वा नैव स्यात् ।

महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते एव । तादृशप्रतियोगिता च प्रतियोगित्वावच्छेदकतात्वोभयेनैव यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणभूतेन अवच्छिन्ना, तदतिरिक्तेन न केनाऽप्यवच्छिन्ना इति तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वमप्यस्ति, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठप्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वमप्यस्ति, यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वमप्यस्ति ।

वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः च यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकप्रतियोगितावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात्, प्रतियोगितावच्छेदकतात्वोभयातिरिक्तेनाऽनवच्छिन्नत्वाच्च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामपि तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामपि च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वम्, यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वञ्च स्यातामेव, किन्तु तादृशोभयविधाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य वा सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं नैव सम्भवति ।

तथा च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वा धर्तुं न शक्यते इति महानसीयवह्न्यभावः एव धर्तव्यः, न तार्णमहानसीयवह्न्यभावः, न वा वह्न्यभावः । महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येव अव्याप्तिः । एवमेकत्रैव पर्याप्तिनिवेशेन सामञ्जस्ये उक्तरीत्या एव लक्षणमङ्गीकार्यम्, न उभयत्र निवेशः कर्तव्यः इति स्थितम् ।

ननु तादृशरीत्या लक्षणाऽभ्युपगमेऽपि अव्याप्तिनिवारणं नैव शक्यते, अव्याप्तिः तु स्यादेव। तथा हि - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठ-प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नेन साध्यत्वावच्छेदकतात्वोभयभिन्नेन, अवच्छेदकतात्वेन अवच्छिन्ना इति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतानिष्ठ-प्रतियोगिता धर्तुं न शक्यते इत्युक्तं भवता । किन्तु यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नानवच्छिन्नप्रतियोगितारूपेण का प्रतियोगिता धर्तुं शक्या भवेत् ? यतः साध्यतावच्छेदकतानिष्ठप्रतियोगिताऽपि अवच्छेदकतात्वेन तु अवच्छिन्ना वर्तते एव, न हि अवच्छेदकतात्वं साध्यतावच्छेदकतानिष्ठप्रतियोगिताऽनवच्छेदकमिति केनाऽपि वक्तुं पार्यते, तथा च 'अवच्छेदकतात्वं यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणं नास्ती'ति भवता एव प्रतिपादितत्वाद् अवच्छेदकतात्वावच्छिन्ना सा यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मसाध्यत्वावच्छेदकतात्वोभयभिन्नावच्छेदकतात्वावच्छिन्ना भवेदेव, तथा च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण तादृशावच्छेदकतात्वावच्छिन्नसाध्यतावच्छेदकतानिष्ठप्रतियोगिताऽपि धर्तुं न शक्यते, ततः यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मानवच्छिन्नप्रतियोगिताऽप्रसिद्ध्या दुर्वारा एवाऽप्रसिद्धिनिबन्धना अव्याप्ति***रिति चेत् ?***

न, यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगिताप्रवेशेन तन्निवारणात् । तथा चैवं लक्षणम् - यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभाव इति । यद्वा यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपिताऽवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितानिरू-

पकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकता-पर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावा-धिकरणनिरूपितवृत्तित्वाभावः इत्येवं लक्षणमभ्युपगन्तव्यम् । तथा च न स्यादेवाऽव्याप्तिः।

तथा हि - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठ-प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्म-पर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्तुं नैव शक्यते, साध्यतावच्छेदकतानिष्ठप्रतियोगिता च धर्तुं शक्या भवेत्, यतः साध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यत्वावच्छेदकतात्वोभयेनाऽ-वच्छिन्ना। अवच्छेदकतात्वेनाऽपि अवच्छिन्ना, किन्तु केवलावच्छेदकतात्वेन नाऽवच्छिन्ना इति साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपितावच्छेदकतापर्याप्त्यधिकरणं साध्यतावच्छेदकतात्वमेव साध्यत्वावच्छेदकतात्वोभयमेव वा भवेत्, न अवच्छेदकतात्वम्, अवच्छेदकतात्वं साध्यता-वच्छेदकतानिष्ठप्रतियोगितानिरूपितावच्छेदकतापर्याप्त्यधिकरणं न भवति, साध्यतावच्छेदकतानिष्ठ-प्रतियोगितानिरूपितावच्छेदकताधिकरणमेव तत्कथ्यते । तथा च अवच्छेदकतात्वपर्याप्तावच्छेद-कतानिरूपितत्वं साध्यतावच्छेदकतानिष्ठप्रतियोगितायां न सम्भवति, किन्तु साध्यतावच्छेदकतात्वो-भयपर्याप्तावच्छेदकतानिरूपितत्वमेव साध्यतावच्छेदकतानिष्ठप्रतियोगितायां सम्भवति । ततश्च साध्यतावच्छेदकतानिष्ठप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकता-पर्याप्त्यधिकरणधर्मसाध्यतावच्छेदकतात्वोभयभिन्नाऽवच्छेदकतात्ववृत्त्यवच्छेदकतानिरूपितत्वं भवति, किन्तु यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मसाध्यत्वावच्छेदकता-त्वोभयभिन्नावच्छेदकतात्वपर्याप्तावच्छेदकतानिरूपितत्वं नैव भवति । साध्यतावच्छेदकतानिष्ठ-प्रतियोगितायां यावत्साध्यत्वावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणं यत् साध्यत्वा-वच्छेदकतात्वोभयं तत्र पर्याप्तावच्छेदकतानिरूपितत्वमेव वर्तते, अर्थात् साध्यतावच्छेदकतात्वोभय-पर्याप्तावच्छेदकतानिरूपितत्वमेव वर्तते, साध्यत्वावच्छेदकतात्वोभयभिन्नेषु सर्वेषु कस्मिंश्चिदपि पर्याप्तावच्छेदकतानिरूपितत्वं नैव वर्तते। तथा च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपिता-वच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयभिन्नावच्छेदकतात्वादिपर्याप्तावच्छेदकताऽ-निरूपितत्वं साध्यतावच्छेदकतानिष्ठप्रतियोगितायां विद्यते एव ।

'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानाऽवच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेनैवाऽवच्छिन्ना, अवच्छेदकतात्वातिरिक्तेन न केनाऽपि इति अवच्छेदकतानिष्ठ-प्रतियोगितानिरूपितावच्छेदकता पर्याप्त्याऽपि अवच्छेदकतात्वे स्यात्, न तु साध्यत्वादौ । तथा च तादृशप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगितानिरूपितावच्छेदकतापर्याप्त्यधिकरण-मवच्छेदकतात्वमेव भवेत्, न साध्यत्वावच्छेदकतात्वोभयादिकम् । तथा चावच्छेदकतात्वनिष्ठा-वच्छेदकतानिरूपितत्वम् अवच्छेदकतात्वपर्याप्तावच्छेदकतानिरूपितत्वञ्चोभयमपि तादृशप्रतीतौ भासमानाऽवच्छेदकतानिष्ठप्रतियोगितायां वर्तते एव । तथा च तादृशप्रतीतौ भासमानावच्छे-दकतानिष्ठप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरण-धर्मसाध्यत्वावच्छेदकतात्वोभयभिन्नावच्छेदकतात्वपर्याप्तावच्छेदकतानिरूपितत्वमेव स्यात्, यावत्सा-ध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मसाध्यत्वावच्छेदकतात्वोभय-भिन्नावच्छेदकतात्वपर्याप्तावच्छेदकताऽनिरूपितत्वं नैव स्यात् ।

य शो ल ता

एवं त्रीणि तार्णत्व-महानसीयत्व-वह्नित्वानि अवच्छेदकानि - इत्याकारकप्रतीतौ भासमाना-वच्छेदकतानिष्ठप्रतियोगिताऽपि अवच्छेदकतात्वेनैवाऽवच्छिन्ना वर्तते, अवच्छेदकतात्वातिरिक्तेन अवच्छिन्ना न वर्तते, तथा च तादृशावच्छेदकतानिष्ठप्रतियोगितायाः अवच्छेदकता अवच्छेदकतात्वे एव पर्याप्ता, न तु अवच्छेदकतात्वातिरिक्तेन साध्यत्वादिना तादृशावच्छेदकतानिष्ठप्रतियोगिता अवच्छिन्ना वर्तते, येन तादृशावच्छेदकतानिष्ठप्रतियोगितायाः अवच्छेदकता अवच्छेदकतात्वे पर्याप्ता न भवेत्, यथा साध्यतावच्छेदकतानिष्ठप्रतियोगिता न केवलावच्छेदकतात्वेनैवाऽवच्छिन्ना, किन्तु साध्यत्वेनाऽपि अवच्छिन्ना इति तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायाः अवच्छेदकता केवलाऽवच्छेदकतात्वे पर्याप्ता न कथ्यते, किन्तु साध्यत्वावच्छेदकतात्वोभयपर्याप्ता एव कथ्यते । तादृशप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता केवलावच्छेदकतात्वेनैवाऽवच्छिन्ना वर्तते, अवच्छेदकतात्वातिरिक्तेन न केनाऽप्यवच्छिन्ना वर्तते इति तादृशप्रतीतौ भासमानावच्छेदकता-निष्ठप्रतियोगितायाः अवच्छेदकता केवलावच्छेदकतात्वे पर्याप्ता उच्यते । तथा च तादृशप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकता-पर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयभिन्नावच्छेदकतात्वपर्याप्तावच्छेदकतानिरूपितत्वमेव वर्तते, यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्ता-वच्छेदकताऽनिरूपितत्वं नैव भवेत् ।

ततश्च तादृशप्रतीतिद्वये भासमानावच्छेदकतानिष्ठप्रतियोगितायाः अवच्छेदकतात्वातिरिक्तेन अनवच्छिन्नत्वात्, अवच्छेदकतात्वस्य च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणविधयाऽग्राह्यत्वात्, साध्यतावच्छेदकतानिष्ठप्रतियोगितावच्छेदकतायाः साध्यत्वावच्छेदकतात्वोभयस्मिन्नेव पर्याप्तत्वात्, साध्यत्वावच्छेदकतात्वोभयस्य यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितत्वं साध्यतावच्छेदकतानिष्ठप्रतियोगितायामेव वर्तते, 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ 'त्रीणि तार्णत्व-महानसीयत्व-वह्नित्वानि अवच्छेदकानि' - इत्याकारकप्रतीतौ वा भासमानावच्छेदकतानिष्ठप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितत्वं न स्यात् । यत्प्रतियोगितायाः यावन्तः धर्माः अवच्छेदकाः तावन्तः सर्वेऽपि मीलिताः यदि यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतायाः पर्याप्त्यधिकरणविधया ग्राह्याः स्युः तदैव तादृशप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितत्वं स्यात् । उक्तप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेनैवाऽवच्छिन्ना । अवच्छेदकतात्वञ्च न यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपिताऽवच्छेदकतापर्याप्त्यधिकरणम्, साध्यतावच्छेदकतानिष्ठप्रतियोगितायाः अवच्छेदकविधया साध्यत्वावच्छेदकतात्वोभयमेव प्राप्यते, तच्च मीलितं यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणं भवति । अतः यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितारूपेण साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते, 'एकं वह्नित्वम् अवच्छेदकम्', 'त्रीणि तार्णत्व-महानसीयत्व-वह्नित्वानि अवच्छेदकानि' - इत्याद्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता नैव धर्तुं शक्यते।

तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव विद्यते, न वह्नित्वगतैकत्वम्, न वा तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वमिति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात्, न वह्नित्वगतैकत्वम्, न तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वम् । महानसीयत्व

-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव वर्तते, वह्न्यभावीयप्रतियोगितावच्छेदकतायामपि न विद्यते, तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामपि न विद्यते । तथा च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः, तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाश्च प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात्, तदितरेणाऽनवच्छिन्नत्वात् प्रतियोगित्वावच्छेदकतात्वोभयस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकत्वाच्च तादृशप्रतियोगितावच्छेदकतात्रितयेषु अपि यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य च सत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामेव सत्त्वाद् वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां चाऽसत्त्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिनिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमहानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, न वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता, न वा तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता । तथा च महानसीयवह्न्यभावः एव धर्तुं शक्यते, न वह्न्यभावः न वा तार्णमहानसीयवह्न्यभावः । महानसीयवह्न्यभावाधिकरणे तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येव अव्याप्तिः । ततश्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकता-

पर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितत्वं निवेशनीयमिति स्थितम्, यावत्प्रतियोगितावच्छेदकता..... इत्यादिपरिष्कारतादवस्थ्येऽपि नास्ति काचित् क्षतिरिति न तत्र किमपि परिष्करणीयमिति ।

ननु एवमपि अव्याप्तिनिवारणं नैव शक्यम्, तदवस्था हि अव्याप्तिः। तथा हि - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ 'त्रीणि तार्णत्व-महानसीयत्व-वह्नित्वानि अवच्छेदकानि' - इत्याकारकप्रतीतौ च भासमानावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्तुं शक्यते, यतः तादृशप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेनैवाऽवच्छिन्ना, नान्येन केनचित्, अतः अवच्छेदकतात्वपर्याप्तावच्छेदकतानिरूपितत्वमेव तादृशावच्छेदकतानिष्ठप्रतियोगितायां वर्तते । यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन् पर्याप्तप्रकारता गृह्यते। तादृशप्रकारतायाः अवच्छेदकता साध्यत्वे अवच्छेदकतात्वे चोभयस्मिन्नेव । तत्र तादृशावच्छेदकतात्वस्य यावत्साध्यतावच्छेदकतापर्याप्तप्रकारतावच्छेदकतया तस्मिन् तादृशयावत्साध्यतावच्छेदकतापर्याप्तप्रकारतावच्छेदकता भवेदेव । एतादृशावच्छेदकतात्ववृत्तितावि‍शिष्ट-यावत्साध्यतावच्छेदकतापर्याप्तप्रकारतावच्छेदकतापर्याप्त्यधिकरणविधया अवच्छेदकतात्वमेव प्राप्यते, यथा वह्नित्ववृत्तितावि‍शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणं वह्नित्वमेव भवेत्, महानसीयत्व-वह्नित्वोभयं नैव प्राप्यते, तथैव यावत्साध्यतावच्छेदकतापर्याप्तप्रकारत्वादिधर्मनिरूपितावच्छेदकतायाः साध्यत्वावच्छेदकतात्वोभयस्मिन् वर्तमानत्वेऽपि अवच्छेदकतात्ववृत्तितावि‍शिष्टयावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणविधया साध्यत्वावच्छेदकतात्वोभयं नैव लभ्यते, अवच्छेदकतात्वमेव लभ्यते ।

तथा च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणविधया अवच्छेदकतात्वं प्राप्यते एव । तादृशप्रतीतिभासमानावच्छेदकतानिष्ठप्रतियोगितायाम् अवच्छेदकतात्वपर्याप्तावच्छेदकतानिरूपितत्वमेव अस्ति, अवच्छेदकतात्वभिन्नपर्याप्तावच्छेदकतानिरूपितत्वं नास्ति इति अवच्छेदकतात्वस्य यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधि-

करणधर्मत्वात्तादृशयावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणावच्छेदकतात्वधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितत्वमेव तादृशप्रतीतौ भासमानवच्छेदकतानिष्ठप्रतियोगितायां वर्तते इति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितारूपेण 'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ 'त्रीणि तार्णत्व-महानसीयत्व-वह्नित्वानि अवच्छेदकानि' - इत्याकारकप्रतीतौ च भासमानाऽवच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते एव । तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः अवच्छेदकं रूपं वह्नित्वगतैकत्वं तार्णत्वमहानसीयत्ववह्नित्वगतत्रित्वं वा, वह्नित्व-गतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते, तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते ।

वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाश्च केवलप्रतियोगित्वाऽवच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात्, तदितरेणाऽनवच्छिन्नत्वात्, प्रतियोगित्वावच्छेदकतात्वोभययोः यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रकारत्वादिधर्मावच्छेदकत्वाच्च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामपि तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामपि च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वमपि, यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वमपि च स्यातामेव । तथा च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्ताऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति वह्न्यभावोऽपि धर्तुं शक्यते एव ।

एवमेव यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्म-पर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-महानसीयत्व -वह्नित्वगतत्रित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ -प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽ-निरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितावच्छेदकतापर्याप्त्यधिकरण-धर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-महान-सीयत्व-वह्नित्वगतत्रित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्त-धर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छे-दकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति तार्णमहानसीयवह्न्यभावोऽपि धर्तुं शक्यते एव। वह्न्यभावस्य तार्णमहानसीयवह्न्यभावस्य चाधिकरणे तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ***इति चेत् ?***

न, यावन्निवेशेन तद्वारणसम्भवात् । तथा चैवं लक्षणम् - यावत्साध्यतावच्छेदकतापर्याप्तधर्म-निरूपितयावदवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चि-न्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः इति । यद्वा 'यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्य-धिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकतानिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपाव-च्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्न-प्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणम् अभ्युपगन्तव्यम्। तथा च नोक्ताऽव्याप्तिप्रसरः, यावदवच्छेदकतापर्याप्त्यधि-करणस्य पूर्वमगृहीतत्वात् । तथा हि -

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् -इत्यत्र यावत्साध्यतावच्छेदकताविधया महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यता-वच्छेदकतोभयमेव प्राप्यते इति यावत्साध्यतावच्छेदकतापर्याप्तधर्मविधया महानसीयत्वनिष्ठसाध्यता-

वच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयपर्याप्तप्रकारत्वादिकं गृह्यते । तादृशप्रकारतायाः अवच्छेदकता साध्यत्वावच्छेदकतात्वोभयस्मिन् एव भवेत्, तत्र यदि साध्यत्वनिष्ठावच्छेदकता गृह्यते तदा तस्य पर्याप्तिसम्बन्धेनाधिकरणविधयाऽपि साध्यत्वमेव लभ्यते, अवच्छेदकतात्वनिष्ठावच्छेदकता गृह्यते तदा पर्याप्तिसम्बन्धेनाऽपि तदधिकरणविधया अवच्छेदकतात्वमेव लभ्यते। किन्तु तादृशप्रकारतायाः यावत्यः अवच्छेदकताः तावतीनां सर्वासामधिकरणं पर्याप्तिसम्बन्धेन यदि गृह्यते तदा साध्यत्वावच्छेदकतात्वोभयमेव प्राप्यते, यतः तादृशप्रकारतायाः यावदवच्छेदकतारूपेण साध्यत्वनिष्ठावच्छेदकता, अवच्छेदकतात्वनिष्ठावच्छेदकता - अवच्छेदकतोभयमेव गृह्यते, ततः तादृशाऽवच्छेदकताद्वितयपर्याप्त्यधिकरणविधया साध्यत्वावच्छेदकतात्वोभयमेव लभ्यते। केवलावच्छेदकतात्वं न यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणम्। अतः अवच्छेदकतात्वं यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मविधया एव गृह्यते ।

य
शो
ल
ता

'एकं वह्नित्वम् अवच्छेदकम्' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वेनैवाऽवच्छिन्ना, 'तार्णत्व-महानसीयत्व-वह्नित्वानि त्रीणि अवच्छेदकानि' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिताऽपि अवच्छेदकतात्वेनैवाऽवच्छिन्ना, नान्येन केनचिदिति तादृशावच्छेदकतानिष्ठप्रतियोगितायाः अवच्छेदकता अवच्छेदकतात्वे एव पर्याप्ता, अर्थात् तादृशोभयविधप्रतीतिभासमानावच्छेदकतानिष्ठप्रतियोगिता अवच्छेदकतात्वपर्याप्तावच्छेदकतानिरूपिता इति तादृशप्रतीतिभासमानाऽवच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्ताऽवच्छेदकताऽनिरूपिता नैव भवेत्, तादृशावच्छेदकतानिष्ठप्रतियोगितानिरूपकावच्छेदकतापर्याप्त्यधिकरणाऽवच्छेदकतात्वस्य यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नत्वात् । तथा च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितारूपेण 'एकं वह्नित्वम् अवच्छेदकम्' इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता 'त्रीणि तार्णत्व-महानसीयत्व-वह्नित्वानि अवच्छेदकानि' - इत्याकारकप्रतीतौ भासमानावच्छेदकतानिष्ठप्रतियोगिता च धर्तुं नैव शक्येते । किन्तु साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव ग्राह्या, साध्यतावच्छेदकतानिष्ठप्रतियोगितायाः अवच्छेदकता साध्यत्वावच्छेदकतात्वोभयस्मिन्नेव पर्याप्ता, नान्यत्र कुत्रचित् । साध्यत्वावच्छेदकतात्वोभयञ्च यावत्साध्यता-

वच्छेदकतापर्याप्तप्रकारत्वादिधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणमस्त्येव । तथा च साध्यतावच्छेदकतानिष्ठप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयपर्याप्तावच्छेदकतानिरूपितत्वमेव वर्तते, यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयपर्याप्तावच्छेदकताभिन्नावच्छेदकतानिरूपितत्वं नास्त्येव, अर्थाद् यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणसाध्यत्वावच्छेदकतात्वोभयभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितत्वं तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां वर्तते इति इयमेव प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकतानिरूपितप्रतियोगितारूपेण धर्तुं शक्यते।

तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वमेव प्राप्यते इति यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकतानिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव लभ्यते, वह्नित्वगतैकत्वं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वं नैव लभ्यते इति । ततश्च तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाञ्च तादृशप्रतियोगितांत्रितयस्याऽपि प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात्, तदतिरिक्तेन अनवच्छिन्नत्वात्, तादृशप्रतियोगितावच्छेदकतात्वोभयस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकत्वाच्च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नत्वस्य च सत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्तावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामेव सत्त्वात्, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाञ्च असत्त्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्ताऽवच्छेदकताऽनिरूपितप्रतियो-

गितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिनिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तधर्मनिरूपितयावदवच्छेदकतापर्याप्त्यधिकरणधर्मभिन्नधर्मपर्याप्ताऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तधर्मावच्छेदकभिन्नधर्मानवच्छिन्नप्रतियोगितारूपेण च महानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगिता तार्णमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता च नैव धर्तुं शक्येते इति महानसीयवह्न्यभावः एव ग्राह्यः, तार्णमहानसीयवह्न्यभावः, वह्न्यभावः वा नैव धर्तुं शक्यते। महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणसमन्वयात् कुतोऽव्याप्तिः इति सर्वाङ्गसम्पूर्णम् अव्याप्तिविरहितमिदं लक्षणम् अङ्गीकार्यमिति भावः" [1]***इत्याहुः*** (एतत्सर्वं केषाञ्चन मतानुसारेण दर्शितम्) ।

वयन्तु ब्रूमः - यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवं लक्षणमभ्युपगम्यताम् । वस्तुतः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवमेव लक्षणं शरण्यम् । एतल्लक्षणानुसारेण नास्त्येव कुत्राऽप्यव्याप्तिः।

तथा हि - 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता -वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता धर्तुमिष्यते तदा सा यावत्साध्यतावच्छेदकतापर्याप्ता भवेत् तदावश्यकम्। प्रकृते साध्यतावच्छेदकता वह्नित्वनिष्ठा एका एवेति यावत्साध्यता-

१. पृ. २४५१ तः आरब्धम् अन्येषां मतनिरूपणमत्र पूर्णतामगात् ।

वच्छेदकताविधया वह्नित्वनिष्ठसाध्यतावच्छेदकता एव प्राप्यते । वह्नित्वनिष्ठसाध्यतावच्छेदकतायाञ्च तादृशमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता वर्तते एवेति यावत्साध्यतावच्छेदकतावृत्तित्वं तादृशप्रतियोगितायां भवेत् । किन्तु सा प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्ता न कथ्यते, यावत्साध्यतावच्छेदकताविधया ग्राह्यवह्नित्वनिष्ठसाध्यतावच्छेदकताभिन्नमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि तादृशप्रतियोगितायाः वर्तमानत्वात् । या प्रतियोगिता यावत्यः साध्यतावच्छेदकताः तावतीसु सर्वासु वर्तते, तदतिरिक्तेषु न कुत्राऽपि वर्तते, सैव प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितारूपेण धर्तुं शक्यते । महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता यावत्यः साध्यतावच्छेदकताः तावतीषु सर्वासु अर्थाद् यावत्साध्यतावच्छेदकतायां वर्तमाना अस्ति, किन्तु यावत्साध्यतावच्छेदकतातिरिक्तेषु महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतादिषु न वर्तते इति न, अतः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताविधया महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता धर्तुं न शक्यते इति भावः ।

या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा यावत्साध्यतावच्छेदकतायामेव = वह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव वर्तते, तदतिरिक्तेषु न कुत्रापि वर्तते इति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताविधया साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव धर्तुं शक्यते, साध्यतावच्छेदकतायाश्च वह्नित्वे एव पर्याप्तत्वाद् वह्नित्वनिष्ठसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव वर्तते इति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव वर्तते । वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते, वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाञ्च वर्तते । तत्र वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्ता न कथ्यते, यतः प्रकृते यावत्प्रतियोगितावच्छेदकताविधया महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयं प्राप्यते, एतदतिरिक्तेषु तादृशवह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता न वर्तते, किन्तु महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयस्मिन्नपि न विद्यते। केवलवह्नित्व-

निष्ठप्रतियोगितावच्छेदकतायामेव विद्यते । ततश्च तादृशवह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्प्रतियोगितावच्छेदकतावृत्तित्वमपि न सम्भवति, तर्हि यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वं कथं भवेत् ?

तादृशवह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियो-गितायाः प्रतियोगित्वावच्छेदकतात्वोभयभिन्नवह्नित्ववृत्तितावैशिष्ट्यादिना अवच्छिन्नत्वात् तादृश-वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं नास्ति ।

यदि महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता गृह्यते तदा सा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः महानसीयत्वनिष्ठप्रतियोगिता-वच्छेदकतायामपि वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि च वर्तमानत्वात्, तदतिरिक्तेषु अवर्तमानत्वाच्च यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वं तादृशमहानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगितायां सम्भवत्येव । तादृशप्रतियोगितायाः प्रतियोगित्वावच्छेदकतात्वोभय-भिन्नेनाऽनवच्छिन्नत्वात् तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगिता-वच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वमपि अस्ति । किन्तु तादृशमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वाद् महानसीयत्व-वह्नित्वगत-द्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता एव तादृशमहानसीयवह्न्यभावीयप्रतियो-गितावच्छेदकतायां भवेत्, वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगित्वं नैव भवति । यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपन्तु महानसीयत्व-वह्नित्वगतद्वित्वं नैव भवति, वह्नित्वगतैकत्वमेव भवतीति यावत्साध्यतावच्छेदकता-पर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां नैव सम्भवति ।

इत्थञ्च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्प्रतियोगिता-वच्छेदकतापर्याप्तत्वं निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छे-

दकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वञ्च वर्तते, किन्तु तत्र यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं न वर्तते । वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं वर्तते, किन्तु निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वञ्च न स्तः । तथा च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया च महानसीयवह्न्यभावः नैव धर्तुं शक्यते ।

वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितारूपेण धर्तुं शक्यते एव, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां यावत्प्रतियोगितावच्छेदकताविधया ग्राह्यायां वर्तमानत्वात्, तदितरस्मिन् अवर्तमानत्वाच्च । प्रतियोगित्वावच्छेदकतात्वातिरिक्तेन तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः अनवच्छिन्नत्वात् तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं तु स्यादेव । पूर्वोक्तरीत्या तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं स्यादेव ।

तथा च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्त-

य शो ल ता

प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वमप्यस्ति, निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वमप्यस्ति, यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वमप्यस्ति इति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितारूपेण च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति वह्न्यभावः एव ग्राह्यः, न महानसीयवह्न्यभावः, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येव अव्याप्तिः ।

अत्र तद्व्यक्तित्वस्य साध्यतावच्छेदकतानिष्ठप्रतियोगितायाः वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायाश्च अवच्छेदकत्वमभ्युपगम्यतां मा वा तथाऽपि उभयथा उक्तलक्षणानुसारेण लक्षणसमन्वयः अनाविलः, प्रतियोगितावच्छेदकताया अप्रवेशात्, प्रतियोगिताविशेषणविधया यावत्साध्यतावच्छेदकतादिपर्याप्तत्वस्यैव निवेशात्, तथा च 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र तु न कथमपि उक्तलक्षणानुसारेणाऽव्याप्त्याशङ्का वर्तते, लाघवञ्च अद्भुतं सम्पद्यते इति।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि न स्यादेव अव्याप्तिः कथमपि । तद्यथा - यदि अत्र तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकता-त्रितयवृत्तिप्रतियोगिता ग्रहीतुमिष्यते तदा तादृशप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्ता भवेत् तदावश्यकम्, अर्थात् प्रकृतलक्षणानुसारेण यावत्साध्यतावच्छेदकताविधया प्राप्यमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन् वर्तमाना, तदितरस्मिंश्च अवर्तमाना प्रतियोगिता एव यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताविधया गृह्यते इति यदि तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगिता महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यता-

वच्छेदकतायामपि च वर्तमाना भवेत्, तदतिरिक्तेषु अवर्तमाना भवेत् तदैव तादृशत्रितयवृत्तिप्रतियोगिता धर्तुं शक्यते । किन्तु प्रथमदृष्ट्या एव ज्ञायते यदुत महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तित्वं तादृशत्रितयवृत्तिप्रतियोगितायां वर्तते, किन्तु तदतिरिक्ततार्णत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तमानत्वं तादृशत्रितयवृत्तिप्रतियोगितायां विद्यते इति तादृशतार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतावृत्तित्वसत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तत्वाऽसम्भवात् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितारूपेण तादृशत्रितयवृत्तिप्रतियोगिता नैव गृह्यते ।

यदि वह्नित्ववृत्तितावच्छिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता गृह्यते तदाऽपि तस्याः यावत्साध्यतावच्छेदकतापर्याप्तत्वमावश्यकम्, किन्तु तादृशप्रतियोगिता केवलवह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव वर्तते, महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन् तादृशप्रतियोगिता न विद्यते, तथा च साध्यतावच्छेदकताभिन्नाऽवृत्तित्वस्य वह्नित्ववृत्तितावच्छिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां सत्त्वेऽपि यावत्साध्यतावच्छेदकतावृत्तित्वस्याऽसत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैव धर्तुं शक्यते । किन्तु महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च वर्तमाना, तदतिरिक्तेषु अवर्तमाना च या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सैव

वच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगिता वह्नित्ववृत्तितावि‌शिष्टसाध्यता-वच्छेदकतानिष्ठप्रतियोगिता वा धर्तुं न शक्यते, किन्तु महानसीयत्वनिष्ठसाध्यतावच्छेदकता -वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता = साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितारूपेण धर्तुं शक्यते । तादृशोभयसाध्यतावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन् पर्याप्तत्वात् तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वं प्राप्यते इति यावत्साध्यता-वच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगत-द्वित्वमेव भवेत्, तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वं वह्नित्वगतैकत्वं वा नैव भवेत् ।

महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतायामेवं भवेत्, वह्न्यभावीयप्रतियोगितावच्छेदकतायां तार्ण-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वा नैव भवेत्, वह्नित्वगतैकत्वरूपावच्छिन्नानु-योगितानिरूपकपर्याप्तीयप्रतियोगितायाः तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयप्रतियोगितायाः वा वृत्तित्वात् तादृशप्रतियोगितावच्छेदकतायाम् । महानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः प्रतियोगित्वावच्छेदकतात्वोभयभिन्नेनाऽ-नवच्छिन्नत्वात् तादृशप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकता-भिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं तु अस्ति एव । तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः महानसीयत्वनिष्ठ-प्रतियोगितावच्छेदकतायामपि वर्तमानत्वात्, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि च वर्तमान-त्वात्, तदतिरिक्तेषु कुत्राऽपि अवर्तमानत्वाच्च यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वमप्यस्ति ।

तथा च तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः वह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाश्च प्रतियोगित्वावच्छेदकतात्वोभयातिरिक्तेनाऽनवच्छिन्नत्वात्, तार्णत्वनिष्ठप्रतियोगितावच्छेदकतादियावत्प्रतियोगितावच्छेदकतायां वर्तमानत्वात् तदितिरिक्तेषु अवर्तमानत्वाच्च यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वं निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ -प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपितत्वञ्च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामपि सम्भवति,

तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामपि सम्भवति, वह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामपि च सम्भवति, किन्तु यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयप्रतियोगिता तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामपि न सम्भवति, वह्न्यभावीयप्रतियोगितावच्छेदकतायामपि न सम्भवति, किन्तु महानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतायामेव सम्भवति ।

अतः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावरूपेण यावत्साध्यतावच्छेद-कतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्ना-नुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताश्रयावच्छेदकतानिरूपित-प्रतियोगितानिरूपकाभावविधया च महानसीयवह्न्यभावः एव धर्तव्यः, न तार्णमहानसीयवह्न्यभावः न वा वह्न्यभावः धर्तुं शक्यते। महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येव अव्याप्तिः। इत्थञ्चैतल्लक्षणाङ्गीकारे नास्ति कुत्राऽपि काऽप्यापत्तिः।

अथ पदकृत्यं सङ्क्षेपतः । एतल्लक्षणे यदि यावत्पदमनुपादाय 'साध्यतावच्छेदकतापर्याप्त-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्व-सम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयाऽवच्छेदकतानिरूपितप्रतियोगितानिरूपका-भावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवम्, 'साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-श्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणमभ्युपगम्यते तदा अव्याप्तिः दुर्निवारा। तद्यथा -

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता गृह्यते । तादृशप्रतियोगिता

वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतायामेव पर्याप्ता, वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतायामेव वर्तमानत्वात्, तदितरस्मिन् अवर्तमानत्वाच्च । वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतापर्याप्ता प्रतियोगिता साध्यतावच्छेदकतापर्याप्ता न भवति इति न साध्यतावच्छेदकतापर्याप्तप्रतियोगितावि‌धया तादृशवह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते। तादृशवह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत्, तादृशवह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वात् । तथा च साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वं स्यादेव । वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगितावच्छेदकतात्वोभयातिरिक्तेनाऽनवच्छिन्ना इति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता स्यात्, तादृशप्रतियोगिता यावत्प्रतियोगितावच्छेदकतावि‌धया प्राप्यवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां वर्तमाना तदितरस्मिन्नवर्तमाना इति यावत्प्रतियोगितावच्छेदकतापर्याप्ताऽपि भवेदेव। तथा च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य प्रतियोगितावच्छेदकतापर्याप्तत्वस्य च सत्त्वात् तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितारूपेण च धर्तुं शक्यते इति वह्न्यभावोऽपि धर्तुं शक्यते, वह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेव अव्याप्तिः ।

यदि च साध्यतावच्छेदकतावि‌शेषणवि‌धया यावत्त्वं निवेश्यते, प्रतियोगितावच्छेदकतावि‌शेषणवि‌धया न निवेश्यते, ततश्चैवं लक्षणम् - यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपक-

पर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति, यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवं वा लक्षणम् ।

यद्यपि एतल्लक्षणानुसारेण उक्ताऽव्याप्तिनिवारणं सम्भवति, यतः 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितावि‌धया वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता नैव गृह्यते, वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तमानत्वेऽपि महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामवर्तमानत्वात् तस्याः। तथा च पूर्वोक्तरीत्या साध्यतावच्छेदकतानिष्ठप्रतियोगितायाः एव यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितावि‌धया ग्राह्यत्वात् तादृशयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात्, ततश्च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावविधया च महानसीयवह्न्यभावः एव धर्तुं शक्यते, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगताद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य सत्त्वात्, वह्न्यभावः नैव धर्तुं शक्यते, महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिः,

तथापि सर्वत्र अव्याप्तिनिवारणं नैव शक्यम्, पर्वतो वह्निमान् धूमाद् - इत्यत्र

अव्याप्तेः सद्भावात् । पर्वतो वह्निमान् धूमाद् - इत्यत्र पूर्वोक्तरीत्या यावत्साध्यतावच्छेदकता-पर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत्। वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां न सम्भवति, किन्तु वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां सम्भवति एव । वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामेव वर्तमानत्वात्, तदितरेषु अवर्तमानत्वाच्च वह्नित्वनिष्ठ-प्रतियोगितावच्छेदकतापर्याप्तत्वं तादृशप्रतियोगितायां वर्तते इति वह्नित्वनिष्ठप्रतियोगिता-वच्छेदकतापर्याप्ता तादृशप्रतियोगिता न न प्रतियोगितावच्छेदकतापर्याप्ता इति तादृशवह्नित्ववृत्तिता-विशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकता-पर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीयत्वस्य प्रतियोगितावच्छेदकतापर्याप्तत्वस्य च सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय -प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितारूपेण वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते । तादृशप्रतियोगिताश्रयावच्छेदकतानिरूपित-प्रतियोगितानिरूपकाभावविधया महानसीयवह्न्यभावोऽपि ग्राह्यः एव, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

यदि प्रतियोगितावच्छेदकताविशेषणविधयाऽपि यावत्त्वं निवेश्यते तदा न स्यादेवोक्ताऽ-व्याप्तिः, वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-वह्नित्ववृत्तितावविशिष्टमहानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगितावच्छेदकतापर्याप्ताऽपि महानसीयत्व-निष्ठप्रतियोगितावच्छेदकतायामवर्तमानत्वाद् यावत्प्रतियोगितावच्छेदकतापर्याप्ता न भवति । तथा च स्पष्टमेव यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रति-योगितावधया वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्वनिष्ठप्रतियोगिता-वच्छेदकतायां यावत्प्रतियोगितावच्छेदकतावधया ग्राह्यायां वर्तमाना एव गृह्यते, वह्नित्ववृत्तिता-विशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैव धर्तुं शक्यते इति वह्न्यभावः एव ग्राह्यः, न महानसीयवह्न्यभावः, वह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया

लक्षणसमन्वयान्नास्त्यव्याप्तिः ।

ननु यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवम्, यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय -यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं वा लक्षणमभ्युपगम्यताम्, तावताऽपि उक्ताऽव्याप्तिवारणसम्भवे पर्याप्तिनिवेशस्य निरर्थकत्वात् । अव्याप्तिनिवारणञ्चैवं भवति - पर्वतो वह्निमान् धूमाद् - इत्यत्र यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्व-गतैकत्वमेव प्राप्यते, वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नित्व-वृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते, किन्तु सा प्रतियोगिता केवलवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामेव वर्तते, न महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामिति यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितारूपेण कथं तादृशप्रतियोगिता धर्तुं शक्या भवेत् ? किन्तु या वह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तमाना वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीया प्रतियोगिता सैव यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितारूपेण धर्तुं शक्यते।

ततश्च स्पष्टमेव - वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वह्न्यभावीयप्रतियोगितावच्छेदकतायाञ्च यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः सत्त्वेऽपि यावत्प्रतियोगितावच्छेदकतावृत्तित्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामेव सत्त्वात् तादृशयावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठ-

प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितारूपेण च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, ततश्च वह्न्यभावः एव ग्राह्यः, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिः ।

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि वह्नित्ववृत्तिताविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितारूपेण धर्तुं न शक्यते, महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामवर्तमानत्वात्, किन्तु महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता एव धर्तुं शक्यते, ततश्च यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्, महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायामेव वर्तते । तादृशप्रतियोगिता च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता यावत्प्रतियोगितावच्छेदकतायां वर्तमाना च अस्त्येवेति यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितारूपेण च तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति महानसीयवह्न्यभावोऽपि ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिः । ततः किमर्थं पर्याप्तिनिवेशः इष्यते भवता ***इति चेत् ?***

न, अव्याप्तितादवस्थ्यात् । तथा हि - 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र तार्णत्वनिष्ठप्रतियोगितावच्छेदकता -महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता यावत्साध्यता-

वच्छेदकतावृत्तिप्रतियोगिताविधया धर्तुं शक्यते, यावत्साध्यतावच्छेदकताविधया ग्राह्यमहानसीयत्व-निष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन् तादृशप्रतियोगितायाः वर्तमानत्वात्। तादृशतार्णत्वनिष्ठप्रतियोगितावच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्व-निष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वमेव वर्तते, तादृशप्रतियोगिताश्रयावच्छेदकतात्रितयस्य तार्णत्व-महानसीयत्व-वह्नित्वेषु एव पर्याप्तत्वात् । ततश्च यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधयाऽपि तार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वं प्राप्यते एव। तादृशतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता तार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां वर्तते एव, तादृशप्रतियोगितावच्छेदकतायाः तार्णत्व-महानसीयत्व-वह्नित्वेषु एव पर्याप्तत्वात् । तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगितायाः यावत्प्रतियोगितावच्छेदकताविधया ग्राह्यतार्णत्वनिष्ठप्रतियोगिता-वच्छेदकता-महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतात्रितयस्मिन्, वर्तमानत्वात्, तदितरस्मिन् अवर्तमानत्वाच्च यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितारूपेण तादृशतार्णमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सुतरां धर्तुं शक्यते, प्रतियोगित्वावच्छेदकतात्वातिरिक्ताऽनवच्छिन्नत्वात् तादृशप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपिता तु अस्त्येवेति यावत्साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगिता-वच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण यावत्साध्यतावच्छेदकतावृत्ति-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-महानसीयत्व-वह्नित्वगतत्रित्वरूपावच्छिन्नानु-योगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितारूपेण च तादृशतार्णमहानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति तार्णमहानसीयवह्न्यभावः ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणासमन्वयात् स्यादेवाव्याप्तिः ।

एतदव्याप्तिनिवारणाय साध्यतावच्छेदकतानिष्ठप्रतियोगिताविशेषणविधया पर्याप्तिं निवेश्य 'यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिता-

य शो ल ता

निरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकता-निरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवम्, 'यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरण-निरूपितवृत्तित्वाभावः - इत्येवं वा लक्षणमेवाऽऽवश्यकम्, यतः तार्णत्वनिष्ठप्रतियोगितावच्छेदकता -महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतात्रितयवृत्तिप्रतियोगितायाः यावत्साध्यतावच्छेदकताविधया ग्राह्यमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यता-वच्छेदकताभिन्नतार्णत्वनिष्ठप्रतियोगितावच्छेदकतायामपि वर्तमानत्वात् यावत्साध्यतावच्छेदकता-पर्याप्तत्वं नैव सम्भवति, यावत्साध्यतावच्छेदकतायां वर्तमानायाः तदतिरिक्तेषु अवर्तमानायाः प्रतियोगितायाः एव यावत्साध्यतावच्छेदकतापर्याप्तत्वसम्भवात् । तथा च पूर्वोक्तरीत्या साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव ग्राह्या इति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात्, अतः महानसीय-वह्न्यभावः एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणाऽसमन्वयाभावान्न स्यादेवाऽव्याप्तिः ।

किन्तु एवं लक्षणाऽभ्युपगमे 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्रैव अव्याप्तिः स्यादेव, यतः यावत्साध्यतावच्छेदकता-पर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात्, किन्तु तादृशमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महान-सीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयस्मिन् वर्तते एव, तादृश-प्रतियोगितायाः वह्न्यभावीययावत्प्रतियोगितावच्छेदकताविधया ग्राह्यवह्नित्वनिष्ठप्रतियोगिता-वच्छेदकतायां वर्तमानत्वाद् यावत्प्रतियोगितावच्छेदकतावृत्तित्वमपि तादृशवह्नित्वनिष्ठप्रतियोगिता-वच्छेदकता-महानसीयत्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितायां भवेदिति यावत्साध्यता-वच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्व-रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितारूपेण तादृश-महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता धर्तुं

यशोलता

शक्यते । ततश्च तादृशप्रतियोगिताश्रयवह्नित्वनिष्ठप्रतियोगितावच्छेदकतानिरूपितप्रतियोगिता-निरूपकाभावविधया वह्न्यभावः धर्तुं शक्यते, वह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

पर्याप्तिनिवेशे च यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताविधया महानसीयत्वनिष्ठ-साध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता धर्तुं न शक्यते, यावत्प्रतियोगितावच्छेदकताविधया ग्राह्यवह्नित्वनिष्ठप्रतियोगितावच्छेदकताभिन्नमहानसीयत्व-निष्ठसाध्यतावच्छेदकतायामपि वर्तमानत्वात् तस्याः। तथा च यावत्प्रतियोगितावच्छेदकतापर्याप्त-प्रतियोगितारूपेण वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, परन्तु न सा यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीया । अतः महानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव पूर्वोक्तरीत्या धर्तव्या । तथा च तादृशमहानसीय-वह्न्यभावः एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्न स्यादेवाऽ-व्याप्तिरिति उभयत्र यावत्त्वनिवेशः पर्याप्तिनिवेशश्चैव आदरणीयः इति ।

अत्र स्पष्टप्रतिपत्त्यर्थं सुखावबोधार्थञ्च पूर्वप्रदर्शितपद्धत्या भङ्गकाः प्रदर्श्यन्ते -

	साध्यतावच्छेदकताकोटौ		प्रतियोगितावच्छेदकताकोटौ	
क्रमाङ्कः	यावत्त्वम्	पर्याप्तिः	यावत्त्वम्	पर्याप्तिः
१	अप्रविष्टम्	अप्रविष्टा	अप्रविष्टम्	अप्रविष्टा
२	अप्रविष्टम्	अप्रविष्टा	अप्रविष्टम्	प्रविष्टा
३	अप्रविष्टम्	अप्रविष्टा	प्रविष्टम्	अप्रविष्टा
४	अप्रविष्टम्	अप्रविष्टा	प्रविष्टम्	प्रविष्टा
५	अप्रविष्टम्	प्रविष्टा	अप्रविष्टम्	अप्रविष्टा
६	अप्रविष्टम्	प्रविष्टा	अप्रविष्टम्	प्रविष्टा
७	अप्रविष्टम्	प्रविष्टा	प्रविष्टम्	अप्रविष्टा
८	अप्रविष्टम्	प्रविष्टा	प्रविष्टम्	प्रविष्टा
९	प्रविष्टम्	अप्रविष्टा	अप्रविष्टम्	अप्रविष्टा
१०	प्रविष्टम्	अप्रविष्टा	अप्रविष्टम्	प्रविष्टा

य शो ल ता

११	प्रविष्टम्	अप्रविष्टा	प्रविष्टम्	अप्रविष्टा
१२	प्रविष्टम्	अप्रविष्टा	प्रविष्टम्	प्रविष्टा
१३	प्रविष्टम्	प्रविष्टा	अप्रविष्टम्	अप्रविष्टा
१४	प्रविष्टम्	प्रविष्टा	अप्रविष्टम्	प्रविष्टा
१५	प्रविष्टम्	प्रविष्टा	प्रविष्टम्	अप्रविष्टा
१६	प्रविष्टम्	प्रविष्टा	प्रविष्टम्	प्रविष्टा

अन्तिमभङ्गं परित्यज्य सर्वेऽपि दुष्टाः भङ्गाः । तद्यथा -

→ प्रथमभङ्गवर्तिलक्षणम् :-

साध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

दोषाः - पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतावह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितां साध्यतावच्छेदकतावृत्तिप्रतियोगितारूपेणादाय वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितां च प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितारूपेणादायाऽव्याप्तिः ।

च्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणे '**अव्याप्तिः**' इत्यत्रान्वयः । कुत्र स्थले इत्याह - **तार्णवह्नेः विषयितया** = विषयितासम्बन्धेन **साध्यतायां तज्ज्ञानत्वे सद्धेतौ**, अर्थात् पूर्वोक्ते 'अत्र तार्णवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन तार्णवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र, अत्र तज्ज्ञानत्वं यदि 'अयं घटः' - इत्यादिज्ञाननिष्ठं गृह्यते, तदा स्थलमिदमसद् भवेत्, ततश्च तत्र लक्षणाऽसमन्वयेऽपि न क्षतिः स्यादित्युक्तं **सद्धेतौ** इति, तथा च तज्ज्ञानत्वम् 'अत्र तार्णवह्निः' - इत्येतज्ज्ञाननिष्ठमेव ग्राह्यम्, तदैव तज्ज्ञानत्वस्य सद्धेतुत्वसम्भवात्, ततश्च तत्र **वह्नितार्णाभावमादाय** स्यादेव **अव्याप्तिः**, लक्षणाऽसमन्वयादिति ।

अव्याप्तिहेतुमाह - **प्रतियोगित्व-साध्यत्वयोः समानधर्म्मावच्छिन्नत्वात्।** अर्थाद् वह्नितार्णाभावीय-प्रतियोगिता प्रकृतस्थलीयसाध्यता च तार्णत्व-वह्नित्वोभयेनैवाऽवच्छिन्ना, तदतिरिक्तेनाऽनवच्छिन्ना इति तार्णत्व-वह्नित्वलक्षणसमानधर्मावच्छिन्ना । तदतिरिक्तेनाऽनवच्छिन्ना इति तार्णत्व -वह्नित्वलक्षणसमानधर्मावच्छिन्नत्वम् । अत्र धर्मनिष्ठं समानत्वं सङ्ख्यापेक्षं स्वरूपापेक्षञ्च बोध्यम् । तेन च केवलसङ्ख्यापेक्षसमानत्वविशिष्टेन धर्मेणाऽवच्छिन्नत्वेऽपि केवलस्वरूपापेक्ष-

●

સ્થલમાં સાધ્યતા તાર્ણત્વથી અને વહ્નિત્વથી અવચ્છિન્ન છે. અને વહ્નિતાર્ણઅભાવીય પ્રતિયોગિતા પણ તાર્ણત્વથી અને વહ્નિત્વથી અવચ્છિન્ન છે. (આનાથી, લક્ષણ પ્રમાણે કેવી રીતે અવ્યાપ્તિ આવશે તે ભાવાર્થમાંથી સમજી લેવું. સંક્ષેપમાં આ પ્રમાણે - સાધ્યતા અને પ્રતિયોગિતા સમાનધર્મથી અવચ્છિન્ન હોવાથી સાધ્યતાઅવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાનિરૂપક-પર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપ પણ તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વ થશે. અને વહ્નિતાર્ણાભાવીય-પ્રતિયોગિતાઅવચ્છેદકતામાં રહેલી પ્રતિયોગિતાનિરૂપકપર્યાપ્તીયઅનુયોગિતાઅવચ્છેદકરૂપ પણ તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વ જ થશે. માટે યથોક્ત લક્ષણનો સમન્વય થઈ જવાથી અવ્યાપ્તિ આવશે.)

ઉત્તર - આ પ્રમાણે જો તમે કહેતા હો તો...

समानत्वविशिष्टेन धर्मेणाऽवच्छिन्नत्वेऽपि साध्यत्व-प्रतियोगित्वयोः न अव्याप्त्यापत्तिः । यथा धर्मद्वयेनाऽवच्छिन्ना प्रकृततार्णत्व-वह्नित्वावच्छिन्ना साध्यता, महानसीयवह्न्यभावीयप्रतियोगिताऽपि महानसीयत्व-वह्नित्वावच्छिन्ना इति धर्मद्वयावच्छिन्ना स्यादेव, किन्तु न तमादायाऽव्याप्तिः सम्भवति, एवं महानसीयवह्न्यभावीयप्रतियोगितायाः प्रकृतसाध्यतायाश्च वह्नित्वलक्षणसमान-धर्मावच्छिन्नत्वेऽपि न तमादायाऽव्याप्तिः सम्भवति । तथा च यदि साध्यत्व-प्रतियोगित्वोभयं सङ्ख्यापेक्ष-स्वरूपापेक्षसमानत्वविशिष्टधर्मावच्छिन्नं भवेत् तदा तादृशस्थलेऽव्याप्तिः भवेदिति नियमाङ्गीकारे नास्त्यापत्तिः, अर्थाद् यावन्तः ये च धर्माः साध्यत्वस्यावच्छेदकाः तावन्तः ते च धर्माः प्रतियोगितायाः, अप्यवच्छेदकाः, तादृशाऽभिप्रेताऽभावाधिकरणे च हेतुः वृत्तिः तदा अव्याप्तिरपि वज्रलेपायिता, प्रकृते साध्यत्वावच्छेदके द्वे वह्नित्व-तार्णत्वलक्षणे, वह्नितार्णा-भावीयप्रतियोगितावच्छेदकेऽपि ते तावती च इति अव्याप्तिः वज्रलेपायिता, वह्नितार्णाभावाधिकरणे हेतोः वृत्तित्वात् । यत्र च एतादृशं साध्यत्व-प्रतियोगित्वयोः समानधर्मावच्छिन्नत्वं स्यात्, तत्र अभिप्रेताभावीयप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नावच्छेदकतात्व-न्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्तुं शक्यते एवेति भवति अव्याप्तिः ***इति दिक्*** ।

अत्रोत्तरमाह - **इति चेन्नेत्यादिना** । उत्तरग्रन्थस्यायमाशयः - यत्किञ्चित्साध्यतावच्छेद-कताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरू-पकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्व-

❋ અવ્યાપ્તિનું નિવારણ : ઉત્તરપક્ષ ❋

ઉત્તરપક્ષ :- (ન.) મહાશય ! આ અવ્યાપ્તિનું નિરાકરણ પૂર્વે અમે તમને દેખાડી જ ગયા છીએ. બહુ સરળ છે - આનું નિરાકરણ. હમણાં આ લક્ષણની અને અવ્યાપ્તિની વાત છોડો. સૌ પ્રથમ એક પ્રશ્નનો જવાબ આપો કે - તાર્ણવહ્નિઅભાવ અને વહ્નિતાર્ણઅભાવ એક કે જુદા જુદા ? જો એક તો એનો અર્થ એ થાય કે તાર્ણવહ્નિઅભાવ જ્યાં જ્યાં હોય ત્યાં વહ્નિતાર્ણઅભાવ હોય જ અને જ્યાં જ્યાં વહ્નિતાર્ણઅભાવ હોય ત્યાં ત્યાં તાર્ણવહ્નિઅભાવ હોય જ.

निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणानुसारेण 'अत्र तार्णवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन तार्णवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नितार्णाभावः तदैव धर्तुं शक्यते, यदा वह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्-साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्व-गतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वं निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वञ्च स्याताम् ।

अत्र वह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, नान्येन केनचिदिति तादृशवह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं वर्तते एव । किञ्च प्रकृते यत्किञ्चित्-साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व

●

જેમ કે ઘટ અને કંબુગ્રીવાદિમાન્ - બે એક જ વસ્તુ છે. અભિન્ન વસ્તુ છે. માટે, જ્યાં જ્યાં ઘટ છે ત્યાં ત્યાં કંબુગ્રીવાદિમાન્ છે જ. અને જ્યાં જ્યાં કંબુગ્રીવાદિમાન્ છે ત્યાં ત્યાં ઘટ છે જ. અરે ! ઘટ અને કંબુગ્રીવાદિમાન્ એક હોય તો બે સાથે જ રહે ને !

❄ तार्णवह्निअभाव - वह्नितार्णाभाव - બન્ને જુદા ❄

જેમ ઘટાભાવ અને ઘટાભાવાભાવાભાવ - આ બન્ને એક છે તો જ્યાં ઘટાભાવ હોય તો ત્યાં ઘટાભાવાભાવાભાવ હોય જ. અને જ્યાં ઘટાભાવાભાવાભાવ હોય ત્યાં ઘટાભાવ હોય જ. ઘટાભાવ હોય ને ઘટાભાવાભાવાભાવ ન હોય કે ઘટાભાવાભાવાભાવ હોય ને ઘટાભાવ ન હોય - તેવું બને નહીં.

ઘટ હોય ને કંબુગ્રીવાદિમાન્ ન હોય કે કંબુગ્રીવાદિમાન્ હોય ને ઘટ ન હોય - આવું શક્ય નથી. કારણ કે ઘટાભાવ અને ઘટાભાવાભાવાભાવ તથા ઘટ અને કંબુગ્રીવાદિમાન્ - આ પદાર્થો અભિન્ન છે તેથી જો તાર્ણવહ્નિઅભાવ અને વહ્નિતાર્ણાભાવ એક હોય તો જ્યાં જ્યાં તાર્ણવહ્નિઅભાવ હોય ત્યાં ત્યાં વહ્નિતાર્ણાભાવ હોવો જ જોઈએ. જ્યાં જ્યાં વહ્નિતાર્ણાભાવ હોય ત્યાં ત્યાં તાર્ણવહ્નિઅભાવ હોવો જ જોઈએ. તે જ રીતે જ્યાં જ્યાં

-वह्नित्वगतद्वित्वमेव भवति, अवच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नत्वनिवेशेऽपि तार्णत्वनिष्ठसाध्यता-वच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितायाः एव तार्णत्वनिष्ठसाध्यतावच्छेद-कतादिरूपयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण अवच्छेदकतात्वन्यून-वृत्तिसाध्यत्वाद्यवच्छिन्नप्रतियोगितारूपेण च ग्राह्यत्वाद् यत्किञ्चित्साध्यत्वावच्छेदकताऽवृत्तिधर्मानव-च्छिन्नावच्छेदकतात्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं तार्णत्व -वह्नित्वगतद्वित्वमेव स्यादिति नात्र विवादः, किन्तु तादृशतार्णत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयो-गितानिरूपकपर्याप्तीयत्वं वह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्ति-निरूपितत्वसम्बन्धावच्छिन्न -किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगितायां भवेत् तदैव वह्नितार्णाभावः धर्तुं शक्यते इति तदेव विचारणीयम्।

ननु किमत्र विचारणीयत्वम् ? स्पष्टमेव यत् तार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयत्वं वह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वर्तते एव, यतः यत्र प्रतियोगितावच्छेदकतादिकं वह्नित्वे तार्णत्वे चैव वर्तमानं भवेत्, इतरस्मिन् अवर्तमानं

●

तार्णवह्निअभाव न होय त्यां त्यां वह्नितार्णअभाव पण न ज होय अने जयां जयां वह्नितार्णअभाव न होय त्यां त्यां तार्णवह्निअभाव न ज होवो जोईए. मतलब के तार्णवह्निअभाव होय अने वह्नितार्णअभाव न होय - तेवुं न बनवुं जोईए. तथा वह्नितार्णअभाव होय अने तार्णवह्निअभाव न होय - तेवुं न बनवुं जोईए.

परंतु, वह्नितार्णअभाव अने तार्णवह्निअभावना केसमां आवुं कशुं ज शक्य बनतुं नथी. आमांनी एक पण शरत पळाती नथी. ते आ रीते - (एक स्पष्टता के आ तार्णवह्नि-अभाव अने वह्नितार्णअभाव - बन्ने अभाव विषयितासम्बन्धअवच्छिन्नप्रतियोगिताक छे एे लक्षमां राखी आगळनुं निरूपण जोवुं.)

❀ बन्ने अभाव वच्चे अभेद अशक्य ❀

'तार्णवह्निः अत्र वर्तते' - आ ज्ञानमां वह्नितार्णअभाव रहे छे, परंतु तार्णवह्निनो अभाव नथी रहेतो. कारण के तार्णवह्नि तेमां विषयितासंबंधथी रहे छे. ज्यारे आ ज्ञानमां वह्नितार्ण विषय बनतुं न होवाथी विषयितासंबंधथी वह्नितार्ण आ ज्ञानमां न रही शके.

भवेत्, अर्थात् तार्णत्व-वह्नित्वोभयपर्याप्तं भवेत् तत्र तार्णत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयप्रतियोगिता स्यादेव । वह्नितार्णाभावीयप्रतियोगितावच्छेदकताऽपि तार्णत्व-वह्नित्वोभयस्मिन्नेव पर्याप्ता, नान्यत्र इति वह्नितार्णाभावीयप्रतियोगितावच्छेदकतायां तार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता स्यादेवेति उक्तमेव पूर्वम् ***इति चेत्*** ?

न, उक्तं खलु, अयुक्तं तु उक्तम्, न हि तार्णत्व-वह्नित्वोभयस्मिन् पर्याप्तत्वमात्रेण वह्नितार्णाभावीयप्रतियोगितावच्छेदकतायां तार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपक-पर्याप्तीयप्रतियोगिता भवेत्, किन्तु यदि वह्नितार्णाभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-वह्नित्वगतद्वित्वं भवेत् तदैव वह्नितार्णाभावीय-प्रतियोगितावच्छेदकतायां तादृशप्रतियोगिता स्यात्। तदपि तदैव सम्भवति यदा तार्णत्व-वह्नित्वोभयावच्छिन्ना तादृशवह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता भवेत् । प्रकृतसाध्यता तु तार्णत्व-वह्नित्वोभयेनाऽवच्छिन्ना वर्तते, किन्तु वह्नितार्णाभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगिता न तार्णत्व-वह्नित्वोभयेन अवच्छिन्ना, किन्तु वह्नित्व-तार्णत्वो-भयेनैवाऽवच्छिन्ना ।

●

तथा '**वह्नितार्णम् अत्र वर्तते**' - આ જ્ઞાનમાં માત્ર વહ્નિતાર્ણ જ વિષય બને છે, તાર્ણવહ્નિ નહીં. માટે, વિષયિતાસંબંધથી વહ્નિતાર્ણ જ આ જ્ઞાનમાં રહી શકે, તાર્ણવહ્નિ નહીં. એટલે કે આ જ્ઞાનમાં તાર્ણવહ્નિઅભાવ રહે છે, કિંતુ વહ્નિતાર્ણાભાવ નથી રહેતો.

આ રીતે (૧) જ્યાં (= '**तार्णवह्निः अत्र वर्तते**' - આ જ્ઞાનમાં) વહ્નિતાર્ણઅભાવ રહે છે, ત્યાં તાર્ણવહ્નિઅભાવ પણ રહે જ - આવું કહી ન શકાય.

(૨) જ્યાં જ્યાં (= '**वह्नितार्णम् अत्र वर्तते**' - આ જ્ઞાનમાં) તાર્ણવહ્નિઅભાવ રહે છે ત્યાં ત્યાં વહ્નિતાર્ણઅભાવ પણ રહે જ - આવું કહી ન શકાય.)

(૩) જ્યાં જ્યાં (= **तार्णवह्निः अत्र वर्तते** - આ જ્ઞાનમાં) તાર્ણવહ્નિઅભાવ ન રહે ત્યાં ત્યાં વહ્નિતાર્ણઅભાવ પણ ન રહે - આ પ્રમાણે કહી ન શકાય.

(૪) જ્યાં જ્યાં (= **वह्नितार्णम् अत्र वर्तते** - આ જ્ઞાનમાં) વહ્નિતાર્ણઅભાવ ન રહે ત્યાં ત્યાં તાર્ણવહ્નિઅભાવ પણ ન રહે - આ પ્રમાણે પણ કહી શકાતું નથી.

ટૂંકમાં, તાર્ણવહ્નિઅભાવ અને વહ્નિતાર્ણઅભાવ એક નથી. આ વાત તો સ્વીકારવી

न च अहो ! का बुद्धिशीलता भवताम् ? तार्णत्व-वह्नित्वोभयमुच्यताम्, वह्नित्व -तार्णत्वोभयं वा ? को विशेषः ? ***इति वाच्यम्***, यतः महदन्तरम् । तिष्ठतु तावत् तत्कथा, आदौ उच्यताम् - विषयितासम्बन्धावच्छिन्नप्रतियोगिताकः तार्णवह्न्यभावः वह्नितार्णाभावश्चैकः एवाऽभ्युपगम्यते भिन्नौ वा ? आद्यः न हृद्यः, असम्भवात्। न हि तार्णवह्न्यभाव-वह्नि-तार्णाभावयोरैक्यं कश्चित् प्राज्ञः अङ्गीकुर्यात् । यतः प्रकृते विषयितासम्बन्धावच्छिन्नप्रतियोगिताकः तार्णवह्न्यभावः, वह्नितार्णाभावश्च गृह्येते, यदि तौ अभावौ अभिन्नौ भवेताम्, तदा यत्र यत्र तार्णवह्न्यभावः तत्र तत्र वह्नितार्णाभावः, यत्र यत्र च वह्नितार्णाभावः तत्र तत्र तार्णवह्न्यभावः स्यादेव, यत्र यत्र च तार्णवह्न्यभावाभावः अर्थाद् विषयितासम्बन्धेन तार्णवह्निः तत्र तत्र वह्नितार्णाभावाभावः अर्थाद् विषयितासम्बन्धेन वह्नितार्णं स्यादेव, यत्र यत्र च वह्नितार्णाभावाभावः अर्थाद् विषयितासम्बन्धेन वह्नितार्णमस्ति तत्र तत्र तार्णवह्न्यभावाभावः अर्थात् तार्णवह्निः विषयितासम्बन्धेन स्यादेव, तार्णवह्न्यभाव-वह्नितार्णाभावयोरैक्यात् ।

यथा घटाभाव-कम्बुग्रीवादिमदभावौ अभिन्नौ इति यत्र यत्र घटाभावः तत्र तत्र कम्बु-ग्रीवादिमदभावः विद्यते एव, भूतलादौ घटाभावसत्त्वे कम्बुग्रीवादिमद्वृत्तित्वस्याऽत्यन्तमसम्भवात्, यत्र यत्र च कम्बुग्रीवादिमदभावः तत्र तत्र घटाभावः स्यादेव। यत्र यत्र न घटाभावः =

જ રહી. તાર્ણવહ્નિઅભાવ અને વહ્નિતાર્ણઅભાવ છૂટા તો જ પડી શકે કે જો તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતા અને વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતા જુદી - જુદી પડે. કારણ કે પ્રતિયોગિતાના ભેદ વિના અભાવનો ભેદ થવો શક્ય નથી. જેમ કે ઘટાભાવ અને કંબુગ્રીવાદિમદ્ભાવ જુદા - જુદા નથી. કારણ કે ઘટાભાવીયપ્રતિયોગિતા પણ ઘટમાં રહે છે અને કંબુગ્રીવાદિમદભાવીયપ્રતિયોગિતા પણ ઘટમાં રહે છે - બન્ને પ્રતિયોગિતાઓ એક જ છે. પ્રતિયોગિતા એક છે. માટે, અભાવ પણ એક જ છે. જ્યારે ઘટાભાવ અને પટાભાવ એક નથી. કારણ કે ઘટાભાવીયપ્રતિયોગિતા ઘટમાં રહે છે અને પટાભાવીયપ્રતિયોગિતા પટમાં રહે છે -- બન્ને પ્રતિયોગિતાઓ એક નથી. માટે, ઘટાભાવ અને પટાભાવ પણ એક સંભવી ન શકે. તેથી નક્કી થાય કે - પ્રતિયોગિતા બદલાય તો જ અભાવ બદલાય. પ્રતિયોગિતાના ભેદ વિના = પ્રતિયોગિતાના બદલાવ વિના = પ્રતિયોગિતા ન બદલાય તો અભાવનો ભેદ = અભાવનો બદલાવ શક્ય નથી = અભાવ ન બદલાય.

વહ્નિતાર્ણઅભાવ અને તાર્ણવહ્નિઅભાવ બે જુદા-જુદા છે - એ હકીકત છે. વહ્નિતાર્ણ-

घटः विद्यते तत्र तत्र कम्बुग्रीवादिमदभावोऽपि न स्यादेव, अर्थात् कम्बुग्रीवादिमान् स्यादेव। यत्र यत्र च कम्बुग्रीवादिमदभावो न विद्यते तत्र तत्र घटाभावोऽपि नैव विद्यते, अर्थात् कम्बुग्रीवादिमान् यत्र विद्यते तत्र घटः विद्यते एव । एवं तार्णवह्न्यभाव-वह्नितार्णाभावयोः न सम्भवति, यतः अत्र तार्णवह्निः इत्येतज्ज्ञाने वह्नितार्णाभावः विषयितासम्बन्धावच्छिन्न-प्रतियोगिताकः वर्तते, तत्र तार्णवह्न्यभावः नास्ति एव, 'अत्र वह्नितार्णम्' - इत्येतज्ज्ञाने विषयितासम्बन्धावच्छिन्नप्रतियोगिताकः तार्णवह्न्यभावः विद्यते, तत्र वह्नितार्णाभावः न विद्यते। एवं तार्णवह्न्यभाव-वह्नितार्णाभावयोः ऐक्यं न सम्भवति ।

'अस्तु, मास्तु ऐक्यं तयोः, ततः प्रकृते किमायातम् ?' इति नैव वाच्यम्, तार्णवह्न्यभाव -वह्नितार्णाभावयोः भेदे तादृशाऽभावीयप्रतियोगितयोः भेदोऽपि अवश्यमभ्युपेयः, प्रतियोगिताभेदं विनाऽभावभेदाऽसम्भवः, न हि एकप्रतियोगिताकमभावद्वितयं सम्भवति, यथा घटाभाव -पटाभावयोः भेदे तदीया प्रतियोगिताऽपि भिन्ना एव ।

न च घटाभावप्रतियोगिताधिकरणविधया पटाभावप्रतियोगिताधिकरणविधया च घट -पटौ भिन्नौ प्राप्येते, तार्णवह्न्यभाव-वह्नितार्णाभावयोः प्रतियोगिताधिकरणविधया न भिन्न -भिन्नौ धर्मौ पदार्थौ वा प्राप्येते, तृणजन्यवह्निरेव तार्णवह्न्यभावप्रतियोगिताधिकरणविधया

અભાવ અને તાર્ણવહ્નિઅભાવ જુદા જો હોય તો તેની પ્રતિયોગિતા પણ જુદી હોવી જ જોઈએ. જો પ્રતિયોગિતા જુદી ન હોય તો અભાવ બદલાય નહીં. તે સિદ્ધાંત આપણે હમણાં જ દૃષ્ટાંત સાથે જોઈ લીધો છે.

✲ प्रतियोगिताना अधिकरण जुदा केवी रीते ? प्रश्न ✲

प्रश्न :- અરે ભાઈ ! તમારો સિદ્ધાંત તો સાચો. પણ પ્રસ્તુતમાં તેને લાગુ કેવી રીતે પાડવો ? કારણ કે ઘટાભાવ અને પટાભાવ - આ બન્નેની પ્રતિયોગિતા અલગ-અલગ અધિકરણમાં રહે છે. માટે, તે ભિન્ન-ભિન્ન હોઈ શકે. જ્યારે તાર્ણવહ્નિઅભાવીય અને વહ્નિતાર્ણાભાવીય પ્રતિયોગિતા તો એક જ અધિકરણમાં રહે છે. તેને કેવી રીતે છૂટી પાડવી ?

કહેવાનો આશય એ છે કે - તમે જણાવ્યું તે મુજબ પ્રતિયોગિતાના ભેદ વિના અભાવનો ભેદ ન થાય. માટે જ્યાં અભાવનો ભેદ હોય ત્યાં પ્રતિયોગિતાનો ભેદ હોય

वह्नितार्णाभावप्रतियोगिताधिकरणविधया च प्राप्यते इति कथं प्रतियोगिताभेदः अनुसर्तव्यः ? ***इति वाच्यम्***;

संयोगेन यत्र तार्णवह्निः विद्यते तत्र संयोगेन वह्नितार्णं विद्यते, यत्र संयोगेन वह्नितार्णं तत्र संयोगेन तार्णवह्निः विद्यते एव, यत्र च तार्णवह्न्यभावः संयोगसम्बन्धावच्छिन्न-प्रतियोगिताकः तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकः वह्नितार्णाभावः विद्यते एव, यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकः वह्नितार्णाभावः तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकः तार्णवह्न्यभावः विद्यते इति तार्णवह्नि-वह्नितार्णयोः तार्णवह्न्यभाव-वह्नितार्णाभावयोः संयोग-सम्बन्धसापेक्षैक्यसम्भवेऽपि विषयितासम्बन्धापेक्षैक्याऽसम्भवात्, विषयितासम्बन्धेन वह्नितार्णाभावा-धिकरणे तार्णवह्न्यभावाधिकरणे च तार्णवह्न्यभावस्य वह्नितार्णाभावस्य च तार्णवह्न्यधिकरणे वह्नितार्णाधिकरणे च वह्नितार्णस्य तार्णवह्नेश्च असत्त्वात् । तथा च विषयितासम्बन्धावच्छिन्न-प्रतियोगिताकवह्नितार्णाभावीयप्रतियोगिता वह्नितार्णे एव स्यात्, न तार्णवह्नौ, तार्णवह्न्यभावीय-प्रतियोगिता च तार्णवह्नौ एव स्यात्, न वह्नितार्णे इति प्रतियोगिताभेदः अवश्यं सिध्येत् ।

●

જ. જેમ કે ઘટાભાવ અને પટાભાવ - આ બન્ને અભાવની પ્રતિયોગિતા ક્રમશઃ ઘટમાં અને પટમાં રહે છે. માટે, બન્ને અભાવની પ્રતિયોગિતા ભિન્ન-ભિન્ન છે. તેથી, અભાવ પણ જુદા જુદા છે. ઘટાભાવની અને પટાભાવની વાત હોય તો આ તર્ક બરાબર છે. પરંતુ તાર્ણવહ્નિ-અભાવમાં અને વહ્નિતાર્ણઅભાવમાં આ તર્ક લાગુ પડી શકતો નથી. કારણ કે તમે હમણાં જ જણાવ્યું તે મુજબ તાર્ણવહ્નિઅભાવ અને વહ્નિતાર્ણઅભાવ જુદા - જુદા છે જ, પરંતુ તેની પ્રતિયોગિતા જુદી - જુદી નથી પડી શકતી. તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતા રહે છે તાર્ણવહ્નિમાં અને વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતા રહે છે વહ્નિતાર્ણમાં. બન્ને એક જ છે ને ! તાર્ણવહ્નિ કહો કે વહ્નિતાર્ણ - અર્થ તો એક જ છે. તૃણજન્ય વહ્નિમાં જ તે બન્નેની પ્રતિયોગિતા રહેશે. એક જ વસ્તુમાં રહેનારી બે પ્રતિયોગિતા ભિન્ન - ભિન્ન કેવી રીતે હોઈ શકે ?

ઉત્તર :- થોડી બુદ્ધિ કસો. જો તાર્ણવહ્નિઅભાવ અને વહ્નિતાર્ણાભાવ એક ન હોય તો તાર્ણવહ્નિ અને વહ્નિતાર્ણ એક કેવી રીતે હોય ? જે તર્કથી તાર્ણવહ્નિઅભાવ અને વહ્નિતાર્ણાભાવ છૂટા છે - એમ સાબિત કર્યું તે જ તર્કથી વહ્નિતાર્ણ અને તાર્ણવહ્નિ છૂટા પડી જ જશે. ભિન્ન અધિકરણમાં રહેલી પ્રતિયોગિતા પણ આ રીતે છૂટી પડી જ જશે. આમાં

प्रतियोगिताभेदसिद्धौ तदवच्छेदकभेदोऽपि अवश्यमनुसर्तव्यः, यतः प्रतियोगिताभेदे प्रतियोगितावच्छेदकभेदाऽवश्यम्भावात् । तथा च तार्णवह्न्यभावीयप्रतियोगितावच्छेदकं यत् तार्णत्व-वह्नित्वोभयं तदेव न वह्नितार्णाभावीयप्रतियोगितावच्छेदकम्, यच्च वह्नितार्णाभावीय-प्रतियोगितावच्छेदकं तदेव न तार्णवह्न्यभावीयप्रतियोगितावच्छेदकम् । तार्णत्व-वह्नित्वोभय -वह्नित्व-तार्णत्वोभययोः भेदः एवमनुगन्तव्यः - यदा 'तार्णवह्निः' इत्येवमुच्यते तदा वह्निमुद्दिश्य तार्णत्वं विधीयते, 'वह्नितार्णम्' - इत्येवं यदोच्यते तदा तार्णमुद्दिश्य वह्नित्वं विधीयते इति पूर्वापरभावेन उद्देश्य-विधेयभावनिर्णयः । तथा च तार्णवह्नौ = तार्णत्वविशिष्टवह्नौ यत्

●

મોટી - અઘરી વાત શું છે ?

⁂ प्रतियोगिताअवच्छेदक भेद पण केवी रीते ? ⁂

प्रश्न :- પ્રતિયોગિતા ભિન્ન - ભિન્ન અધિકરણમાં રહે એટલા માત્રથી થોડી બદલાઈ જાય ? ઘટાભાવીયપ્રતિયોગિતા ૧૦૦૦ ઘડામાં રહે છે, આ બધાં ઘડા પણ જુદા - જુદા અધિકરણ સ્વરૂપ જ છે ને ! તો પછી તેમાં રહેતી પ્રતિયોગિતાને પણ ભિન્ન - ભિન્ન માનવી પડશે. પણ, એવું છે નહીં. નિયમ એ છે કે પ્રતિયોગિતાઅવચ્છેદક બદલાય એટલે પ્રતિયોગિતા બદલાઈ જ જાય. હા ! અધિકરણ બદલાય એટલે પ્રતિયોગિતા બદલાય પણ ખરી, ન પણ બદલાય. કિંતુ જો પ્રતિયોગિતાઅવચ્છેદકધર્મ બદલાય એટલે પ્રતિયોગિતા બદલાઈ જ જાય. એક ધર્મથી અવચ્છિન્ન પ્રતિયોગિતા એક કહેવાય. અલગ-અલગ ધર્મથી અવચ્છિન્ન પ્રતિયોગિતા એક ન હોય. એટલે ચેનલ એમ ગોઠવાય કે જો અભાવ બદલાય તો પ્રતિયોગિતા અવશ્ય બદલાય અને પ્રતિયોગિતા બદલાય એટલે પ્રતિયોગિતાઅવચ્છેદક પણ અવશ્ય બદલાય જ. પ્રતિયોગિતાઅવચ્છેદકના ભેદ વિના પ્રતિયોગિતા ન બદલાય અને પ્રતિયોગિતાના ભેદ વિના અભાવ ન બદલાય. ઘટાભાવીયપ્રતિયોગિતા જુદા - જુદા ઘટમાં રહેતી હોવા છતાં તે માત્ર ઘટત્વ ધર્મથી જ અવચ્છિન્ન છે. માટે, ત્યાં પ્રતિયોગિતાભેદ કે અભાવભેદ માનવાની આવશ્યકતા રહેતી નથી. નિયમ એમ છે કે અભાવ બદલાય તો પ્રતિયોગિતા બદલાય જ. ઘટાભાવીયપ્રતિયોગિતા ઘટત્વથી અવચ્છિન્ન છે અને પટાભાવીય-પ્રતિયોગિતા પટત્વથી અવચ્છિન્ન છે. માટે, બન્ને પ્રતિયોગિતા ભિન્ન-ભિન્ન સાબિત થાય છે. આથી, ઘટાભાવ - પટાભાવ - આ બે અભાવ વચ્ચેનો ભેદ ઉપપન્ન થાય છે.

પરંતુ પ્રસ્તુતમાં આ વાતનો મેળ જામતો નથી. કારણ કે તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતા

तार्णत्वविशिष्टवह्नित्वं तद् उद्देश्य-विधेयाभावानुसारेण भासते, वह्नितार्णे = वह्नित्वविशिष्टतार्णे वह्नित्वविशिष्टतार्णत्वं तथैव भासते इति तार्णवह्न्यभावीयप्रतियोगितावच्छेदकविधया तार्णत्व-विशिष्टवह्नित्वं वर्तते, वह्नितार्णाभावीयप्रतियोगितावच्छेदकविधया वह्नित्वविशिष्टतार्णत्वं भासते इति वाच्यम्, तार्णत्वविशिष्टवह्नित्व-वह्नित्वविशिष्टतार्णत्वयोः भेदेन प्रतियोगितावच्छेदक-भेदसिद्धिः इति प्रतियोगित्वाभावभेदौ उपपन्नौ । तथा च तार्णवह्न्यभावीयप्रतियोगिता वह्नितार्णाभावीयप्रतियोगिता च न समानधर्मावच्छिन्ना इति स्थितम् ।

य शो ल ता

एतत्सिद्धौ च तार्णवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपञ्च भिन्नं भिन्नमेव स्यात्, नैकम्, तादृशप्रतियोगितयोः असमानधर्मावच्छिन्नत्वात् । तद्भेदश्चैवं भवेत् - तार्णवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-वह्नित्वगतद्वित्वम्, वह्नितार्णाभावीयप्रतियोगितावच्छेदकतानिष्ठ-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्व-तार्णत्वगतद्वित्वम् । तार्णत्व-वह्नित्वोभयं वह्नित्व-तार्णत्वोभयञ्चोक्तरीत्या भिन्नं भिन्नमङ्गीकर्तव्यमिति यस्मिन् ज्ञाने तार्णत्व-वह्नित्वोभयं

●

તાર્ણત્વ અને વહ્નિત્વથી અવચ્છિન્ન છે તથા વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતા પણ વહ્નિત્વ અને તાર્ણત્વથી અવચ્છિન્ન છે. બન્ને પ્રતિયોગિતાના અવચ્છેદક ધર્મ એક જ છે. અહીં ઉક્ત નિયમ ભાંગી પડે છે. કારણ કે તાર્ણવહ્નિઅભાવ અને વહ્નિતાર્ણઅભાવ વચ્ચેનો ભેદ તો છે જ. અભાવનો ભેદ હોય તો પ્રતિયોગિતાનો પણ ભેદ હોવો જ જોઈએ. માટે, વહ્નિ-તાર્ણઅભાવીયપ્રતિયોગિતાનો અને તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતાનો પણ ભેદ માનવો જ પડે. સાથે એમ પણ નિયમ છે કે પ્રતિયોગિતાનો ભેદ હોય તો પ્રતિયોગિતાઅવચ્છેદકનો ભેદ થઈ જ જાય. વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતાનો અને તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતાનો ભેદ માનવો હોય તો વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતાઅવચ્છેદક જે (૧) તાર્ણત્વ અને (૨) વહ્નિત્વ - આ બન્ને અને તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક જે (૨) તાર્ણત્વ અને વહ્નિત્વ - આ બન્ને - આ બે યુગ્મ વચ્ચે ભેદ હોવો જરૂરી છે. પણ, સ્પષ્ટ હકીકત એ છે કે આ બન્ને યુગ્મ વચ્ચે ભેદ છે જ નહીં. જો પ્રતિયોગિતાઅવચ્છેદકનો ભેદ ન હોય તો પ્રતિયોગિતાનો ભેદ ન સંભવે, પ્રતિયોગિતાનો ભેદ ન હોય તો અભાવનો ભેદ ન સંભવે. કોકળું આખું ગૂંચવાયેલું છે. કરશો શું ? આખા અમારા પ્રશ્નનો સારાંશ -

वि ना श्रा

भासते तस्मिन् ज्ञाने वह्नित्व-तार्णत्वोभयं भासेतैवेति न नियमः, एतदुभयद्वितयमपि भिन्न-भिन्नज्ञानविषयम् । पूर्वोक्तरीत्या तार्णत्व-वह्नित्वादेः जातित्वेन न तत्र द्वित्वसङ्ख्या गुणरूपा विद्यते, किन्तु अपेक्षाबुद्धिविशेषविषयतारूपा विद्यते इति तार्णत्व-वह्नित्वोभयसापेक्षा या अपेक्षाबुद्धिः तद्विषयता वह्नित्व-तार्णत्वोभयस्मिन् न भवेत्, वह्नित्व-तार्णत्वोभयसापेक्षा या अपेक्षाबुद्धिः तद्विषयता तार्णत्व-वह्नित्वोभयस्मिन् न भवेत् । ततश्च भिन्न-भिन्नापेक्षाबुद्धि-विषयता तार्णत्व-वह्नित्वोभयस्मिन् वह्नित्व-तार्णत्वोभयस्मिन् च वर्तते इति तादृशविषयतारूपा द्वित्वसङ्ख्याऽपि भिद्यते एवेति न तार्णत्व-वह्नित्वगतद्वित्वं वह्नित्व-तार्णत्वगतद्वित्वञ्चैकम् । तथा च तार्णवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-तार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नितार्णाभावीयप्रति-योगितावच्छेदकतायां न विद्यते एव, वह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितावच्छे-दकवह्नित्व-तार्णत्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता तार्णवह्न्यभावीय-प्रतियोगितावच्छेदकतायां नैव भवेदिति अङ्गीकर्तव्यमेव ।

य शो ल ता

●

❋ प्रस्तुत बे अभावीय प्र.अवच्छेदकनो भेद अशक्य ❋

(१) अभावभेदे प्रतियोगिताभेद - आ नियम छे.

(२) प्रतियोगिता अधिकरणभेदे भिन्न थाय - ते जरूरी नथी. परंतु प्रतियोगिता-अवच्छेदकभेदे अवश्य बदलाय. अथवा तो

प्रतियोगिता अधिकरणभेदे भिन्न थाय - आ नियम होय तो पण प्रतियोगिता बदलाय एटले प्रतियोगिताअवच्छेदके तो बदलावुं ज रह्युं. प्रतियोगिताअवच्छेदक एक होय अने प्रतियोगिता बदलाई जाय तेवुं न बने. आम,

वि ना भा

(१) अभावभेदे प्रतियोगिताभेद,

(२) प्रतियोगिताभेदे प्रतियोगिताअवच्छेदकभेद.

प्रस्तुतमां,

(१) वह्नितार्णअभाव अने तार्णवह्निअभाव - आ बन्ने वच्चे भेद छे. माटे, वह्नितार्णअभावीय अने तार्णवह्निअभावीय प्रतियोगिता वच्चे भेद होवो अनिवार्य छे. अने (२) वह्नितार्णअभावीयप्रतियोगिता अने तार्णवह्निअभावीयप्रतियोगिता वच्चे भेद होय तो वह्नितार्णअभावीयप्रतियोगिताअवच्छेदक अने तार्णवह्निअभावीयप्रतियोगिता-

प्रकृते तार्णवह्न्यभावीयप्रतियोगितासमाना साध्यता वर्तते, अर्थाद् वह्नितार्णाभावीय-प्रतियोगिता-तार्णवह्न्यभावीयप्रतियोगितयोः यत् सिद्धं तत्साध्यता-वह्नितार्णाभावीयप्रतियोगित-योरपि सिध्यति, तार्णवह्न्यभावीयप्रतियोगितावत् प्रकृतसाध्यतायाः अपि तार्णत्व-वह्नित्वोभयेन = तार्णत्वविशिष्टवह्नित्वेनाऽवच्छिन्नत्वात् । तथा च साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-वह्नित्वगतद्वित्वं भवेत्, वह्नितार्णाभावीयप्रतियोगिता-वच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्व-तार्णत्वगतद्वित्वं भवेत्, न चैतदुभयमपि समानम्, साध्यत्वस्य प्रतियोगित्वस्य च विभिन्नापेक्षाबुद्धिविषयत्वं यथा सर्वैरङ्गीक्रियते तथा तार्णत्व-वह्नित्वोभयस्य वह्नित्व-तार्णत्वोभयस्य च विभिन्नापेक्षाबुद्धिविषय-

●

અવચ્છેદક જે તાર્ણત્વ અને વહ્નિત્વ - તે વચ્ચે ભેદ હોવો અનિવાર્ય છે. પણ, તે છે નહીં. તો પછી અભાવભેદ કેમ સંભવે ?

❋ તાર્ણવહ્નિ - વહ્નિતાર્ણ વચ્ચેની ભેદરેખા ❋

ઉત્તર :- અહો બુદ્ધિકૌશલ્ય ! મહાશય ! જો આટલી સારી બુદ્ધિ પ્રશ્ન ઊઠાવવામાં લડાવી શકો છો તો પ્રશ્નના જવાબમાં પણ વિશિષ્ટ પ્રજ્ઞાનો ઉપયોગ કરો. આ પ્રશ્ન તો અમે તમને સામો પૂછી શકીએ છીએ. જુઓ, તાર્ણવહ્નિઅભાવ અને વહ્નિતાર્ણઅભાવ એક નથી, ભિન્ન - ભિન્ન છે. આ વાત તો તમે પણ સ્વીકારી જ લીધી છે. આ બન્ને અભાવને અભિન્ન તો તમે સ્વીકારતા જ નથી. માટે, તમારે પ્રતિયોગિતાઅવચ્છેદકને જુદા - જુદા પાડવા જ રહ્યા. બીજો કોઈ વિકલ્પ નથી. હવે, પ્રતિયોગિતાઅવચ્છેદકને કેવી રીતે જુદા પાડવા તે વિચારવાનું છે. બહુ સ્પષ્ટ વાત છે - આમ ૧ અને ૨, ૨ અને ૧ - આ બે યુગ્મ વચ્ચે કોઈ ભેદ નથી. પરંતુ ૧૨ અને ૨૧ વચ્ચે કેટલો આસમાન જમીનનો ફરક છે. ૧૨ માં ૧ અનન્તર ૨ છે. જ્યારે ૨૧ માં ૨ અનન્તર ૧ છે. મતલબ કે આનન્તર્યસંબંધથી ૧ વિશિષ્ટ ૨ = ૧૨ અને ૨ વિશિષ્ટ ૧ = ૨૧.

બસ, આ જ ગણિત વહ્નિતાર્ણ અને તાર્ણવહ્નિમાં લાગુ પાડવાનું છે. તાર્ણવહ્નિ-અભાવીયપ્રતિયોગિતાઅવચ્છેદકતા તાર્ણત્વવિશિષ્ટવહ્નિત્વમાં છે. અને વહ્નિતાર્ણાભાવીય-પ્રતિયોગિતાઅવચ્છેદકતા વહ્નિત્વવિશિષ્ટતાર્ણત્વમાં છે - આ પ્રમાણે તમારે સ્વીકારવું રહ્યું.

આ રીતે,

તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક તાર્ણત્વવિશિષ્ટવહ્નિત્વ થશે અને વહ્નિતાર્ણા-

त्वमङ्गीकार्यमेव । ततश्च तार्णत्व-वह्नित्वगतद्वित्वं वह्नित्व-तार्णत्वगतद्वित्वाद् भिन्नमेव । अतः वह्नित्व-तार्णत्वगतद्वित्वरूपं साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं नैव स्यात्, तार्णत्व-वह्नित्वगतद्वित्वञ्च वह्नितार्णाभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं नैव भवेदिति तार्णवह्निनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नितार्णाभावीयप्रतियोगितावच्छेदकतायां न सम्भवति, वह्नितार्णाभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-तार्णत्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता साध्यतावच्छेदकतायां न सम्भवतीत्यङ्गीकर्तव्यमेव ।

साध्यत्व-प्रतियोगित्वयोरसमानधर्मावच्छिन्नत्वसिद्धौ साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं, प्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपञ्च अभिन्ने कदापि न सम्भवतः, यतः साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपक्रपर्याप्त्यनुयोगितावच्छेदकं रूपम् = साध्यतावच्छेदकता यत्र पर्याप्त्या वर्तते तद्गता (= तत्पर्याप्ता) सङ्ख्या, एवमेव प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-

भावीयप्रतियोगिताअवच्छेदक वह्नित्वविशिष्टतार्णत्व थशे. प्रतियोगिताअवच्छेदक स्पष्ट रीते भिन्न-भिन्न थई गया. प्रतियोगिताअवच्छेदक भिन्न-भिन्न, माटे प्रतियोगिता पण भिन्न-भिन्न. तार्णवह्निअभाव अने वह्नितार्णाभाव - आ बन्ने पण भिन्न-भिन्न थई शकशे, संगत थई शकशे.

❁ अभावभेदे प्रतियोगिताभेद ❁

आ रीते ज्यारे प्रतियोगिताअवच्छेदक भिन्न-भिन्न करवा पड्या त्यारे प्रतियोगिताअवच्छेदकता पण भिन्न-भिन्न थशे. आ प्रतियोगिताअवच्छेदकतामां रहेल अवच्छेदकतात्वअवच्छिन्न जे प्रतियोगिता तन्निरूपकपर्याप्तिअनुयोगिताअवच्छेदक रूप पण एक नहीं थाय. भिन्न-भिन्न थशे. अपेक्षाबुद्धिविशेषविषयता स्वरूप तार्णत्व-वह्नित्वगतद्वित्व छे. आ वात पूर्वे जणावी गया छीओ. मतलब के बुद्धि बदलाय एटले ते द्वित्व वगेरे संख्या बदलाई जाय. तार्णत्व - वह्नित्व अने वह्नित्व - तार्णत्व भिन्न-भिन्न बुद्धिना विषय बनता होवाथी तार्णत्व-वह्नित्वगतद्वित्व अने वह्नित्व-तार्णत्वगतद्वित्व - आ बन्ने द्वित्व जुदा - जुदा थशे.

वच्छेदकरूपं नाम प्रतियोगितावच्छेदकता पर्याप्त्या यत्र वर्तते तत्रत्या सङ्ख्या एव । ततश्च साध्यत्व-प्रतियोगित्वयोरसमानधर्मावच्छिन्नत्वे साध्यतावच्छेदकता यत्र वर्तते, तत्र प्रतियोगितावच्छेदकता नैव स्यात्, अर्थात् साध्यतावच्छेदकता-प्रतियोगितावच्छेदकतयोः न सामानाधिकरण्यं समनियतत्वरूपमिति साध्यतावच्छेदकताधिकरणगतसङ्ख्या प्रतियोगितावच्छेदकताधिकरणगतसङ्ख्यातो विभिद्यते एव, साध्यतावच्छेदकताधिकरण-प्रतियोगितावच्छेदकताधिकरणयोरसमानत्वेन विभिन्नापेक्षाबुद्धिविषयत्वस्याऽवश्यं कल्पनीयत्वात् । असमानयोः विभिन्नज्ञानविषयत्वं न्याय्यमेव। यदि साध्यतावच्छेदकताधिकरणं प्रतियोगितावच्छेदकताधिकरणञ्च समानं स्यात्, ततः निश्चीयते यदुत यत् साध्यतावच्छेदकं तदेव प्रतियोगितावच्छेदकं वर्तते, यच्च प्रतियोगितावच्छेदकं तदेव साध्यतावच्छेदकं वर्तते इति साध्यत्व-प्रतियोगित्वयोः समानधर्मावच्छिन्नत्वमेव स्यात् । ततश्च साध्यत्व-प्रतियोगित्वयोः समानधर्मावच्छिन्नत्वे साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्य-

●

આ રીતે, તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાનિષ્ઠઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદક રૂપ તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વ થશે. અને વહ્નિતાર્ણાભાવીયપ્રતિયોગિતાઅવચ્છેદકતાનિષ્ઠ-અવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદક રૂપ વહ્નિત્વ-તાર્ણત્વગતદ્વિત્વ થશે. મતલબ કે બન્ને અભાવીયપ્રતિયોગિતાઅવચ્છેદકતાનિષ્ઠ-અવચ્છેદકતાત્વઅવચ્છિન્ન-પ્રતિયોગિતાનિરૂપક-પર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપ એક જ નથી, ભિન્ન-ભિન્ન છે. (આ વાત ઉપર વિસ્તૃત છણાવટ પૂર્વે કરી ગયા છીએ. માટે, પુનઃ એ બાબત ઉપર ચર્ચા નિરર્થક જણાવાથી છોડી દીધેલ છે.)

આટલું તો તમારે માનવું રહ્યું કે -

તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાનિષ્ઠ-અવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદક રૂપ તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વ થાય અને વહ્નિતાર્ણાભાવીયપ્રતિયોગિતાઅવચ્છેદકતાનિષ્ઠ-અવચ્છેદકતાત્વઅવચ્છિન્ન-પ્રતિયોગિતાનિરૂપક-પર્યાપ્તિઅનુયોગિતાઅવચ્છેદક રૂપ વહ્નિત્વ-તાર્ણત્વગતદ્વિત્વ થાય.

⁂ तार्णवह्निनिष्ठप्रतियोगितासमान प्रकृत साध्यता ⁂

આમાં જે તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતા છે તેની જગ્યાએ પ્રસ્તુત સ્થલમાં સાધ્યતા ગોઠવી દો. કારણ કે તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતા પણ તાર્ણવહ્નિમાં રહે. અને '**तार्णवह्निः**

नुयोगितावच्छेदकं रूपं प्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपञ्च एकमेवाङ्गीकार्यम्। साध्यत्व-प्रतियोगित्वयोश्च असमानधर्मावच्छिन्नत्वे साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूप-प्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपयोः भेदोऽपि अवश्यं स्यादेवेति सम्यग् विभावनीयम्।

ततश्च प्रकृते साध्यत्व-प्रतियोगित्वयोः तार्णत्वविशिष्टवह्नित्व-वह्नित्वविशिष्टतार्णत्वलक्षणाऽसमानधर्मावच्छिन्नत्वसिद्ध्या साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्व-प्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-तार्णत्वगतद्वित्वयोरपि भेदसिद्धेः साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता

●

अत्र वर्तते' - इत्येतज्ज्ञानं विषयितासम्बन्धेन तार्णवह्निमत्, तज्ज्ञानत्वात् - આ સ્થલમાં સાધ્યતા પણ તાર્ણવહ્નિમાં રહે છે. માટે, આ બન્ને સાધ્યતાને અને પ્રતિયોગિતાને સમાન ન્યાય લાગુ પડશે. એટલે ઉપરોક્ત બન્ને વાક્ય ફરીથી રીપીટ કરીએ -

તાર્ણવહ્નિનિષ્ઠસાધ્યતાઅવચ્છેદકતાનિષ્ઠ-અવચ્છેદકતાત્વઅવચ્છિન્ન-પ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદક રૂપ તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વ થશે. અને,

વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાનિષ્ઠ-અવચ્છેદકતાત્વઅવચ્છિન્ન-પ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપ વહ્નિત્વ-તાર્ણત્વગતદ્વિત્વ છે.

આ બન્ને રૂપ જુદા-જુદા છે. તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વઅવચ્છિન્નઅનુયોગિતાનિરૂપકપર્યાપ્તિપ્રતિયોગિતા સાધ્યતાઅવચ્છેદકતામાં જ રહે, વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતામાં ન રહે. તથા વહ્નિત્વ-તાર્ણત્વગતદ્વિત્વઅવચ્છિન્નઅનુયોગિતાનિરૂપકપર્યાપ્તિપ્રતિયોગિતા વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતામાં જ રહે. તાર્ણવહ્નિનિષ્ઠસાધ્યતાનિરૂપિતઅવચ્છેદકતામાં નહીં - આટલું તો હવે નક્કી માનવું જ રહ્યું. આ રીતે અવ્યાપ્તિ પણ સરળતાથી નીકળી જશે.

❇ તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વ વહ્નિત્વ-તાર્ણત્વગતદ્વિત્વ - જુદા જુદા ❇

પ્રસ્તુતમાં યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન-અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મઅવચ્છિન્ન-પ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદક રૂપ તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વ. આ તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વઅવચ્છિન્નઅનુયોગિતાનિરૂપકપર્યાપ્તીય-નિરૂપિ-

वह्नितार्णाभावीयप्रतियोगितावच्छेदकतायां वर्तमाना नैव स्यात् । प्रकृते साध्यतावच्छेदकतानिष्ठ-प्रतियोगिता तार्णत्वनिष्ठसाध्यतावच्छेदकतायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि च वर्तमानेन साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना गृह्यते, साध्यत्वावच्छेदकतात्वोभयभिन्नेन चानवच्छिन्ना इति तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकताऽ-वृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, ततश्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति-धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानु-योगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिः नैव भवति।

●

तत्वसंबंधअवच्छिन्न-प्रतियोगितानिष्ठ-अवच्छेदकताभिन्न-अवच्छेदकतात्वनिष्ठअवच्छेदकता-भिन्नअवच्छेदकताअनिरूपितप्रतियोगिताअधिकरणनिरूपितत्व वह्नितार्णाभावीयप्रतियो-गितामां रहे तो ज वह्नितार्णाभाव लई शकाय.

→ वह्नितार्णाभावीयप्रतियोगितामां तार्णत्व-वह्नित्वगतद्वित्वअवच्छिन्नअनुयोगिता-निरूपकपर्याप्तीय-निरूपितत्वसंबंधअवच्छिन्न-प्रतियोगितानिष्ठ-अवच्छेदकताभिन्न-अव-च्छेदकतात्वनिष्ठअवच्छेदकताभिन्नअवच्छेदकताअनिरूपितप्रतियोगिताअधिकरणनिरूपितत्व तो ज रहे के जो वह्नितार्णअभावीयप्रतियोगितानिरूपकप्रतियोगिताअवच्छेदकता तार्णत्व-वह्नित्वगतद्वित्वअवच्छिन्नअनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसंबंधअवच्छिन्न-प्रतियो-गितानिष्ठ-अवच्छेदकताभिन्न-अवच्छेदकतात्वनिष्ठअवच्छेदकताभिन्नअवच्छेदकताअनिरूपित-प्रतियोगिताथी विशिष्ट थई जाय.

→ वह्नितार्णाभावीयप्रतियोगितानिरूपकप्रतियोगिताअवच्छेदकता तो ज तार्णत्व -वह्नित्वगतद्वित्वअवच्छिन्नअनुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसंबंधअवच्छिन्न -प्रतियोगितानिष्ठ-अवच्छेदकताभिन्न-अवच्छेदकतात्वनिष्ठअवच्छेदकताभिन्नअवच्छेदकता-अनिरूपितप्रतियोगिताथी विशिष्ट तो ज थाय के जो वह्नितार्णअभावीयप्रतियोगितानिरूपक-प्रतियोगिताअवच्छेदकतामां रहेली प्रतियोगिता निम्नोक्त त्रण शरतमांथी पास थाय -

(१) तार्णत्व - वह्नित्वगतद्वित्वअवच्छिन्नअनुयोगितानिरूपक होय,

(२) पर्याप्तीय (= पर्याप्तिसंबंधअवच्छिन्न) होय अने

(३) निरूपितत्वसंबंधअवच्छिन्न-प्रतियोगितानिष्ठ-अवच्छेदकताभिन्न-अवच्छेदकतात्व-निष्ठअवच्छेदकताभिन्नअवच्छेदकताअनिरूपित होय.

तथा च वह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां प्रतियोगितावच्छेदकतात्वोभयावच्छिन्नत्वस्यैव सत्त्वात्, प्रतियोगितावच्छेदकतात्वोभयातिरिक्तावच्छिन्नत्वस्याऽसत्त्वाच्च निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य वर्तमानत्वेऽपि पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्याऽसत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति- धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण तादृशवह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं नैव शक्यते ।

●

❋ वह्नितार्णाभाव लेवा मथामण ❋

वह्नितार्णअभावीयप्रतियोगितानिरूपकप्रतियोगिताअवच्छेदकतामां रहेली प्रतियोगिता पर्याप्तीय पण होय अने निरूपितत्वसंबंधअवच्छिन्न-प्रतियोगितानिष्ठअवच्छेदकताभिन्न-अवच्छेदकतात्वनिष्ठअवच्छेदकताभिन्न-अवच्छेदकताअनिरूपित पण होय. परंतु, तार्णत्व-वह्नित्वगतद्वित्वअवच्छिन्नअनुयोगितानिरूपक न होय.

कारण के तादृशप्रतियोगितानुं अधिकरण एवी वह्नितार्णअभावीयप्रतियोगिता-अवच्छेदकता मात्र वह्नित्व अने तार्णत्व उभयमां रही जाय एटला मात्रथी एनामां तार्णत्व-वह्नित्वगतद्वित्वअवच्छिन्नअनुयोगितानिरूपकत्व रही न जाय. किंतु तादृशप्रतियोगिता-निरूपितअनुयोगिता ज्यां पण रहेती होय ते जो तार्णत्व-वह्नित्वगतद्वित्वथी विशिष्ट थाय तो ज तार्णत्व-वह्नित्वगतद्वित्वअवच्छिन्नअनुयोगितानिरूपकत्व तादृशप्रतियोगितामां रहे.

हमणां आपणे जोई गया के वह्नितार्णअभावीयप्रतियोगिताअवच्छेदकता वह्नित्व -तार्णत्वमां रहे छे. आ वह्नित्व-तार्णत्वमां वह्नित्व-तार्णत्वगतद्वित्व ज रहे. तार्णत्व -वह्नित्वगतद्वित्व नहीं. माटे, तादृशप्रतियोगिताअवच्छेदकतानिष्ठप्रतियोगितानिरूपित-अनुयोगिता वह्नित्व-तार्णत्वमां ज रहेती होवाथी तादृशअनुयोगिताअवच्छेदक रूप पण वह्नित्व-तार्णत्वगतद्वित्व ज थशे, तार्णत्व-वह्नित्वगतद्वित्व नहीं थाय.

माटे, तादृशप्रतियोगिताअवच्छेदकतामां रहेल प्रतियोगितामां वह्नित्व-तार्णत्वगत-

या तार्णवह्न्यभावीयप्रतियोगिता सा तु तार्णत्व-वह्नित्वोभयेनैव = तार्णत्वविशिष्टवह्नित्वेनैवाऽवच्छिन्ना, न वह्नित्व-तार्णत्वोभयेन = वह्नित्वविशिष्टतार्णत्वेनावच्छिन्ना इति पूर्वमुपदर्शितम् एव । तथा च साध्यत्व-तार्णवह्न्यभावीयप्रतियोगित्वयोः समानधर्मावच्छिन्नत्वसिद्ध्या साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं प्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपञ्चैकमेव स्यात्, अर्थात् साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया यत्तार्णत्व-वह्नित्वगतद्वित्वरूपं प्राप्यते तदेव तार्णत्व-वह्नित्वगतद्वित्वं तादृशतार्णवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं भवतीति तादृशतार्णवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता साध्यतावच्छेदकतायां स्यादेव, साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्तीयप्रतियोगिता साध्यतावच्छेदकतायां स्यादेव, साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्या-

य शो ल ता

●

द्वित्वअवच्छिन्नઅનુયોગિતાનિરૂપકત્વ જ રહેશે, તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વઅવચ્છિન્નઅનુયોગિતાનિરૂપકત્વ નહીં રહે. તેથી, વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાનિષ્ઠપ્રતિયોગિતા ઉક્ત બે શરતમાંથી પાસ થવા છતાં પણ પ્રથમ શરતમાંથી પાસ નહીં થઈ શકે.

તેથી, વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વઅવચ્છિન્ન-અનુયોગિતાનિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાથી વિશિષ્ટ નહીં થાય.

વિ

માટે, વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતામાં તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વઅવચ્છિન્ન-અનુયોગિતાનિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઆશ્રય-નિરૂપિતત્વ નહીં રહે.

ન

ભ્રા

⊠ वह्नितार्णाभाव લઈ નહીં શકાય ⊠

આ રીતે, વહ્નિતાર્ણઅભાવીયપ્રતિયોગિતા (૧) વહ્નિત્વ-તાર્ણત્વગતદ્વિત્વઅવચ્છિન્ન-અનુયોગિતાનિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઆશ્રયથી

प्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता च तार्णवह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव । तार्णवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठ-प्रतियोगिता प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, प्रतियोगित्वावच्छेदकतात्वोभयातिरिक्त-धर्मेणाऽनवच्छिन्ना एवेति निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽ-वच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपिता स्यादेव । साध्यता-वच्छेदकतानिष्ठप्रतियोगिताऽपि तार्णत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतो-भयवृत्तिसाध्यतावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, तदतिरिक्तेन न केनाऽपि अवच्छिन्ना इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्ना स्यादेव ।

●

નિરૂપિત હોવા છતાં પણ વહ્નિત્વ-તાર્ણત્વગતદ્વિત્વ સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મ-અનવચ્છિન્ન-અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતા-અવચ્છેદક ન હોવાથી, (૨) તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વ જ સાધ્યતાઅવચ્છેદકતાઅવચ્છેદકતા-અવૃત્તિધર્મઅનવચ્છિન્ન-અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિ-અનુયોગિતાઅવચ્છેદક હોવાથી અને (૩) તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વઅવચ્છિન્નઅનુયોગિતા-નિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠ-અવચ્છેદકતાભિન્નઅવચ્છેદક-તાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઆશ્રયથી નિરૂપિત ન હોવાથી સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન-અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મઅવચ્છિન્ન-પ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપઅવચ્છિન્નઅનુયોગિતાનિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતાનિષ્ઠઅવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવ-ચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિતપ્રતિયોગિતાઆશ્રયથી નિરૂપિત નહીં થાય.

❋ तार्णवह्निअभावने लईने लक्षणसमन्वय ❋

માટે, તાદશપ્રતિયોગિતાનિરૂપક વહ્નિતાર્ણાભાવ લઈ જ નહીં શકાય. તાર્ણવહ્નિઅભાવ જ લેવો પડશે. કારણ કે તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતામાં રહેલી જે પ્રતિયોગિતા તન્નિરૂપકપર્યાપ્તિઅનુયોગિતા તાર્ણત્વ-વહ્નિત્વગતદ્વિત્વથી અવચ્છિન્ન થઈ શકે છે. માટે, તાર્ણવહ્નિઅભાવીયપ્રતિયોગિતા સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન-અવચ્છેદકતાત્વ-ન્યૂનવૃત્તિધર્મઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપતાર્ણત્વ-વહ્નિત્વ-ગતદ્વિત્વઅવચ્છિન્નઅનુયોગિતાનિરૂપકપર્યાપ્તીય-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-પ્રતિયોગિતા-નિષ્ઠઅવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્નઅવચ્છેદકતાઅનિરૂપિત-

ततश्च तार्णवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वस्य च सत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण तादृशतार्णवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते एव। ततश्च तार्णवह्न्यभावोऽपि ग्राह्यः, किन्तु वह्नितार्णाभावः धर्तुं न शक्यते, तार्णवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतुरवृत्तिरेव स्यात्, यतः 'अत्र तार्णवह्निः' - इत्येतज्ज्ञाने एव तज्ज्ञानत्वहेतुः वर्तते, तत्र च तार्णवह्न्यभावः विषयितासम्बन्धावच्छिन्नप्रतियोगिताकः नैव कदापि सम्भवति । 'अत्र महानसीयवह्निः' - इत्यादिज्ञाने एव तार्णवह्नेरविषयतया विषयितासम्बन्धावच्छिन्नप्रतियोगिताकः तार्णवह्न्यभावः सम्भवति इति तादृशतार्णवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिः।

●

પ્રતિયોગિતાઆશ્રયથી નિરૂપિત થઈ જાય. પરિણામે, તાદશપ્રતિયોગિતાનિરૂપક તાર્ણવહ્નિ-અભાવ લઈ શકાય.

જો વહ્નિતાર્ણઅભાવ લઈ શકાયો હોત તો વહ્નિતાર્ણઅભાવના અધિકરણ તરીકે '**तार्णवह्निः अत्र वर्तते**' - આ જ્ઞાન જ મળી જાય. આ જ્ઞાનમાં તજ્જ્ઞાનત્વહેતુ વૃત્તિ હોવાથી લક્ષણસમન્વય ન થાય, અવ્યાપ્તિ આવી જાય.

પરંતુ, વહ્નિતાર્ણઅભાવ તો લઈ શકાય તેમ છે નહીં. તાર્ણવહ્નિઅભાવ જ લેવો પડશે. '**तार्णवह्निः अत्र वर्तते**' - આ જ્ઞાનમાં તો તાર્ણવહ્નિ વિષય બનતો હોવાથી વિષયિતાસંબંધઅવચ્છિન્નપ્રતિયોગિતાક તાર્ણવહ્નિઅભાવ ઉક્ત જ્ઞાનમાં રહે નહીં. તે સિવાયના જ્ઞાનમાં તાર્ણવહ્નિઅભાવ રહેશે. ત્યાં તજ્જ્ઞાનત્વહેતુ અવૃત્તિ હોવાથી લક્ષણસમન્વય થઈ જશે, અવ્યાપ્તિને કોઈ અવકાશ નહીં રહે.

આ પ્રમાણે મહાનસીયવહ્નિસાધ્યક સ્થલે પણ સમજી લેવું. પૂર્વે આ વાત આપણે જોઈ જ ગયા છીએ.

एवं यदि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवं लक्षणमङ्गीक्रियते तदापि 'अत्र तार्णवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन तार्णवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नितार्णाभावमादायाऽव्याप्तिः न सम्भवति, यतः पूर्वोक्तरीत्या यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नितार्णाभावीयप्रतियोगितावच्छेदकतायां न सम्भवति, प्रकृते यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तार्णत्व-वह्नित्वगतद्वित्वमेव लभ्यते, तार्णत्व-वह्नित्वगतद्वित्वं वह्नित्व-तार्णत्वगतद्वित्वं विभिन्नमिति सिद्धम्, वह्नितार्णाभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं वह्नित्व-तार्णत्वगतद्वित्वमेव भवति, न तार्णत्व-वह्नित्वगतद्वित्वमिति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नितार्णाभावीयप्रतियोगितावच्छेदकतायां न सम्भवति । तथा च वह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः वह्नित्वनिष्ठप्रतियोगितावच्छेदकता-तार्णत्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात्, तदितरेणाऽनवच्छिन्नत्वाच्च तादृशप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वस्य सत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य असत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-निरूपितत्वसम्बन्धावच्छिन्न-किञ्चिन्निष्ठप्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितावद् यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेणाऽपि तादृशवह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते ।

पूर्वोक्तरीत्या तार्णवह्न्यभावीयप्रतियोगितावच्छेदकतायां तार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वर्तते इति तादृशतार्णवह्न्यभावीयप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वस्य च (तार्णत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्नत्वात् तादृशतार्णवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः, तदितरेणाऽनवच्छिन्नत्वाच्च) सत्त्वात् तादृशतार्णवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितारूपेण धर्तुं शक्यते इति तार्णवह्न्यभावः धर्तुं शक्यते, न वह्नितार्णाभावः, तार्णवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया पूर्वोक्तरीत्या लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिः।

एवं 'यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताश्रयावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति यदि लक्षणमभ्युपगम्यते तदापि 'अत्र तार्णवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन तार्णवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नितार्णाभावमादायाऽव्याप्तिः नैव सम्भवति, यतः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया यत् तार्णत्व-वह्नित्वगतद्वित्वं प्राप्यते, न हि तेनैव तार्णत्व-वह्नित्वगतद्वित्वरूपेणाऽवच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नितार्णाभावीयप्रतियोगितावच्छेदकतायां सम्भवति । ततश्च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता वह्नितार्णाभावीयप्रतियोगितावच्छेदकतायां न सम्भवति, वह्नितार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वं सम्भवति, वह्नित्वनिष्ठप्रतियोगितावच्छेदकता-तार्णत्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगितायाः तादृशप्रतियोगितावच्छेदकताद्वितयातिरिक्ते अवर्तमानायाः यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वात् ।

ततश्च वह्नितार्णाभावीयप्रतियोगितावच्छेदकत्तावृत्तिप्रतियोगितायां यावत्साध्यतावच्छेदकत्ता-पर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्तार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगिता-निरूपकपर्याप्तीयत्वस्याऽसम्भवाद् यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वसत्त्वेऽपि यावत्साध्यता-वच्छेदकत्तापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपाव-च्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छेदकत्तापर्याप्तप्रतियोगितारूपेण तादृशवह्नि-तार्णाभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते ।

या तार्णवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तस्याम्, तार्णत्व-वह्नित्वगत-द्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः तार्णवह्न्यभावीयप्रतियोगितावच्छेदकत्तायां सम्भवात् तादृशप्रतियोगितायाः तार्णत्वनिष्ठप्रतियोगितावच्छेदकत्ता-वह्नित्वनिष्ठप्रतियोगितावच्छेद-कतोभयपर्याप्तत्वाच्च यावत्साध्यतावच्छेदकत्तापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-तार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयत्वमपि वर्तते, यावत्प्रतियोगितावच्छेदकत्तापर्याप्तत्वमपि इति यावत्साध्यतावच्छेदकत्तापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकतार्णत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीय-यावत्प्रतियोगितावच्छे-दकत्तापर्याप्तप्रतियोगितारूपेण तादृशतार्णवह्न्यभावीयप्रतियोगितावच्छेदकत्तावृत्तिप्रतियोगिता धर्तुं शक्यते इति तार्णवह्न्यभावः एव धर्तव्यः, न वह्नितार्णाभावः । तार्णवह्न्यभावाधिकरणे 'अत्र महानसीयवह्निः' - इत्याकारकज्ञानादौ तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽ-व्याप्तिरिति सर्वत्र लक्षणसमन्वयः, सर्वाण्यपि लक्षणानि न अव्याप्तिदुष्टानि इति अङ्गीकार्यमेव ।

एतदाशयेनाह - **इति** = 'अत्र तार्णवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीय-वह्निमत् तज्ज्ञानत्वाद् - इत्यत्र वह्नितार्णाभावीयप्रतियोगित्व-साध्यत्वयोः समानधर्मावच्छिन्नत्वाद् वह्नितार्णाभावमादायाऽव्याप्तिः इति **चेत्** = यदि उच्यते **तन्न** सम्भवति, तत्र कारणमाह - **प्रतियोगिते**त्यादि । अत्र पूर्वपक्षेण वह्नितार्णाभावीयप्रतियोगित्व-साध्यत्वयोः समानधर्मावच्छिन्नत्वं साधितम्, तदेव तिरस्कुर्वाणः ग्रन्थकारः आदौ तार्णवह्न्यभावीय-वह्नितार्णाभावीयप्रतियोगित्वयोः

●

❋ शब्दानुसारी शब्दभेदी अर्थ ❋

शब्दार्थ :- આ પ્રમાણે તમારે ન કહેવું. કારણ કે પ્રતિયોગિતાના ભેદ વિના અભાવનો ભેદ અસંભવિત હોવાથી (તાર્ણવહ્નિઅભાવીય અને વહ્નિતાર્ણઅભાવીય

न; प्रतियोगिताभेदं विनाऽभावभेदस्याऽसम्भवेन तार्णवह्न्यभाव-प्रतियोगितावच्छेदकत्वं तार्णत्वविशिष्टवह्नित्वे वह्नितार्णाभावप्रतियोगितावच्छेदकत्वं वह्नित्वविशिष्टतार्णत्वे वाच्यम्; तादृशावच्छेदकता-

समानधर्मानवच्छिन्नत्वं साधयति, तत्सिद्धौ तार्णवह्न्यभावीयप्रतियोगित्वस्थानीयसाध्यत्व-वह्नितार्णाभावीयप्रतियोगित्वयोरसमानधर्मावच्छिन्नत्वसिद्धेः दण्डापूपन्यायेन अवश्यम्भावात् । तत्र तार्णवह्न्यभावः वह्नितार्णाभावः - एतौ द्वावपि अभावौ अभिन्नौ इति सर्वथा वक्तुं न शक्यते, भिन्नाधिकरणत्वात्। ततश्च **प्रतियोगिताभेदं विनाऽभावभेदस्याऽसम्भवेन** वह्नितार्णाभाव-तार्णवह्न्यभावभेदोपपत्त्यर्थं वह्नितार्णाभावीयप्रतियोगित्व-तार्णवह्न्यभावीयप्रतियोगित्वयोः भेदस्याऽवश्यमङ्गीकरणीयत्वेन तद्भेदस्य प्रतियोगितावच्छेदकभेदाधीनत्वेन तादृशतार्णवह्न्यभावीयप्रतियोगितावच्छेदकताधिकरण-वह्नितार्णाभावीयप्रतियोगितावच्छेदकताधिकरणयोः भेदस्याऽवश्यमङ्गीकर्तव्यत्वात् **तार्णवह्न्यभावप्रतियोगितावच्छेदकत्वं तार्णत्वविशिष्टवह्नित्वे** = उद्देश्य-विधेयभावानुसारेण पूर्वोक्तरीत्या तार्णत्वविशिष्टवह्नौ वर्तमाने तार्णत्वविशिष्टवह्नित्वे **वह्नितार्णाभावप्रतियोगितावच्छेदकत्वं वह्नित्वविशिष्टतार्णत्वे वाच्यम्** । तथा च तार्णत्वविशिष्टवह्नित्व-वह्नित्वविशिष्टतार्णत्वयोः अभेदाभावस्य सर्वविदिततया तार्णत्वविशिष्टवह्नित्व-वह्नित्वविशिष्टतार्णत्वावच्छिन्नप्रतियोगितावच्छेदकताद्विकस्य तार्णत्वविशिष्टवह्नित्वे वह्नित्वविशिष्टतार्णत्वे च विभिन्नाधिकरणे सत्त्वात् तदवच्छिन्नयोः प्रतियोगित्वयोरसमानधर्मावच्छिन्नत्वं सिध्यति । असमानधर्मावच्छिन्नयोः प्रतियोगित्वयोः अवच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपैक्यमपि नैव सम्भवति ।

એમ જ કહેવું પડશે કે નિરૂપિતત્વસંબંધઅવચ્છિન્ન-સાધ્યતાનિષ્ઠ-અવચ્છેદકતાભિન્ન અને અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાભિન્ન. આ બન્નેનો અર્થ એ થશે કે નિરૂપિતત્વસંબંધ-અવચ્છિન્ન-સાધ્યતાનિષ્ઠ-અવચ્છેદકતાપ્રતિયોગિકભેદવાન્ અને અવચ્છેદકતાત્વનિષ્ઠ-અવચ્છેદકતાપ્રતિયોગિકભેદવાન્. આમાંથી આપણે અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતા-પ્રતિયોગિકભેદવાન્ ઉપર ધ્યાન કેન્દ્રિત કરીએ.

અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાપ્રતિયોગિકભેદવાન્ = અવચ્છેદકતાત્વનિષ્ઠ-અવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાનિરૂપકભેદવાન્. આપણે જે સાધ્યતાઅવચ્છેદકતાનિષ્ઠ-પ્રતિયોગિતા લીધી છે તે સાધ્યતા અને અવચ્છેદકતાત્વથી અવચ્છિન્ન છે. આમાં જે અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતા છે એ વાસ્તવમાં અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાથી ભિન્ન છે નહીં. પરંતુ, એ અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતા અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતા-ગગનઉભયભેદવાન્ તો છે જ. આ અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતા-ગગનઉભયભેદ અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાનિરૂપક છે અને ગગનનિષ્ઠપ્રતિયોગિતા-નિરૂપક છે. મતલબ કે અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતાધર્મ અવચ્છેદકતાત્વનિષ્ઠઅવ-

निरूपितत्वसम्बन्धावच्छिन्न-वह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता चैवाऽप्रसिद्धा, यतः वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता या साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना सा पूर्वं निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण गृहीता, किन्तु तादृश-प्रतियोगिता साध्यत्वावच्छेदकतात्वोभयेनाऽवच्छिन्ना इति साध्यतानिष्ठप्रतियोगितावच्छेदकता-निरूपितत्वम्, अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वञ्च तादृशप्रतियोगितायां स्यातामेव ।

य शो ल ता

●

ચ્છેદકતાનિષ્ઠપ્રતિયોગિતાનિરૂપકભેદવાન છે.

સાધ્યતાનિષ્ઠઅવચ્છેદકતાથી તો આ અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતા ભિન્ન છે જ. માટે, સાધ્યતાનિષ્ઠ-નિરૂપિતત્વસંબંધઅવચ્છિન્ન-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વનિષ્ઠ-અવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાનિરૂપક(અવચ્છેદકતા-ગગનઉભય)ભેદવિશિષ્ટઅવચ્છેદકતા તરીકે અવચ્છેદકતાત્વનિષ્ઠઅવચ્છેદકતા આવશે જ. અને પ્રતિયોગિતા આ અવચ્છેદકતાથી તો નિરૂપિત જ છે.

⁎ असंभव दोष आवी गयो ⁎

આમ, નિરૂપિતત્વસંબંધઅવચ્છિન્ન-સાધ્યતાનિષ્ઠ-અવચ્છેદકતાભિન્ન-અવચ્છેદકતાત્વ-નિષ્ઠઅવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાનિરૂપકભેદવિશિષ્ટઅવચ્છેદકતાઅનિરૂપિત એવી કોઈ પ્રતિયોગિતા જ નહીં મળે. આ રીતે લક્ષણઘટક પ્રતિયોગિતા અપ્રસિદ્ધ થતા લક્ષણ પણ અપ્રસિદ્ધ થઈ જ જશે. આ અપ્રસિદ્ધિ સાર્વત્રિક થતાં તે અસંભવ દોષનું સ્વરૂપ ધારણ કરી લેશે.

વિ ન ભ્રા

આ રીતે, પ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નના પણ દ્વિતીય પરિષ્કારમાં અસંભવ દોષ સમજી લેવો.

હવે, સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નનો જો પ્રથમ પરિષ્કાર સ્વીકારીએ તો (અને પ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નનો પણ પ્રથમ પરિષ્કાર જ સ્વીકારીએ તો) લક્ષણ આ પ્રમાણે થાય -

યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન-અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મ-

तत्र साध्यत्वनिष्ठप्रतियोगितावच्छेदकता निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतोभयभिन्ना, यतः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेदस्तु तादृशसाध्यतानिष्ठप्रतियोगितावच्छेदकतायां स्यादेव, अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदस्तु वर्तते एव । तत्र निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेदविशिष्टा साध्यतानिष्ठप्रतियोगितावच्छेदकता निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्ना स्यादेव, निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदस्य

●

અવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદક રૂપમાં યત્કિંચિત્સ્વાવચ્છેદકતા-અવૃત્તિધર્મઅનવચ્છિન્ન-અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિ-અનુયોગિતાઅવચ્છેદકત્વસંબંધથી વૃત્તિ પ્રતિયોગિતાનિરૂપકઅભાવઅધિકરણઅવૃત્તિત્વ.

❋ પ્રથમ પરિષ્કાર ઘટિત લક્ષણમાં પણ અસંભવ ❋

આ લક્ષણમાં પણ સ્થલ લઈએ - **पर्वतो वह्निमान् धूमात्**

આ સ્થલમાં લક્ષણસમન્વય કરવા માટે સાધ્યતાઅવચ્છેદકતામાં રહેલી કોઈ એવી પ્રતિયોગિતા મળવી જોઈએ કે જે યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મથી અનવચ્છિન્ન હોય અને અવચ્છેદકતાત્વન્યૂનવૃત્તિધર્મથી અવચ્છિન્ન હોય. પ્રસ્તુત સ્થલમાં જે વહ્નિત્વ-વૃત્તિસાધ્યતાઅવચ્છેદકતા છે તેમાં રહેલી પ્રતિયોગિતા માત્ર સાધ્યતાઅવચ્છેદકતાત્વથી જ અવચ્છિન્ન છે. આ સાધ્યતાઅવચ્છેદકતાત્વ સાધ્યતાઅવચ્છેદકતામાં વૃત્તિ ધર્મ જ છે અને અવચ્છેદકતાત્વ કરતાં ન્યૂનવૃત્તિ પણ છે. માટે, વહ્નિત્વવૃત્તિસાધ્યતાઅવચ્છેદકતામાં રહેલી આ પ્રતિયોગિતા યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન અને અવચ્છેદકતાત્વ-ન્યૂનવૃત્તિધર્મઅવચ્છિન્ન થશે જ.

પરંતુ પુનઃ અમારો પ્રશ્ન એ જ છે કે - યત્કિંચિત્સાધ્યતાઅવચ્છેદકતાઅવૃત્તિ એટલે શું ? તમે કહેશો કે - સાધ્યતાઅવચ્છેદકતામાં વૃત્તિ જે હોય તેનાથી ભિન્ન. મતલબ કે સાધ્યતાઅવચ્છેદકતાવૃત્તિમદ્ભિન્ન = સાધ્યતાઅવચ્છેદકતાવૃત્તિમન્નિષ્ઠપ્રતિયોગિતાનિરૂપક-ભેદવિશિષ્ટ. સાધ્યતાઅવચ્છેદકતાત્વ ધર્મ સાધ્યતાઅવચ્છેદકતામાં વૃત્તિમાન્ છે. અવૃત્તિ નથી = વૃત્તિમદ્ભિન્ન નથી. પરંતુ ગગન સ્વરૂપ તો સાધ્યતાઅવચ્છેદકતાત્વ નથી જ. માટે, જ્યારે એમ પૂછવામાં આવે કે સાધ્યતાઅવચ્છેદકતાત્વ વૃત્તિમદ્-ગગનઉભયસ્વરૂપ છે કે

तादृशप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकभेदरूपत्वात्, तादृशनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेदस्य तादृशप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता-निरूपकत्वाच्च । तथा च साध्यतावच्छेदकतानिष्ठप्रतियोगितायाः अपि साध्यत्वनिष्ठप्रतियोगिता-वच्छेदकतानिरूपितत्वेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्ना-ऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण अग्राह्यत्वमेव, साध्यत्वनिष्ठप्रतियोगितावच्छेदकतायाः निरूपितत्वसम्बन्धावच्छिन्न-साध्यत्वनिष्ठ-प्रतियोगितावच्छेदकतातोऽपि भिन्नत्वात्, अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतातोऽपि भिन्न-त्वाच्च। तथा च न काऽपि तादृशी प्रतियोगिता लभ्यते, या निरूपितत्वसम्बन्धावच्छिन्न-साध्यता-निष्ठ-प्रतियोगितावच्छेदकतातो भिन्ना अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतातोऽपि च भिन्ना या साध्यत्वादिनिष्ठप्रतियोगितावच्छेदकता तदनिरूपिता भवेत् । तथा च निरूपितत्वसम्बन्धा-वच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितायाः अप्रसिद्ध्या तद्घटितलक्षणाऽप्रसिद्धिः ।

ય
શો
ल
ता

●

ઉભયથી ભિન્ન છે ? જવાબ એ જ આવે કે સાધ્યતાઅવચ્છેદકતાત્વ વૃત્તિમદ્-ગગનઉભયભિન્ન છે. મતલબ કે સાધ્યતાઅવચ્છેદકતાત્વ વૃત્તિમન્નિષ્ઠપ્રતિયોગિતાનિરૂપક અને ગગનનિષ્ઠ-પ્રતિયોગિતાનિરૂપક ભેદથી વિશિષ્ટ જ થશે. અને પ્રતિયોગિતા આવા પ્રકારના - વૃત્તિમ-ન્નિષ્ઠપ્રતિયોગિતાનિરૂપકભેદવિશિષ્ટસાધ્યતાઅવચ્છેદકતાત્વ ધર્મથી અવચ્છિન્ન છે, અનવચ્છિન્ન નહીં.

આ રીતે, લક્ષણઘટકીભૂત સાધ્યતાઅવચ્છેદકતાઅવૃત્તિધર્મઅનવચ્છિન્ન પ્રતિયોગિતા જ અપ્રસિદ્ધ થતાં તદ્ઘટિતલક્ષણ પણ અપ્રસિદ્ધ થઈ જશે. આ જ તકલીફ બધાં સ્થળોમાં આવશે. માટે, અવ્યાપ્તિ કરતાં પણ વિકરાળ એવો અસંભવ દોષ આવી પડશે.

વિ
ન
ભ્રા

❋ सर्व लक्षणो असंभव दोषथी दुष्ट !! ❋

ટૂંકમાં, સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નના અને પ્રતિયોગિતાઅવચ્છેદકતાત્વ-અવચ્છિન્નના ત્રણેય પરિષ્કારો આ પ્રમાણે અસંભવદોષગ્રસ્ત થઈ જશે. માટે, એકેય પરિષ્કાર તમે લઈ શકો તેમ છો જ નહીં.

આ વાત માત્ર તમારી જિજ્ઞાસા શમાવવા માટે જ તમને જણાવી છે. બાકી હવેની અમારી બધી ચર્ચા માત્ર તૃતીયપરિષ્કારવાળા નિમ્નોક્ત લક્ષણના આધારે જ ચાલશે. તમે

एवं निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताऽपि अप्रसिद्धा एव, यतः लक्षणसमन्वयार्थं वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता गृह्यते, तादृशप्रति-योगिताऽपि प्रतियोगित्वावच्छेदकतात्वोभयेन तु अवच्छिन्ना भवेदेवेति वह्न्यभावीयप्रतियोगिता-वच्छेदकतावृत्तिप्रतियोगितायां प्रतियोगित्वनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वं वर्तते एव, तादृशप्रतियोगित्वनिष्ठप्रतियोगितावच्छेदकता अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतातोऽपि भिन्ना, प्रतियोगित्वनिष्ठप्रतियोगितावच्छेदकतातोऽपि च भिन्ना, यतः प्रतियोगितानिष्ठप्रतियोगिता-वच्छेदकताभिन्नत्वं नाम प्रतियोगितानिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकभेदः, यः प्रतियोगितानिष्ठप्रतियोगितावच्छेदकता-गगनोभयभेदः, तदीयप्रतियोगितायाः प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतायां गगने च सत्त्वात्, प्रतियोगितावृत्तिप्रतियोगितावच्छेदकतानिष्ठप्रतियो-गितानिरूपकः स्यादेव, तादृशोभयभेदस्य प्रतियोगितानिष्ठप्रतियोगितावच्छेदकतायां सत्त्वात् तत्र प्रतियोगितानिष्ठप्रतियोगितावच्छेदकताभेदः स्यादेवेति प्रतियोगितानिष्ठप्रतियोगितावच्छेदकता-निरूपिता प्रतियोगिता प्रतियोगितानिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपिता स्यात्, प्रतियोगितानिष्ठप्रतियोगितावच्छेदकतायाः प्रतियोगितानिष्ठप्रतियोगितावच्छेदकताभेदवत्त्वात्। तथा च निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतातोऽपि भिन्ना, अव-च्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतातोऽपि भिन्ना च या प्रतियोगितानिष्ठप्रतियोगिताव-च्छेदकता तन्निरूपितत्वस्यैव वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां प्राप्तेः निरूपि-

तमारी रीते ते - ते आपत्ति यथासंभव बाकीना परिष्कारोमां जोडता जजो. (वच्चे जे आपत्तिनुं निराकरण आवे ते पण.) तमे स्वीकारेलुं लक्षण (अने जयां पूर्वपक्ष चर्चा करवानो छे ते लक्षण) -

साध्यताअवच्छेदकतात्वअतिरिक्तधर्मअनवच्छिन्न-निरूपितत्वसंबंधअवच्छिन्न-साध्यता-निष्ठ-अवच्छेदकतानिरूपित(अथवा साध्यताअवच्छेदकतात्वअवच्छिन्न)प्रतियोगिता-निरूपकपर्याप्तिअनुयोगिताअवच्छेदक रूपमां स्वअवच्छेदकतात्वअतिरिक्तधर्मअनवच्छिन्न -(प्रतियोगिताअवच्छेदकतात्वअवच्छिन्न - अथवा)निरूपितत्वसंबंधअवच्छिन्न-प्रतियोगिता-निष्ठ-अवच्छेदकतानिरूपितप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकत्वसंबंधथी वृत्ति प्रतियोगितानिरूपकअभावअधिकरणअवृत्तित्व.

तत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितारूपेण तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते । अन्याऽपि तादृशी प्रतियोगिता कथं लभ्यते ? या प्रतियोगित्वावच्छेदकतात्वोभयेनाऽपि अवच्छिन्ना न भवेदिति सर्वत्र लक्षणाऽप्रसिद्धेरसम्भवदोषः एतल्लक्षणेऽपि दुर्वारः एव ।

ननु निरूपितत्वसम्बन्धावच्छिन्न..... इत्यादिलक्षणेऽस्तु असम्भवः, किन्तु 'स्वावच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगितावच्छेदकधर्मशून्यत्वसम्बन्धेन साध्यतावच्छेदकताऽवृत्तिरूपे यत्किञ्चित्स्वावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वर्तमानप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाऽनुसारेण 'यत्किञ्चित्स्वावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणानुसारेण वा कथमव्याप्तिः ? ***इति चेत्*** ? ***उच्यते*** - एतल्लक्षणद्वितयमपि असम्भवग्रस्तमेव, यतः पर्वतो वह्निमान् धूमाद् - इत्यत्र लक्षणसमन्वयार्थं वह्न्यभावः ग्राह्यः, वह्न्यभावः तदैव धर्तुं शक्यते प्रथमलक्षणानुसारेण यदा स्वावच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगितावच्छेदकधर्मशून्यत्वसम्बन्धेन साध्यतावच्छेदकताऽवृत्तिरूपे तादृशवह्न्यभावीयप्रतियोगिता यत्किञ्चित्स्वावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वर्तमाना भवेत् । अर्थाद् यद्रूपावच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगितावच्छेदकधर्मशून्यत्वं साध्यतावच्छेदकतायां नास्ति, तादृशवह्न्यभावीययत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगतानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि तदेव यदि भवेत्, तदा वह्न्यभावः धर्तुं शक्यते ।

किन्तु प्रकृते स्वावच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगितावच्छेदकधर्मशून्यत्वसम्बन्धेन साध्यतावच्छेदकतायामवृत्तिरूपमपि अप्रसिद्धम्, यत्किञ्चित्वह्न्यभावीयप्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताऽपि अप्रसिद्धा । तथा हि - वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितावच्छेदकधर्मशून्यत्वं वह्नित्वनिष्ठप्रकृतसाध्यतावच्छेदकतायां नास्ति। तत्र तादृशप्रतियोगितावच्छेदकधर्मशून्यत्वं नाम तादृशप्रतियोगितावच्छेदकधर्माभावः = तादृश-

प्रतियोगितावच्छेदकधर्मनिष्ठप्रतियोगितानिरूपकाभावः इत्यर्थः । वह्नित्वनिष्ठसाध्यतावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वेन तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतायां वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता सम्भवति, अतः वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितायाः साध्यत्वावच्छेदकतात्वोभयेनाऽवच्छिन्नत्वेन तादृशवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितावच्छेदकधर्मविधया साध्यत्वावच्छेदकतात्वोभयं तद्व्यक्तित्वं वा एव प्राप्यते, साध्यत्वावच्छेदकतात्वोभयं तद्व्यक्तित्वं वा यद्यपि वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तते एव, तदभावः नैव विद्यते तथापि साध्यतावच्छेदकतात्वोभयं गगनञ्चैतत्त्रितयं तद्व्यक्तित्व-गगनोभयं वा वह्नित्वनिष्ठसाध्यतावच्छेदकतायां नैव विद्यते इति साध्यतावच्छेदकतात्व-गगनाभावः तद्व्यक्तित्व-गगनोभयाभावः वा वह्नित्वनिष्ठसाध्यतावच्छेदकतायां स्यादेव, एतादृशसाध्यतावच्छेदकतात्व-गगनाभावीयप्रतियोगितायाः तद्व्यक्तित्व-गगनोभयाभावीयप्रतियोगितायाश्च प्रतियोगितावच्छेदकधर्मसाध्यत्वावच्छेदकतात्वोभयस्मिन् तद्व्यक्तित्वे च सत्त्वाद् वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितावच्छेदकधर्माभावविधया साध्यत्वावच्छेदकतात्वोभय-गगनाभावः तद्व्यक्तित्व-गगनोभयाभावः वा धर्तुं शक्यते एवेति तादृशाभावस्य साध्यतावच्छेदकतायां सत्त्वाद् वह्नित्वनिष्ठसाध्यतावच्छेदकतायां वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितावच्छेदकधर्माभावः एव स्यात्, अर्थाद् वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितावच्छेदकधर्मशून्यत्वं स्यादेवेति वह्नित्वगतैकत्वं स्वावच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगितावच्छेदकधर्मशून्यत्वसम्बन्धेन साध्यतावच्छेदकतायां वृत्ति एव भवेत्, न तु अवृत्ति इति न हि तादृशं रूपं प्राप्यते यद्रूपं स्वावच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगितावच्छेदकधर्मशून्यत्वसम्बन्धेन साध्यतावच्छेदकतायामवृत्ति भवेदिति तदप्रसिद्धिः दुर्वारा एव ।

य शो ल ता

एवं यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताऽपि अप्रसिद्धा, यतः यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नत्वं नाम यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मावच्छिन्नभिन्नत्वम् = यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मावच्छिन्नभेदः = यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मावच्छिन्ननिष्ठप्रतियोगितानिरूपकः भेदः। वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगित्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, तद्व्यक्तित्वेनैव वा, तत्र प्रतियोगित्वावच्छेदकतात्वोभयं तद्व्यक्तित्वं वा वह्नित्वनिष्ठ-प्रतियोगितावच्छेदकतायां वर्तते एवेति यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया अग्राह्यं

प्रतियोगित्वावच्छेदकतात्वोभयं तद्व्यक्तित्वं वा, यतः तादृशप्रतियोगितावच्छेदकतात्वोभयं तद्व्यक्तित्वं वा यस्यां कस्याञ्चिदपि प्रतियोगितावच्छेदकतायां न वर्तते इति न। किन्तु एवमपि यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया प्रतियोगिताऽवच्छेदकतात्वोभयं तद्व्यक्तित्वञ्च धर्तुं शक्येते, यतः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तित्वं = यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्माभिन्नत्वम् = यत्किञ्चित्प्रतियोगितावच्छेदकत्ववृत्तिधर्मभेदः = यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्मनिष्ठप्रतियोगितानिरूपकः भेदः । प्रतियोगित्वावच्छेदकतात्वोभयस्य यावत्प्रतियोगितावच्छेदकतायां वर्तमानत्वेन यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वमेव विद्यते इति प्रतियोगित्वावच्छेदकतात्वोभयस्मिन् यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्मभेदः न स्यात्, किन्तु यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्म-गगनोभयभेदस्तु प्रतियोगितावच्छेदकतात्वोभयस्मिन् स्यादेव, प्रतियोगितावच्छेदकतात्वोभयस्य यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्मरूपत्वेऽपि गगनरूपत्वाऽसम्भवात् । यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्मगगनोभयभेदीयप्रतियोगितायाः यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्मेऽपि सत्त्वाद् यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्मनिष्ठप्रतियोगितानिरूपकभेदरूपेण तादृशयत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्म-गगनोभयभेदः धर्तुं शक्यते ।

ततश्च प्रतियोगित्वावच्छेदकतात्वोभयस्मिन्, तथैव तद्व्यक्तित्वे च यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्म-गगनोभयभेदस्य सत्त्वाद् यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्मनिष्ठप्रतियोगितानिरूपकभेदः स्यादेवेति यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिधर्मभेदः स्यादेवेति यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिभिन्नत्वं = यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तित्वं स्यादेव, ततश्च प्रतियोगितावच्छेदकतात्वं तद्व्यक्तित्वं वा यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मविधया ग्राह्यमेव, न तु अग्राह्यम्, अतः तेन अवच्छिन्ना सा वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितारूपेण कथं धर्तुं शक्यते ? तथा च यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताऽप्रसिद्धा एव स्यात् । एवं सर्वत्र एतदप्रसिद्धेः सर्वत्र लक्षणसमन्वयाऽसम्भवात् स्यादेवाऽसम्भवः इति ।

एवं यत्किञ्चित्स्वावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-

वच्छेदकत्वसम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणानुसारेणाऽपि पर्वतो वह्निमान् धूमाद् - इत्यादौ सर्वत्र लक्षणाऽसमन्वयाद् भवत्येवाऽसम्भवः। तद्यथा - प्रकृते यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता यत्किञ्चित्प्रतियोगितावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता चाऽप्रसिद्धे । यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताऽप्रसिद्धिकारणं प्रागेवोपदर्शितम्, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिताऽप्रसिद्धिरपि तथैवाऽवगन्तव्या, यतः वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिसाध्यतावच्छेदकतात्वोभयस्याऽपि यत्किञ्चित्साध्यतावच्छेदकतावृत्तिधर्म-गगनोभयभेदवत्त्वेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तित्वात् तदवच्छिन्ना वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकत्वाऽवृत्तिधर्मानवच्छिन्ना कथं कथ्यते इति तदप्रसिद्धिः विभावनीया । एवं सर्वेषां लक्षणानामसम्भवग्रस्तत्वं दुरपह्नवमिति सिध्यति।

य शो ल ता

ननु अस्तु सर्वेषां लक्षणानामसम्भवग्रस्तत्वं किन्तु यावत्साध्यतावच्छेदकतापर्याप्तत्वघटितलक्षणानुसारेण नैव असम्भवः सम्भवति, अर्थाद् यावत्स्वावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवं लक्षणानुसारेणाऽसम्भवः कथं सम्भवति ? ***इति चेत्*** ? ***सत्यम्***, तथापि अव्याप्तिवारणाय यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितेतरप्रतियोगिताऽनिरूपकत्वादेरवश्यं प्रवेशनीयतया असम्भवस्यावश्यम्भावित्वात् ।

अयं भावः - उक्तलक्षणानुसारेण पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिः सम्भवति, यतः प्रकृते महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव विद्यते । अत्र महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता भिन्ना वह्नित्वनिष्ठसाध्यतावच्छेदकता च भिन्ना, महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता स्वरूपेण महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामपि भवेत्, वह्नित्वनिष्ठसाध्यतावच्छेदकतायामपि भवेत्, अर्थाद् महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपक-

पर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वं भवेत्, वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्, महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वप्राप्तेः, यत्प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं विद्यते तादृशप्रतियोगितायां महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन्नेव पर्याप्तत्वेऽपि स्वरूपेण तदधिकरणविधया केवलवह्नित्वनिष्ठसाध्यतावच्छेदकताऽपि लभ्यते एव । शिबिकावहनशक्तेः चतुर्षु पुरुषेषु एव पर्याप्तत्वे प्रत्येकस्मिन् तन्निह्नवाऽसम्भवात् तत्राऽपि तत्कल्पनम् ।

तत्र वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतादौ कुत्रापि नैव वर्तते, केवलवह्नित्वनिष्ठसाध्यतावच्छेदकतायामेव भवेत्, एवं महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिताऽपि वह्नित्वनिष्ठसाध्यतावच्छेदकतादौ नैव भवेत्, केवलमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायाम् एव भवेदिति वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्ता भवेदेव, तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्य प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वं स्यादेव, महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तिप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां स्यादेव, महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायां वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि च तादृशप्रतियोगितायाः वर्तमानत्वात्, तदतिरिक्तेषु कुत्राऽपि अवर्तमानत्वाच्च तादृशप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्ता भवेदेव, अर्थाद् महानसीयवह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं स्यादेव । तथा च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपे महानसीयवह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसत्त्वात् तादृशमहानसीयवह्न्यभावीयप्रतियोगिता यावत्स्वावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपे

वर्तमाना एव भवेदिति महानसीयवह्न्यभावो धर्तुं शक्यते, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एतदव्याप्तिनिवारणाय 'यावत्स्वावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमङ्गीकार्यम्, तथा च नोक्तरीत्या अव्याप्तिः सम्भवति, यतः पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं भवति, अत्र वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्ता भवति, किन्तु महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितां तु यावत्साध्यतावच्छेदकतापर्याप्ता कथं भवेत् ? साध्यतावच्छेदकतायां वृत्तित्वस्यापि विरहात् । तथा च महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगिता यावत्साध्यतावच्छेदकतापर्याप्तवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपिकाऽपि वर्तते, यावत्साध्यतावच्छेदकताऽपर्याप्तमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपिकाऽपि वर्तते, न केवलयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपिका एव वर्तते। अतः तादृशमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपिका प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्ताऽपि भवति, यावत्साध्यतावच्छेदकताऽपर्याप्ताऽपि, अर्थाद् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावि‌धया तादृशमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगिता प्राप्यते, महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकत्वात्, किन्तु यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावि‌धया तादृशमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगिता न गृह्यते, यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकत्वात् तादृशमहानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितायाः । तथा च यादृशाऽनुयोगितानिरूपकप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्ता एव भवेत्, यावत्साध्यतावच्छेदकताऽपर्याप्ता नैव भवेत्, तादृशाऽनुयोगिता एव यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकानुयोगितावि‌धया ग्राह्या, या वह्नित्वगतैकत्वरूपेणाऽवच्छिन्नानुयोगिता सा यावत्साध्यतावच्छेदकता-

पर्याप्तवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपिका एव वर्तते, वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिताभिन्नप्रतियोगितानिरूपिका तादृशवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगिता नास्त्येव, वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता तु यावत्साध्यतावच्छेदकतापर्याप्ता एव । ततश्च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकविधया तादृशवह्नित्वगतैकत्वरूपावच्छिन्नानुयोगिता धर्तुं शक्यते इति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत् । वह्नित्वगतैकत्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायां नैव सम्भवेदिति महानसीयवह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तीयप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं नैव भवेत्, किन्तु महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

ततश्च महानसीयवह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वस्य यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे असत्त्वाद् यावत्स्वावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे तादृशमहानसीयवह्न्यभावीयप्रतियोगिता नैव वर्तते इति महानसीयवह्न्यभावः नैव ग्राह्यः, किन्तु वह्न्यभावः एव ग्राह्यः, यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव अस्ति इति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसत्त्वाद् यावत्स्वावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे वह्न्यभावीयप्रतियोगितायाः वर्तमानत्वं सुसिद्धमिति वह्न्यभावः ग्राह्यः, तदधिकरणे च धूमहेतोः अवृत्तितया लक्षणाऽसमन्वयाभावात् कुतोऽव्याप्त्याशङ्का पर्वतो वह्निमान् धूमाद् - इत्यत्र ?

किन्तु एवं लक्षणाङ्गीकारेऽपि 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन

य शो ल ता

महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादायाऽव्याप्तिः दुर्वारा एव, यतः प्रकृते महानसीयत्व-वह्नित्वोभयस्मिन् साध्यतावच्छेदकता वर्तते, तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन्नेव वर्तमाना, तदतिरिक्तेषु चाऽवर्तमाना प्रतियोगिता एव यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वविधया गृह्यते, तादृशप्रतियोगितानिरूपिका एव, तद्भिन्नाऽनिरूपिका या पर्याप्त्यनुयोगिता तदवच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्, महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयपर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं विद्यते, तादृशपर्याप्त्यनुयोगिता यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपिका एव, यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपिका एव, महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयपर्याप्तप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तत्वात् । तथा च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् । वह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वेन वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव विद्यते, किन्तु महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयस्य महानसीयत्व-वह्नित्वोभयस्मिन्नेव वर्तमानत्वात् तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं भवेत् ।

अत्र महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाञ्च भिन्ना भिन्ना विद्यते, तत्र वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां वर्तमाना या महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तिसम्बन्धावच्छिन्ना प्रतियोगिता सा यावत्प्रतियोगितावच्छेदकतापर्याप्ता भवति इति महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकप्रतियोगितायाः यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वाद् यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं स्यादेवेति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपे यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छे-

दकत्वसत्त्वात् तादृशवह्न्यभावीयप्रतियोगिता यावत्स्वावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे वर्तमाना स्यादेवेति वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एतदव्याप्तिनिवारणाय प्रतियोगितावच्छेदकताकोटौ अपि तादृशपरिष्कारः निवेशनीयः इति लक्षणम् - 'यावत्स्वावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं भवेत्। तथा च नोक्ताऽव्याप्तिः, यतः

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वमेव विद्यते, पूर्वं च महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावविधया गृहीता, किन्तु तादृशानुयोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावविधया नैव गृह्यते, यतः तादृशानुयोगितानिरूपितप्रतियोगिता पूर्वोक्तरीत्या महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामपि विद्यते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि विद्यते, तत्र वह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्ता भवेत्, तादृशप्रतियोगितायाः वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामेव सत्त्वात्, तदतिरिक्तेषु कुत्राऽपि असत्त्वाच्च, किन्तु तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्ता नास्ति, वह्न्यभावीयप्रतियोगितावच्छेदकतायां तादृशप्रतियोगितायाः वृत्तितायाः अपि असत्त्वात् (वह्न्यभावीयप्रतियोगितावच्छेदकतानिरूपितवृत्तितायाः अपि तादृशप्रतियोगितायामसत्त्वादित्यर्थः) । तथा च महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां यावत्प्रतियोगितावच्छेदकतापर्याप्तवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकत्वमपि अस्ति, यावत्प्रतियो-

गितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नमहानसीयत्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता-निरूपकत्वमपि अस्ति, न तु यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकत्वमेव ।

ततश्च तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतो-भयवृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्त-प्रतियोगिताभिन्नमहानसीयत्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकत्वसत्त्वाद् यावद्वह्न्य-भावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितारूपेण तादृशमहानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्तिप्रतियोगिता-निरूपकपर्याप्त्यनुयोगिता नैव धर्तुं शक्यते, किन्तु वह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रति-योगितानिरूपकपर्याप्त्यनुयोगिता एव यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-भिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितांविधया धर्तुं शक्यते, यतः तादृशानुयोगितायां वह्नित्व-निष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकत्वमेव वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेद-कतावृत्तिप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वं नैव वर्तते, वह्नित्वनिष्ठप्रतियोगितावच्छेदकता-वृत्तितादृशप्रतियोगितायाः वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामेव वर्तमानत्वात्, तदतिरिक्तेषु कुत्राऽपि अवर्तमानत्वाच्च यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तत्वमपि अस्ति इति तादृशवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपिकायां तादृशाऽनु-योगितायां यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपक-त्वमपि स्यादेव । अतः यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिता-ऽनिरूपकपर्याप्त्यनुयोगितांविधया वह्नित्वनिष्ठप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपक-पर्याप्त्यनुयोगिता धर्तुं शक्यते । वह्नित्वनिष्ठप्रतियोगितावच्छेदकता वह्नित्वे एव पर्याप्ता इति वह्नित्वनिष्ठप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽपि वह्नित्वे एव स्यादिति तादृशवह्नित्वनिष्ठप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयो-गितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव स्यात्, अतः यावद्वह्न्यभावीयप्रतियोगितावच्छेदकता-पर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वमेव भवेत् ।

अतः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिता-

य शो ल ता

वच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपे यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वविरहात् तादृशवह्न्यभावीयप्रतियोगिता यावत्स्वावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदक-महानसीयत्व-वह्नित्वगतद्वित्वरूपे वर्तमाना नैव भवतीति वह्न्यभावोऽपि नैव धर्तुं शक्यते। या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता सा यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिताविधया धर्तुं शक्यते, यतः महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयवृत्ति-प्रतियोगितानिरूपकत्वमेव तादृशाऽनुयोगितायां विद्यते, एतत्प्रतियोगिताऽतिरिक्तप्रतियोगिता-निरूपकत्वं तादृशाऽनुयोगितायां नैव विद्यते, तादृशमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता -वह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-यामपि वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायामपि च वर्तमानत्वेन, तदतिरिक्तेषु कुत्राऽपि अवर्तमानत्वेन च यावद्महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तत्वं सम्भवत्येव । य शो ल ता

तथा च तादृशमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयपर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिता यावद्महानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपिका स्यादेव । महानसीयत्वनिष्ठ-प्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभयस्य महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वात् तादृशमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतोभय-पर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता महानसीयत्व-वह्नित्वोभयस्मिन्नेव भवेत्, तादृशानुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् । अतः यावद्महानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् । ततश्च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्न-प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपे यावद्महानसीय-वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिता-वच्छेदकत्वसत्त्वाद् यावत्स्वावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिता-वच्छेदकत्वसम्बन्धेन तादृशमहानसीयवह्न्यभावीयप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्त-

प्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपे वर्तमाना स्यादेवेति महानसीयवह्न्यभावः धर्तुं शक्यते, तादृशमहानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिः ।

तथा चाऽव्याप्तिनिवारणाय 'यावत्स्वावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणं परित्यज्य 'यावत्स्वावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिता-वच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमवश्यम-भ्युपेयमिति सिध्यति।

(ननु महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगितायाः 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र यावत्साध्यतावच्छेदकतापर्याप्तत्वं नैव सम्भवति । या प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्ता भवेत् तन्निरूपकपर्याप्त्यनुयोगिता वह्नित्वे एव स्यात्, यत्प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं स्यात्, न सा प्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्ता भवेत् । महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायां वह्नित्वनिष्ठसाध्यतावच्छेदकतायाञ्च वर्तमाना प्रतियोगिता भिन्ना, तथापि या प्रतियोगिता केवलवह्नित्वनिष्ठसाध्यतावच्छेदकतायां वर्तमाना वह्नित्वगतैकत्वावच्छिन्नानुयोगितानिरूपक-पर्याप्तीया, या च महानसीयत्वनिष्ठप्रतियोगितावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयस्मिन् वर्तमाना महानसीयत्व-वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीया - एतदुभयमपि भिन्नं भिन्नमेव । तथा च नास्त्युक्तरीत्याऽव्याप्तिरिति एतल्लक्षणाङ्गीकर्तारः वदन्ति इत्यपि बोध्यम्।

किञ्च, उक्तरीत्याऽव्याप्त्यापादने उक्तपरिष्कारकरणेऽपि 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्रापि अव्याप्तिः स्यात्, यतः महानसीयत्वनिष्ठसाध्यतावच्छेदकता-वह्नित्वनिष्ठसाध्यतावच्छेदकतोभयवृत्तिप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं वर्तते, तादृशमहानसीयत्व-

वह्नित्वगतद्वित्वरूपावच्छिन्नानुयोगितानिरूपकपर्याप्तीयप्रतियोगिता महानसीयत्वनिष्ठसाध्यतावच्छेदकतायां भिन्ना स्यात्, वह्नित्वनिष्ठसाध्यतावच्छेदकतायाञ्च भिन्ना। महानसीयत्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिताऽपि यावत्साध्यतावच्छेदकतापर्याप्ता न कथ्यते, वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिताऽपि इति तन्निरूपिका महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगिता यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपिका एव स्यात्, न तदनिरूपिका इति तादृशाऽनुयोगिताऽप्रसिद्ध्याऽव्याप्तिर्दुर्वारा एवेति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितायामेव पर्यवस्यति तादृशपरिष्कारः इति विभावनीयम् सूक्ष्मधीधनैः ***इति दिक्***।)

ततः एतल्लक्षणानुसारेणाऽसम्भवः दुर्निवारः, तथा हि - पर्वतो वह्निमान् धूमाद् - इत्यत्र लक्षणसमन्वयार्थं वह्न्यभावः ग्राह्यः, वह्न्यभावश्च तदैव धर्तुं शक्यते यदा वह्न्यभावीयप्रतियोगिता यावत्स्वावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपे वर्तमाना भवेत्, अर्थाद् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं चाऽभिन्नं स्यात् । किन्तु प्रकृते तु यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिता यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिता चैवाऽप्रसिद्धे, यतः पूर्वं वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावधिया गृहीता, तादृशानुयोगितायाः वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितायाः एव निरूपकत्वात्, तदतिरिक्तप्रतियोगितायाः अनिरूपकत्वात्, तादृशवह्नित्ववृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तत्वाच्च । किन्तु वस्तुतः तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नाऽस्ति, यतः पूर्वोक्तरीत्या यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नत्वं नाम यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिष्ठप्रतियोगितानिरूपकः भेदः । यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदः यावत्साध्यतावच्छेदकतापर्याप्तवह्नित्वनिष्ठसाध्यता-

वच्छेदकतावृत्तिप्रतियोगितायां भवत्येव, तादृशप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तरूपत्वसम्भवेऽपि गगनरूपत्वाऽसम्भवादिति 'एकसत्त्वेऽपि द्वयं नास्ति' इति न्यायेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदः यावत्साध्यतावच्छेदकतापर्याप्तायामपि वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां कक्षीकर्तव्यः एव ।

अयञ्च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिष्ठप्रतियोगितानिरूपकभेदरूपः, तादृशयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदनिरूपितप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितायामपि सत्त्वात् । ततश्च यावत्साध्यतावच्छेदकतापर्याप्तवह्नित्ववृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदसत्त्वे यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिष्ठप्रतियोगितानिरूपकभेदः अवश्यं स्यादिति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदस्य = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नत्वस्य वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां सत्त्वात् तादृशयावत्साध्यतावच्छेदकतापर्याप्तवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्ना । तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितनिरूपकपर्याप्त्यनुयोगितायां वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकत्वाऽवश्यम्भावात्, वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नत्वाच्च तादृशानुयोगिता यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नवह्नित्ववृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपिका एव भवेत्, अनिरूपिका नैव भवेत्, अत एव यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावि‌धया तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता नैव धर्तुं शक्यते, अन्याऽपि काऽनुयोगिता यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावि‌धया धर्तुं शक्यते ? इति तादृशाऽनुयोगिताऽप्रसिद्धिः दुर्वारा एव ।

एवं वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिताऽपि अप्रसिद्धा एव, पूर्वं वह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावि‌धया गृहीता, किन्तु तादृशानुयोगितायां वह्नित्वनिष्ठ-

प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकत्वं तु अस्त्येव, तादृशवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्ना, यतः यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नत्वं नाम यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभेदः = वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिष्ठप्रतियोगितानिरूपकः भेदः । यो यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदः तादृशभेदीयप्रतियोगितायाः वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितायामपि सत्त्वाद् वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिष्ठप्रतियोगितानिरूपकभेदविधया तादृशवह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदः धर्तुं शक्यते, तादृशोभयभेदः यावत्प्रतियोगितावच्छेदकतापर्याप्तवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामपि वर्तते, तादृशप्रतियोगितायाः वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितारूपत्वेऽपि गगनरूपत्वाऽभावात् । ततश्च वह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदसत्त्वाद् वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिष्ठप्रतियोगितानिरूपकभेदः स्यादेवेति वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभेदोऽपि स्यादेव, तथा च वह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकत्वस्य तादृशानुयोगितायां सत्त्वाद् यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकत्वं तादृशानुयोगितायां नैव स्यात्, किन्तु वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नवह्नित्ववृत्तिप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकत्वमेव स्यात्, तादृशानुयोगितायाः वह्नित्ववृत्तिप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकत्वात्, तादृशवह्नित्ववृत्तिप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायाः वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नत्वाच्च।

अतः तादृशाऽनुयोगिता (= यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्त-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता) यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितात्वविधया धर्तुं नैव शक्यते। ततः अन्या काऽनुयोगिता लभ्यते या वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपिका स्यादिति वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिताऽपि अप्रसिद्धा एव जाता इति दुर्वारोऽसम्भवदोषः, सर्वत्र तथैवाऽप्रसिद्ध्या लक्षणसमन्वयाऽसम्भवात् । एवञ्च सर्वाण्यपि लक्षणानि असम्भव-

या शो ल ता

गू ढा र्थ ***अथा***वच्छेदकतात्वावच्छिन्नत्वस्य तादृशावच्छेदकतात्वातिरिक्तधर्म्मानवच्छिन्नत्वरूपतया तादृशावच्छेदकतात्वस्यापि तादृशावच्छेदकतात्वगगनोभयभेदवत्त्वेनाऽसम्भवप्रसङ्गः ।

●

दोषदुष्टानि इति नात्र कोऽपि विवादावकाशः ।

एतत्सर्वं मनसिकृत्याह - **अथे**ति पूर्वपक्षोपप्रदर्शने, **अवच्छेदकतात्वावच्छिन्नत्वस्य** = साध्यतावच्छेदकतात्वावच्छिन्नत्वस्य सम्बन्धघटकाऽभिप्रेताऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नत्वस्य च पर्वतो वह्निमान् धूमाद् - इत्यत्र पूर्वोक्तरीत्या महानसीयवह्न्यभावमादाय 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादाय चाऽव्याप्तिवारणाय **तादृशावच्छेदकतात्वातिरिक्तधर्म्मानवच्छिन्नत्वरूपतया** = साध्यतावच्छेदकतात्वातिरिक्तधर्मानवच्छिन्नत्वरूपम्, तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वातिरिक्तधर्मानवच्छिन्नत्वरूपञ्चेति अवश्यं वाच्यतया **तादृशावच्छेदकतात्वस्याऽपि** साध्यतावच्छेदकतात्वस्य तादृशाभावीयप्रतियोगितावच्छेदकतात्वस्यापि च **तादृशावच्छेदकतात्व-गगनोभयभेदवत्त्वेन** = तादृशसाध्यतावच्छेदकतात्व-गगनोभयभेदवत्त्वेन तादृशाऽभिप्रेताभावीयप्रतियोगितावच्छेदकतात्व-गगनोभयभेदवत्त्वेन च साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितायाः अभिप्रेताऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितायाश्च साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वाऽभिप्रेताभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वप्रसङ्गात् तादृशसाध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नाऽभिप्रेताभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगित्वयोरप्रसिद्धेः

य शो ल ता

●

❀ वात એ જ, शब्दो ग्रंथकारना ❀

शब्दार्थ :- અવચ્છેદકતાત્વઅવચ્છિન્નત્વ એટલે આટલી ચર્ચા પછી આખરે તમારે તાદૃશઅવચ્છેદકતાત્વઅતિરિક્તધર્મઅનવચ્છિન્નત્વરૂપ જ કહેવાનું છે. અને તાદૃશ (= પ્રતિયોગિતા કે સાધ્યતા)અવચ્છેદકતાત્વ પણ તાદૃશ અવચ્છેદકતાત્વ-ગગનઉભયભેદથી વિશિષ્ટ હોવાથી અસંભવ દોષ આવશે.

वि न भा

કહેવાનો આશય એ છે કે -

સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નનો તમે અર્થ કર્યો - સાધ્યતાનિષ્ઠ-નિરૂપિતત્વસંબંધ-અવચ્છિન્ન.....એનો ફલિતાર્થ એ જ થયો કે સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્ન =

असम्भवप्रसङ्गः इति स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति लक्षणानुसारेण बोध्यम्, तद्दिशा अन्यत्राऽपि सर्वत्राऽसम्भवः परिभावनीयः ।

ननु एवं छलेनाऽसम्भवाऽऽपादानं न युज्यते । एवमापादनं तरङ्गवत्तरलं क्षणभङ्गुरं परिष्कारविनाश्यञ्च । तथा हि - स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येतत्स्थाने स्वावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकस्वावच्छेदकतात्वभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वत्वेतरधर्मानवच्छिन्न-

●

साध्यताअवच्छेदकतात्वअतिरिक्तधर्मअनवच्छिन्न. हवे आनो अर्थ थाय के साध्यताअवच्छेदकतात्वनिष्ठप्रतियोगितानिरूपकभेदविशिष्टधर्मअनवच्छिन्न. साध्यताअवच्छेदकतात्वअतिरिक्त धर्म तरीके साध्यताअवच्छेदकतात्व सिवायनी आखी दुनिया आवी जाय. हवे अमे तमने 'साध्यताअवच्छेदकतात्व पण साध्यताअवच्छेदकतात्वथी अतिरिक्त छे' - एम साबित करी आपीशुं. कारण के साध्यताअवच्छेदकतात्वअतिरिक्तधर्मअनवच्छिन्न = साध्यताअवच्छेदकतात्वनिष्ठप्रतियोगितानिरूपकभेदविशिष्टधर्मअनवच्छिन्न. साध्यताअवच्छेदकतात्व-गगनउभयभेद पण साध्यताअवच्छेदकतात्वनिष्ठप्रतियोगितानिरूपक छे ज. अने आ भेद तो खुद साध्यताअवच्छेदकतात्वमां पण रहेल छे. माटे, साध्यताअवच्छेदकतात्व पण साध्यताअवच्छेदकतात्वअतिरिक्तधर्म तरीके मळी जशे. टूंकमां, दुनियाना तमामे तमाम धर्मो साध्यताअवच्छेदकतात्वथी अतिरिक्त ज थई जशे. हवे एवी तो कई प्रतियोगिता मळे के जे साध्यताअवच्छेदकतामां रहेली होय अने कोई पण धर्मथी अवच्छिन्न न होय. ऊलटुं आगळ लक्षणमां तमे ज जणाव्युं छे के प्रतियोगिता साध्यताअवच्छेदकतात्वथी अवच्छिन्न पण होवी जोईए. आ तो वदतो व्याघात जेवुं थई गयुं. माटे, असंभव दोष दुर्वार बनशे.

❁ असंभवने असंभवित करवा मथामण ❁

प्रश्न :- (अव.) (आ प्रश्न हवे पूर्वपक्षनी सामे पूछवामां आवे छे. आ प्रश्नकार द्वारा असंभवनिराकरण करवानो प्रयत्न करवामां आवे छे.) अहो छलकौशल्यं भवतः !

प्रतियोगिताकसाध्यतावच्छेदकतात्वभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणमभ्युपेयम् ।

तथा च नाऽसम्भवः । तथा हि - पर्वतो वह्निमान् धूमाद् - इत्यत्र साध्यतावच्छेदकतात्वेन (तद्व्यक्तित्वेन वा) एवाऽवच्छिन्ना या प्रतियोगिता सा गृह्यते । सा साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्ना, यद्यपि साध्यतावच्छेदकतात्वेतरधर्मविधया साध्यतावच्छेदकतात्वमपि गृह्यते, तथापि साध्यतावच्छेदकतात्वनिष्ठभेदः साध्यतावच्छेदकतात्व-गगनोभयभेदरूपः । तादृशभेदीयप्रतियोगिता साध्यतावच्छेदकतात्वेऽपि वर्तते, किन्तु न केवलसाध्यतावच्छेदकतात्वे एव वर्तते, अपि तु गगनेऽपि वर्तते इति तादृशसाध्यतावच्छेदकतात्व-गगनोभयभेदनिरूपितप्रतियोगितावच्छेदकधर्मविधया साध्यतावच्छेदकतात्वत्वमपि प्राप्यते, गगनत्वमपि । अर्थात् साध्यतावच्छेदकतात्वत्वधर्मावच्छिन्न-गगनत्वधर्मावच्छिन्नप्रतियोगिताकः तादृशसाध्यतावच्छेदकतात्व-गगनोभयभेदः इति साध्यतावच्छेदकतात्वत्वेतरगगनत्वधर्मावच्छिन्नप्रतियोगिताकत्वात् तादृशसाध्यतावच्छेदकतात्व

●

छल तो बहु सारी रीते करी जाणो छो महाशय ! परंतु चिंता नहीं. आपना छलनो जवाब पण अमारी पासे तैयार छे. लक्षण तो छे तृतीय परिष्कारनुं ज. फक्त एमां अमे नवो परिष्कार करी दईए छीए. हवे अमारुं लक्षण आ प्रमाणे थशे -

❋ नूतनपरिष्कारघटित लक्षण ❋

एवम् एतल्लक्षणानुसारेण प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिता... इत्यादिस्थाने प्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिता..... इत्यादिपरिष्कारः आदृतः । तत्र पुनः वह्न्यभावीयप्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदाऽप्रसिद्धिः, यतः प्रतियोगितावच्छेदकतात्व-गगनोभयभेदनिवारणाय प्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेद... इत्यादि परिष्कारः कृतः, तादृशोभयभेदीयप्रतियोगितायाः प्रतियोगितावच्छेदकतात्वत्वेतरगगनत्वेनाऽपि अवच्छिन्नत्वेन उक्तपरिष्कारे कृते तादृशभेदस्याऽग्राह्यत्वसिद्धेः, किन्तु तादृशपरिष्कारानुसारेण अन्यः को भेदः प्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया धर्तुं शक्यते ? यः प्रतियोगितावच्छेदकतात्वभेदः शुद्धः सोऽपि प्रतियोगितावच्छेदकतात्वत्वेनाऽवच्छिन्नप्रतियोगिताकः भवत्येव, प्रतियोगितावच्छेदकतात्वत्वञ्च प्रतियोगितावच्छेदकतात्वत्वेतरत्, यतः प्रतियोगितावच्छेदकतात्वत्वेतरत्वं = प्रतियोगितावच्छेदकतात्वत्वनिष्ठप्रतियोगिताकभेदः, प्रतियोगितावच्छेदकतात्वत्व-गगनोभयभेदीयप्रतियोगिताऽपि प्रतियोगितावच्छेदकतात्वत्वे वर्तते इति प्रतियोगितावच्छेदकतात्वत्व-गगनोभयभेदः प्रतियोगितावच्छेदकतात्वत्वनिष्ठप्रतियोगिताकभेदविधया धर्तुं शक्यते, तादृशभेदश्च प्रतियोगितावच्छेदकतात्वत्वे वर्तते इति तस्मिन्

દઈશું. આનો કોઈ નિવેડો જ તમે લાવી નહીં શકો. કારણ કે સાધ્યતાઅવચ્છેદકતાત્વત્વ-અતિરિક્તનો પણ ખુલાસો સાધ્યતાઅવચ્છેદકતાત્વત્વત્વઅતિરિક્તધર્મઅનવચ્છિન્નપ્રતિયોગિતાકભેદવિશિષ્ટ કરવામાં આવે તો પણ પૂર્વવત્ દોષ તો આવવાનો જ. આવી રીતે પરિષ્કાર કરે રાખવામાં તો અનવસ્થા દોષ આવી પડશે.

❋ પરિષ્કારોનો અંત ન આવતા અનવસ્થા ❋

કહેવાનો આશય એ છે કે - તમે જણાવ્યું તે મુજબ જે ધર્મ સાધ્યતાઅવચ્છેદકતાત્વત્વ-અતિરિક્તધર્મઅનવચ્છિન્ન-સાધ્યતાઅવચ્છેદકતાત્વનિષ્ઠપ્રતિયોગિતાનિરૂપકભેદવિશિષ્ટ હોય તે ધર્મ સાધ્યતાઅવચ્છેદકતાત્વથી અતિરિક્ત કહેવાય. શુદ્ધસાધ્યતાઅવચ્છેદકતાત્વભેદીયપ્રતિયોગિતા માત્ર સાધ્યતાઅવચ્છેદકતાત્વત્વથી જ અવચ્છિન્ન છે. તદતિરિક્ત કોઈ ધર્મથી અવચ્છિન્ન નથી. માટે, શુદ્ધ સાધ્યતાઅવચ્છેદકતાત્વભેદ જ સાધ્યતાઅવચ્છેદકતાત્વત્વ-અતિરિક્તધર્મથી અનવચ્છિન્નપ્રતિયોગિતાનિરૂપક કહેવાય. સાધ્યતાઅવચ્છેદકતાત્વ-ગગનઉભયભેદ સાધ્યતાઅવચ્છેદકતાત્વત્વઅતિરિક્ત ગગનત્વ ધર્મથી અવચ્છિન્ન છે. માટે, સાધ્યતાઅવચ્છેદકતાત્વ-ગગનઉભયભેદ ન લઈ શકાય. પરંતુ, સાધ્યતાઅવચ્છેદકતાત્વત્વ-

प्रतियोगितावच्छेदकतात्वत्वनिष्ठप्रतियोगितानिरूपकभेदः स्यादेव इति प्रतियोगितावच्छेदकतात्वत्वेतरत्वमपि स्यादेव । ततः प्रतियोगितावच्छेदकतात्वत्वेनाऽवच्छिन्ना सा प्रतियोगितावच्छेदकतात्वभेदीयप्रतियोगिता प्रतियोगितावच्छेदकतात्वत्वेतरधर्मावच्छिन्ना स्यादेव, प्रतियोगितावच्छेदकतात्वत्वस्यैव पूर्वोक्तरीत्या प्रतियोगितावच्छेदकतात्वत्वेतरत्वात् । तथा च प्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया प्रतियोगितावच्छेदकतात्वभेदस्य शुद्धस्याऽप्यप्राप्तौ अन्यः को भेदः धर्तुं शक्यः भवेदिति तादृशभेदाऽप्रसिद्ध्या सर्वत्र तथैवाऽप्रसिद्धेश्च असम्भवः दुर्निवार एव ।

●

અતિરિક્ત એટલે શું ? સાધ્યતાઅવચ્છેદકતાત્વત્વનિષ્ઠપ્રતિયોગિતાનિરૂપકભેદવિશિષ્ટ = સાધ્યતાઅવચ્છેદકતાત્વત્વઅતિરિક્ત - આ પ્રમાણે જો કહો તો સાધ્યતાઅવચ્છેદકતાત્વત્વ ધર્મ જ સાધ્યતાઅવચ્છેદકતાત્વત્વથી અતિરિક્ત થઈ જશે. કારણ કે સાધ્યતાઅવચ્છેદકતાત્વત્વ સાધ્યતાઅવચ્છેદકતાત્વત્વથી ભિન્ન ન હોવા છતાં પણ સાધ્યતાઅવચ્છેદકતાત્વત્વ-ગગનઉભયથી તો ભિન્ન જ છે. આ સાધ્યતાઅવચ્છેદકતાત્વત્વ-ગગનઉભયભેદ પણ સાધ્યતાઅવચ્છેદકતાત્વત્વનિષ્ઠપ્રતિયોગિતાનિરૂપક તો છે જ, ઉપરાંતમાં ગગનનિષ્ઠપ્રતિયોગિતાનિરૂપક પણ છે. માટે, સાધ્યતાઅવચ્છેદકતાત્વત્વનિષ્ઠપ્રતિયોગિતાનિરૂપકભેદ તરીકે આ સાધ્યતાઅવચ્છેદકતાત્વત્વ-ગગનઉભયભેદ લઈ જ શકાશે. સાધ્યતાઅવચ્છેદકતાત્વત્વ આ ભેદવિશિષ્ટ જ છે. માટે, સાધ્યતાઅવચ્છેદકતાત્વત્વધર્મ જ સાધ્યતાઅવચ્છેદકતાત્વત્વથી અતિરિક્ત થઈ જશે. તેનાથી અવચ્છિન્ન શુદ્ધસાધ્યતાઅવચ્છેદકતાત્વભેદીયપ્રતિયોગિતા છે. આથી, સાધ્યતાઅવચ્છેદકતાત્વત્વઅતિરિક્તધર્મઅવચ્છિન્ન એવી પ્રતિયોગિતાનો નિરૂપક ઉક્ત શુદ્ધ સાધ્યતાઅવચ્છેદકતાત્વભેદ થઈ જાય છે. માટે તે ભેદ લઈ નહીં શકાય. આમ, એવો કોઈ ભેદ જ નહીં મળે કે જે સાધ્યતાઅવચ્છેદકતાત્વત્વઅતિરિક્તધર્મઅનવચ્છિન્નપ્રતિયોગિતાનિરૂપક હોય. માટે, તાદૃશભેદવિશિષ્ટ જ અપ્રસિદ્ધ થઈ જતાં તાદૃશ સાધ્યતાઅવચ્છેદકતાત્વઅતિરિક્તધર્મઅનવચ્છિન્નપ્રતિયોગિતા અપ્રસિદ્ધ થઈ જશે. પરિણામે, આખું લક્ષણ અપ્રસિદ્ધ થતાં અસંભવદોષ દુર્વાર બની જશે.

★ અસંભવ કે અનવસ્થા આવ્યે જ છૂટકો, તમામ લક્ષણમાં ★

હવે, સાધ્યતાઅવચ્છેદકતાત્વત્વઅતિરિક્ત = સાધ્યતાઅવચ્છેદકતાત્વત્વત્વઅતિરિક્તધર્મઅનવચ્છિન્નપ્રતિયોગિતાનિરૂપકભેદવિશિષ્ટ કરો તો પણ પુનઃ સાધ્યતાઅવચ્છેદકતાત્વત્વત્વ-ગગનઉભયભેદ લઈને અસંભવ દોષ આવે. પુનઃ ખુલાસો કરો તો આ રીતે ખુલાસા

एतदसम्भवनिवारणाय, पूर्वं ***यथा***ऽसम्भववारणाय साध्यतावच्छेदकतात्वेतरत्वं परिष्कृत्य 'स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येतल्लक्षणस्थाने 'स्वावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणमङ्गीकृतम्, ***तथैव*** साध्यतावच्छेदकतात्वत्वेतरत्वं = साध्यतावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्यादि परिष्कृत्य 'स्वावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' इति एवं लक्षणमवश्यं वक्तव्यम् ।

एवं लक्षणाभ्युपगमे पूर्वं साध्यतावच्छेदकतात्वत्वेतरधर्मविधया यत् साध्यतावच्छेदकतात्वत्वस्यैव ग्रहणं कृतं तन्न शक्यम्, यतः पूर्वं साध्यतावच्छेदकतात्वत्वेतरत्वं = साध्यतावच्छेदकतात्वत्वनिष्ठप्रतियोगितानिरूपकभेदः इत्यर्थस्यादृतत्वात् साध्यतावच्छेदकतात्वत्व-गगनोभयभेदः साध्यतावच्छेदकतात्वत्वनिष्ठप्रतियोगिताकभेदविधया गृहीतः, तादृशभेदीयप्रतियोगितायाः साध्यतावच्छेदकतात्वत्वे वर्तमानत्वात् । तादृशोभयभेदस्य साध्यतावच्छेदकतात्वत्वे सत्त्वात् साध्यतावच्छेदकतात्वत्वस्यापि साध्यतावच्छेदकतात्वत्वेतरधर्मविधया ग्रहणं सञ्जातम्, किन्तु एतत्परिष्कारानुसारेण साध्यतावच्छेदकतात्वत्वेतरत्वं = साध्यतावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्यर्थ आदृतः, तथा च साध्यतावच्छेदकतात्वत्व-गगनोभयभेदः धर्तुं न शक्यते, तादृशोभयभेदीयप्रतियोगितायाः साध्यतावच्छेदकतात्वत्वत्वेतरगगनत्वेनाऽवच्छिन्नत्वात् ।

●

કરે રાખવામાં અનવસ્થા લાગુ પડી જાય. માટે, તમારું આખું આ લક્ષણ જ ટકી શકે તેમ નથી. કોઈ નવો વિકલ્પ અજમાવો, નવું લક્ષણ બનાવો. આ લક્ષણ કોઈ હિસાબે ચાલી શકે તેમ નથી. અસંભવદોષદુષ્ટ લક્ષણ કેવી રીતે ચાલી શકે ?

किन्तु एवं परिष्कारे पूर्वोक्तरीत्या शुद्धसाध्यतावच्छेदकतात्वत्वभेदोऽपि साध्यतावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया धर्तुं न शक्यते, साध्यतावच्छेदकतात्वत्वभेदस्य शुद्धस्य साध्यतावच्छेदकतात्वत्वत्वेनैवाऽवच्छिन्नप्रतियोगिताकत्वं वर्तते, किन्तु साध्यतावच्छेदकतात्वत्वत्वमपि साध्यतावच्छेदकतात्वत्वत्वेतरत्, साध्यतावच्छेदकतात्वत्वत्वेतरत्वस्य साध्यतावच्छेदकतात्वत्वत्वनिष्ठप्रतियोगिताकभेदरूपतया साध्यतावच्छेदकतात्वत्वत्वनिष्ठप्रतियोगिताक-साध्यतावच्छेदकतात्वत्वत्व-गगनोभयभेदस्याऽपि साध्यतावच्छेदकतात्वत्वत्वभेदविधया ग्राह्यत्वात् । तथा च पूर्वोक्तरीत्या साध्यतावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितायाः एव सर्वत्राऽप्रसिद्धेरसम्भवः दुर्वारः ।

एवं वह्न्यभावीयप्रतियोगितावच्छेदकतात्वत्वमपि यत् पूर्वं वह्न्यभावीयप्रतियोगितावच्छेदकतात्वत्व-गगनोभयभेदविशिष्टत्वात् प्रतियोगितावच्छेदकतात्वत्वेतरधर्मविधया गृहीतं तत् 'प्रतियोगितावच्छेदकतात्वत्वेतरत्वं = प्रतियोगितावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः - इत्येवं परिष्कारेण = नूतनलक्षणानुसारेण न शक्यम्, प्रतियोगितावच्छेदकतात्वत्वत्वेतरगगनत्वधर्मावच्छिन्नप्रतियोगिताकप्रतियोगितावच्छेदकतात्वत्व-गगनोभयभेदस्य प्रतियोगितावच्छेदकतात्वत्वेतरत्वरूपत्वाभावात् । किन्त्वेवमपि प्रतियोगितावच्छेदकतात्वत्वभेदोऽपि शुद्धः प्रतियोगितावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया धर्तुं न शक्यते, तादृशप्रतियोगितावच्छेदकतात्वत्वभेदीयप्रतियोगितायाः प्रतियोगितावच्छेदकतात्वत्वत्वेनाऽवच्छिन्नत्वात्, प्रतियोगितावच्छेदकतात्वत्वत्वेतरत्वस्य प्रतियोगितावच्छेदकतात्वत्वत्वनिष्ठप्रतियोगितानिरूपकभेदरूपत्वेन प्रतियोगितावच्छेदकतात्वत्वत्व-गगनोभयभेदस्याऽपि प्रतियोगितावच्छेदकतात्वत्वत्वेतरत्वरूपत्वसम्भवेन तादृशोभयभेदविशिष्टस्य प्रतियोगितावच्छेदकतात्वत्वत्वस्य प्रतियोगितावच्छेदकतात्वत्वत्वेतरत्वावश्यम्भावादिति पुनः प्रतियोगितावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदाऽप्रसिद्ध्याऽसम्भवः दुर्निवारः।

एतदसम्भवनिवारणाय साध्यतावच्छेदकतात्वत्वत्वेतरत्वं = साध्यतावच्छेदकतात्वत्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः, प्रतियोगितावच्छेदकतात्वत्वत्वेतरत्वं = प्रतियोगितावच्छेदकतात्वत्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः - इत्येवं परिष्कृत्य 'स्वावच्छेदकतात्वत्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदक-

तात्वत्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्ट-धर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-रूपवृत्ति-प्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमङ्गीकार्यम् । तत्र पुनः साध्यतावच्छेदकतात्वत्वत्वत्वेतरत्वप्रवेशात् साध्यतावच्छेदकतात्वत्वत्वत्वेतरत्वं परिष्क-रणीयम्, पूर्वोक्तरीत्याऽसम्भवापत्तेः । एवं प्रतियोगितावच्छेदकतात्वत्वत्वत्वेतरत्वमपि परिष्क-रणीयम्, असम्भवापत्तेरेव । अर्थात् साध्यतावच्छेदकतात्वत्वत्वत्वेतरत्वं यदि साध्यतावच्छेदकतात्वत्व-त्वत्वनिष्ठप्रतियोगितानिरूपकभेदरूपमङ्गीक्रियते तदा साध्यतावच्छेदकतात्वत्वत्वत्वगगनोभयभेद-ग्रहणसम्भवात् साध्यतावच्छेदकतात्वत्वत्वत्वमपि साध्यतावच्छेदकतात्वत्वत्वत्वेतररूपं सिध्येदिति स्यादेव असम्भवः, तन्निवारणाय साध्यतावच्छेदकतात्वत्वत्वत्वेतरत्वं = साध्यतावच्छेदकतात्वत्वत्व-त्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः, प्रतियोगितावच्छेदकतात्वत्वत्वत्वेतरत्वं = प्रतियोगिता-वच्छेदकतात्वत्वत्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्येवं परिष्कारमादृत्य 'स्वावच्छेदक-तात्वत्वत्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेद-विशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वत्वत्वत्वत्वेतरधर्मा-नवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मा(= साध्यतावच्छेदकतात्वत्वत्वत्वेतरा)नवच्छिन्नप्रतियोगिताक-भेदविशिष्टधर्मा(= साध्यतावच्छेदकतात्वत्वत्वेतरा)नवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मा(= साध्यता-वच्छेदकतात्वत्वेतरा)नवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मा(= साध्यतावच्छेदकतात्वेतरा)नवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः - इत्येवं लक्षणमङ्गीकरणीयम् । अत्रापि साध्यतावच्छेदकतात्वत्वत्वत्वत्वेतरत्वादि-प्रवेशात्पुनरसम्भवः, पुनः परिष्कारः इत्यनवस्था दुरन्ता प्रसज्यते इति नैव स्वीकरणीयं लक्षणमिदं खलु इति किं प्रतीयते न वा ?

अन्येषु लक्षणेषु अपि एवमेवाऽनवस्था दुर्वारा स्यात्, तथा हि - निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नत्वमित्यस्य निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्यादिपरिष्कारः कृतः, लक्षणञ्चैवम-भ्युपगतम् - निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रति-योगिताकभेदविशिष्टावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेद-

विशिष्टप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताक-भेदविशिष्टावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्ट-प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगिता-निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः । एवं लक्षणानुसारेणाऽपि असम्भवः दुर्निवारः, यतः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतानिरूपितत्वं साध्यतावच्छेदकता-वृत्तिप्रतियोगितायां भवति, निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नत्वं = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतानिष्ठप्रतियोगिताकभेदः इत्यर्थः क्रियते तदा निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेदः निरूपि-तत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकभेदविधया धर्तुं शक्यते, तादृशोभयभेदविशिष्टत्वात् तादृशसाध्यतानिष्ठप्रतियोगितावच्छेदकता एव साध्यता-निष्ठप्रतियोगितावच्छेदकताभिन्ना सिध्येत्, ततश्चाऽसम्भवः दुर्निवारः इति साध्यतानिष्ठप्रतियोगिता-वच्छेदकताभिन्नत्वस्य साध्यतानिष्ठप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्यर्थः कृतः। ततश्च साध्यतानिष्ठप्रतियोगितावच्छेदकता-गगनभेदः धर्तुं न शक्यते, तादृशोभयभेदीय-प्रतियोगितायाः साध्यतानिष्ठप्रतियोगितावच्छेदकतात्वेतरेण गगनत्वेनाऽवच्छिन्नत्वात् । किन्तु एवं परिष्कारे कृते शुद्धसाध्यतानिष्ठप्रतियोगितावच्छेदकताभेदोऽपि धर्तुं न शक्यते, यतः तादृशभेदीयप्रतियोगितायाः प्रतियोगितावच्छेदकतात्वेन अवच्छिन्नत्वम्, प्रतियोगितावच्छेद-कतात्वे च प्रतियोगितावच्छेदकतात्व-गगनोभयभेदः वर्तते एव, तादृशोभयभेदीयप्रतियोगितायाः प्रतियोगितावच्छेदकतात्वे वर्तमानत्वात् प्रतियोगितावच्छेदकतात्वनिष्ठप्रतियोगितानिरूपकभेदविधया प्रतियोगितावच्छेदकतात्व-गगनोभयभेदः धर्तुं शक्यते, तादृशभेदविशिष्टं च प्रतियोगितावच्छेदकतात्वं प्रतियोगितावच्छेदकतात्वभिन्नमपि स्यादेव, तदवच्छिन्नप्रतियोगिताकप्रतियोगितावच्छेद-कतात्वभेदः शुद्धोऽपि प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया कथं धर्तुं शक्यते ? एवञ्च प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया शुद्धप्रति-योगितावच्छेदकतात्वभेदोऽपि धर्तुं न शक्यते, तर्हि अन्यः को भेदः धर्तुं शक्यते इति दुर्वारा एवाऽप्रसिद्धिः सार्वत्रिकी इति असम्भवोऽपि दुर्निवारः ।

एवं निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेद-

वारणाय निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नत्वं = निरूपितत्व-सम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्येवं परिष्कृतम्, ततश्च तादृशोभयभेदीयप्रतियोगितायाः तादृशप्रतियोगितावच्छेदकतात्वेतरेण गगनत्वेनाऽवच्छिन्नत्वात् तादृशनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया तादृशोभयभेदः कथं ग्रहीतुं शक्यते ? एवं तादृशोभयभेदवारणसम्भवेऽपि उक्तरीत्या परिष्कारादरे न कोऽपि तादृशः भेदः लभ्यते यः निरूपितत्वसम्बन्धावच्छिन्न-(वह्न्यभावीय)प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकः स्यात्, यतः शुद्धः निरूपितत्वसम्बन्धावच्छिन्न-वह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदोऽपि तादृशनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकः नैव सम्भवति, तादृशभेदीयप्रतियोगिता तादृशप्रतियोगितावच्छेदकतात्वेन तु अवच्छिन्ना अभ्युपगन्तव्या एव, तादृशप्रतियोगितावच्छेदकतात्वे च प्रतियोगितावच्छेदकतात्वेतरत्वं = प्रतियोगितावच्छेदकतात्वभेदः = प्रतियोगितावच्छेदकतात्वनिष्ठप्रतियोगितानिरूपकभेदः = (प्रतियोगितावच्छेदकतात्वे स्वप्रतियोगितायाः वर्तमानत्वात्) तादृशप्रतियोगितावच्छेदकतात्व-गगनोभयभेदः वर्तते एव, अतः तादृशप्रतियोगितावच्छेदकतात्वं प्रतियोगितावच्छेदकतात्वभिन्नं स्यादिति तादृशनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकः शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदः निरूपितत्वसम्बन्धावच्छिन्न-वह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया कथं धर्तुं शक्यते ?

यदि च शुद्धः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदोऽपि निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया धर्तुं न शक्यते, तर्हि अन्यः को भेदः धर्तुं शक्यते इति तादृशभेदाऽप्रसिद्ध्या लक्षणाऽसमन्वयः, लक्षणघटकाऽप्रसिद्धौ तद्घटितलक्षणाऽप्रसिद्धेरवश्यम्भावात्, ततः लक्षणाऽसमन्वयस्याऽपि अनायाससिद्धत्वात् । सार्वत्रिकश्चायं लक्षणाऽसमन्वयः असम्भवदोषावहः इति नात्र कोऽपि विवादः ।

यथा हि भवता - निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-गगनो-

भयभेदमादाय निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतायाः एव निरूपितत्व-सम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नत्वसिद्धेरसम्भवाऽऽपत्तिः या अस्माभिः प्रदर्शिता, तन्निवारणाय निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वेतरधर्मा-नवच्छिन्नभेदविशिष्ट.... इत्यादि परिष्कृतम्, ***तथैव*** प्रकृतेऽपि तादृशप्रतियोगितावच्छेदकतात्व -गगनोभयभेदमादाय निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वस्यैव निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वभिन्नत्वसिद्धेरसम्भवाऽऽपत्तिः प्रदर्शिता तन्निवारणाय निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वेतर-धर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्ट.... इत्यादिपरिष्कारः कर्तव्यः ।

तथा चैवं लक्षणम् - निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकतात्वत्वेतरधर्मा-नवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टाऽवच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताक-भेदविशिष्टप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताक-भेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतात्वत्वे-तरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टप्रतियोगितावच्छेदकता-ऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरण-निरूपितवृत्तित्वाभावः इति । ततश्च निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगिता-वच्छेदकतात्व-गगनोभयभेदीयप्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगिता-वच्छेदकतात्वत्वेतरगगनत्वावच्छिन्नत्वात् तादृशनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रति-योगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया तादृशोभयभेदः न लभ्यते। किन्तु पूर्वोक्तरीत्या अत्रापि तादृशप्रतियोगितावच्छेदकतात्वत्वेतरत्वप्रवेशात् तादृशनिरूपितत्व-सम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वभेदोऽपि धर्तुं न शक्यते, यतः तादृशभेदीयप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वेन तु अवच्छिन्ना भवत्येव । तादृशनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वे निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्व-गगनोभयभेदः = निरूपि-

तत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वनिष्ठप्रतियोगितानिरूपकभेदः = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वेतरत्वं तु वर्तते एवेति तादृश-प्रतियोगितावच्छेदकतात्वत्वावच्छिन्नप्रतियोगिताकभेदः = शुद्धप्रतियोगितावच्छेदकतात्वभेदोऽपि निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगि-ताकभेदविधया कथं धर्तुं शक्यते ? यदि हि तादृशशुद्धप्रतियोगितावच्छेदकताभेदोऽपि निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताक-भेदविधया न प्राप्यते तर्हि अन्यः को भेदः प्राप्यते ? इति निरूपितत्वसम्बन्धावच्छिन्न -साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदाऽप्रसिद्ध्या लक्षणाऽ-प्रसिद्धिः दुर्निवारा एवेति असम्भवोऽपि लब्धप्रसरः । एवमवच्छेदकतात्वनिष्ठप्रतियोगिता-वच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदाऽप्रसिद्ध्याऽपि असम्भवः दुर्निवारः, अत्रापि निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रति-योगिताकभेदाऽप्रसिद्धिः असम्भवश्च भावनीयः ।

एतदसम्भववारणाय पुनः वक्तव्यम् - यदुत निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ -प्रतियोगितावच्छेदकतात्वत्वेतरत्वं = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छे-दकतात्वत्वनिष्ठप्रतियोगितानिरूपकभेदः - इत्येवमेव नाङ्गीक्रियते, किन्तु तादृशेतरत्वं निरूपि-तत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वंत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताक-भेदरूपमङ्गीक्रियते ।

तथा चैवं लक्षणम् - निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकतात्वत्वत्वे-तरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रति-योगिताकभेदविशिष्टावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताक-भेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टप्रतियो-गितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन निरूपितत्व-सम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेद-विशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रति-

य शो ल ता

योगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टप्रतियोगितावच्छेदकताऽनिरूपित-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः इति ।

अत्र साध्यतानिष्ठप्रतियोगितावच्छेदकतात्वत्व-गगनोभयभेदनिवारणसम्भवेऽपि साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वत्वत्व-गगनोभयभेदनिवारणमसम्भवि इति असम्भवोऽपि सुसम्भवः । एवञ्च यत्र यत्र इतरत्वं स्यात् तत्र तत्र परिष्कारापेक्षा, परिष्कारे च पुनः इतरत्वं निवेश्यते इति पुनः तादृशेतरत्वस्य परिष्कारः, पुनः तत्रेतरत्वं पुनः परिष्कारः इति दुरन्ता अनवस्था प्रसज्यते ।

एवं यत्किञ्चित्साध्यतावच्छेदकतावृत्ति-गगनोभयभेदवारणाय पूर्वं भवता परिष्कृतं 'यत्किञ्चित्स्वावच्छेदकतावृत्तित्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियो-
य गितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वेतरधर्मा-
शो नवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति-
ल प्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमुपदर्शितम्, ततश्च
ता यत्किञ्चित्साध्यतावच्छेदकतावृत्ति-गगनोभयभेदीयप्रतियोगितायाः यत्किञ्चित्साध्यतावच्छेदकता-वृत्तित्वेतरगगनत्वेन अवच्छिन्नत्वाद् यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वेतरधर्मानवच्छिन्नप्रति-योगिताकभेदविधया तादृशयत्किञ्चित्साध्यतावच्छेदकतावृत्ति-गगनोभयभेदः धर्तुं न शक्यते। किन्तु एतत्परिष्कारानुसारेण शुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्तिभेदोऽपि यत्किञ्चित्साध्यताव-च्छेदकतावृत्तित्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया धर्तुं नैव शक्यते, यतः तादृशयत्किञ्चित्-साध्यतावच्छेदकतावृत्तिभेदीयप्रतियोगिता यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वेन तु अवच्छिन्ना एव स्यात् । यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वे यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्व-गगनो-भयभेदः = यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वनिष्ठप्रतियोगिताकभेदः = यत्किञ्चित्साध्यता-वच्छेदकतावृत्तित्वेतरत्वं वर्तते एवेति तादृशयत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वावच्छिन्न-प्रतियोगिताकः यत्किञ्चित्साध्यतावच्छेदकतावृत्तिभेदः यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वेतरधर्मा-नवच्छिन्नप्रतियोगिताकभेदविधया कथं धर्तुं शक्यते ? यदि च शुद्धः यत्किञ्चित्साध्यता-वच्छेदकतावृत्तिभेदोऽपि यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेद-

विधया धर्तुं न शक्यते, तर्हि अन्यः को भेदः तादृशयत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वेतर-धर्मानवच्छिन्नप्रतियोगिताकभेदविधया धर्तुं शक्यः भवेदिति तादृशयत्किञ्चित्साध्यतावच्छेदकता-वृत्तित्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदाऽप्रसिद्धिः, यथा चाऽत्र तथा सर्वत्र इति सार्वत्रिकलक्षणा-ऽसमन्वयप्रभावात् स्यादेवाऽसम्भवः ।

एवं यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिभेदविधया यत्किञ्चित्प्रतियोगितावच्छेद-कतावृत्ति-गगनोभयभेदग्रहणवारणाय यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वेतरधर्मानवच्छिन्न-प्रतियोगिताकभेदः = यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिभेदः इत्येवं परिष्कृतम्, ततश्च यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्ति-गगनोभयभेदीयप्रतियोगितायाः यत्किञ्चित्प्रतियोगिता-वच्छेदकतावृत्तित्वेतरगगनत्वेनाऽवच्छिन्नत्वाद् यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वेतरधर्मा-नवच्छिन्नप्रतियोगिताकभेदविधया तादृशयत्किञ्चित्प्रतियोगितावच्छेदकतावृत्ति-गगनोभयभेदः न धर्तुं शक्यते । किन्तु एवं परिष्कारे शुद्धः यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिभेदोऽपि यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया धर्तुं न शक्यते, यतः तादृशयत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिभेदीयप्रतियोगिता यत्किञ्चित्प्रतियोगिता-वच्छेदकतावृत्तित्वेन तु अवच्छिन्ना भवत्येव, तादृशयत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वे तादृशयत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्व-गगनोभयभेदस्तु समस्त्येव, ततः यत्किञ्चित्-प्रतियोगितावच्छेदकतावृत्तित्वनिष्ठप्रतियोगितानिरूपकभेदः = यत्किञ्चित्प्रतियोगितावच्छेदकता-वृत्तित्वभेदः = यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वेतरत्वं तादृशयत्किञ्चित्प्रतियोगिता-वच्छेदकतावृत्तित्वे स्यादेवेति यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वावच्छिन्नप्रतियोगिताकः शुद्धोऽपि यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिभेदः यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वेतर-धर्मानवच्छिन्नप्रतियोगिताकभेदविधया कथं धर्तुं शक्यते ? एवञ्च यदि शुद्धयत्किञ्चित्प्रति-योगितावच्छेदकतावृत्तिभेदोऽपि यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वेतरधर्मानवच्छिन्नप्रतियोगिता-निरूपकभेदविधया धर्तुं न शक्यते तर्हि अन्यः को भेदः धर्तुं शक्यः भवेदिति यत्किञ्चित्प्रति-योगितावच्छेदकतावृत्तित्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदाऽप्रसिद्धेः लक्षणाऽसमन्वयः, सर्वत्र च एवं लक्षणाऽसमन्वयः इति असम्भवदोषो दुर्निवारः ।

यथा पूर्वं यत्किञ्चित्साध्यतावच्छेदकतावृत्ति-गगनोभयभेदवारणाय यत्किञ्चित्साध्यता-

वच्छेदकतावृत्तिभेदः = यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्येवं परिष्कृतम्, तथैव यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्व-गगनोभयभेदवारणाय यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वभेदः = यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्येवं परिष्कार्यमेव, ततश्चैवं लक्षणं स्यात् - यत्किञ्चित्स्वावच्छेदकतावृत्तित्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

ततश्च यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्व-गगनोभयभेदीयप्रतियोगितायाः यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वेतरगगनत्वेनाऽवच्छिन्नत्वात् तादृशयत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया तादृशयत्किञ्चित्साध्यतावच्छेदकतावृत्तित्व-गगनोभयभेदः धर्तुं न शक्यते । किन्तु पुनः पूर्वोक्तरीत्या एवाऽऽपत्तिः यदुत यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया शुद्धः यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वभेदोऽपि धर्तुं न शक्यते, यतः तादृशशुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वभेदीयप्रतियोगिताऽपि यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वेनाऽवच्छिन्ना एव भवेत्, यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वे तु यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्व-गगनोभयभेदः = यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वनिष्ठप्रतियोगितानिरूपकभेदः = यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वेतरत्वं वर्तते एव । अतः तादृशयत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया तादृशयत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वावच्छिन्नप्रतियोगिताकः शुद्धोऽपि यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वभेदः कथं धर्तुं शक्यते ? यदि शुद्धः यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वभेदोऽपियत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया धर्तुं न शक्यते, तर्हि अन्यः को भेदः धर्तुं शक्यः स्यादिति यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदाऽप्रसिद्धेः लक्षणाऽसमन्वयः, सर्वत्र चैवं लक्षणाऽसमन्वयादसम्भवः दुर्निवारः ।

एवं यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वभेदः = यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः - इत्येवं परिष्कारादरे यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्व-गगनोभयभेदग्रहणाऽसम्भवेऽपि अन्यस्य कस्यचिदपि भेदस्य ग्रहणाऽसम्भवादप्रसिद्धिः, ततः लक्षणाऽसमन्वयः, सार्वत्रिकाच्चास्माल्लक्षणाऽसमन्वयादसम्भवः इत्यपि विभावनीयम् ।

एतदसम्भववारणाय पुनः यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वत्वेतरत्वं नाम यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदवत्त्वम्, न तु यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वत्वनिष्ठप्रतियोगिताकभेदमात्रम् इति अवश्यं परिष्करणीयम्, तथा चैवं लक्षणमभ्युपगन्तव्यम् - यत्किञ्चित्स्वावच्छेदकतावृत्तित्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मा(= वृत्तित्वत्वेतरा)नवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मा(=वृत्तित्वेतरा)नवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एवमपि यथा यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वत्वेतरत्वं = यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्येवं यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वत्व-गगनोभयभेदपरिहाराय परिष्कर्तव्यम्, तथा यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वत्वत्व-गगनोभयभेदपरिहाराय यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वत्वत्वेतरत्वं = यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वत्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्येवं परिष्करणीयम्, तत्र पुनः तादृशवृत्तित्वत्वत्वत्वेतरत्वप्रवेशः, तादृशवृत्तित्वत्वत्वत्व-गगनोभयभेदपरिहाराय तादृशवृत्तित्वत्वत्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इति परिष्करणीयम्, तत्र पुनः इतरत्वप्रवेशः इति पुनः तत्परिष्करणीयम् इत्यविरामाद् दुरन्ता हि अनवस्था एतल्लक्षणेऽपि।

एवं यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदपरिहाराय यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्येवं परिष्कृतम् । यावत्स्वावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्न-

या शो ला ता

प्रतियोगिताकभेदविशिष्टप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं तल्लक्षणञ्चाऽभ्युपगतम् । ततश्च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदीयप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतरगगनत्वधर्मावच्छिन्नत्वाद् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकभेदविधया यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदः धर्तुं न शक्यते । किन्तु एवं परिष्कारादरे यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदः शुद्धोऽपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया धर्तुं न शक्यते, यतः तादृशशुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदीयप्रतियोगिताऽपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेन तु अवच्छिन्ना भवत्येव, यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वे च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्व-गगनोभयभेदः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वनिष्ठप्रतियोगितानिरूपकभेदः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतरत्वमस्त्येवेति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेनावच्छिन्नप्रतियोगिताकः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदः शुद्धोऽपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया कथं धर्तुं शक्यते ?

यदि च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदः शुद्धोऽपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया धर्तुं न शक्यते, तर्हि अन्यः को भेदः धर्तुं शक्यते ? एवञ्च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदाऽप्रसिद्धिः, ततः लक्षणाऽसमन्वयः, सार्वत्रिकाच्चैतादृशलक्षणाऽसमन्वयादसम्भवोऽपि दुर्निवारः ।

एवं यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदवारणाय पूर्वं यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभेदः = यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगिताकः भेदः इत्येवं परिष्कृतम्, ततश्च यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वेतरगगनत्वधर्मावच्छिन्नत्वात् तादृशयावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता

-गगनोभयभेदः यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगिताक-भेदविधया धर्तुं न शक्यते, किन्त्वेवं परिष्कारादरे यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-भेदोऽपि, शुद्धोऽपि, यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगि-ताकभेदविधया धर्तुं न शक्यते, यतः शुद्धयावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभेदीय-प्रतियोगिताऽपि यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वेन तु अवच्छिंन्ना स्यादेव, यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वे च यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्व-गगनोभयभेदः = यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वनिष्ठप्रतियोगितानिरूपकभेदः = यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वेतरत्वमस्त्येवेति तादृशयावत्प्रतियोगितावच्छेद-कतापर्याप्तप्रतियोगितात्वावच्छिन्नप्रतियोगिताकः यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभेदः यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया कथं धर्तुं शक्यः स्यात् ? यदि च यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्नप्रतियोगिता-निरूपकभेदविधया यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभेदः शुद्धोऽपि धर्तुं न शक्यते तर्हि अन्यः को भेदः धर्तुं शक्यते इति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतरधर्मानवच्छिन्न-प्रतियोगिताकभेदाऽप्रसिद्धेः लक्षणाऽसमन्वयः, सार्वत्रिकाच्चैतस्माल्लक्षणाऽसमन्वयात् स्यादेवा-ऽसम्भवः इति ।

एवञ्च यथा पूर्वं यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदवारणार्थं याव-त्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतर-धर्मानवच्छिन्नप्रतियोगिताकभेदः इत्येवं परिष्कृतम्, तथैव यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगितात्व-गगनोभयभेदवारणार्थं यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वेतरत्वं = याव-त्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्येवं परिष्कार्यमेव, तथा चैवं लक्षणमभ्युपगन्तव्यं स्यात् - यावत्स्वावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरधर्मा-नवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टप्रतियोगिताऽनिरूपक-पर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरधर्मानवच्छिन्न-प्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगिताकभेदविशिष्टप्रतियोगिताऽनिरूपकपर्याप्त्यनु-योगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति । ततश्च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्व-गगनोभयभेदीयप्रतियोगितायाः यावत्साध्यतावच्छेद-

य शो ल ता

कतापर्याप्तप्रतियोगितात्वत्वेतरगगनत्वधर्मावच्छिन्नत्वात् तादृशयावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगितात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगितात्वगगनोभयभेदः धर्तुं न शक्यते । किन्तु एवं परिष्कारे यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगितात्वभेदः शुद्धोऽपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरधर्मानवच्छिन्न-प्रतियोगितानिरूपकभेदविधया धर्तुं न शक्यते, यतः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्व-भेदीयप्रतियोगिताऽपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेन तु अवच्छिन्ना वर्तते एव, तादृशयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वे तु यावत्साध्यतावच्छेदकतापर्याप्तप्रतियो-गितात्वत्व-गगनोभयभेदः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वनिष्ठप्रतियोगितानिरू-पकभेदः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरत्वं वर्तते एव । अतः तादृशयाव-त्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वावच्छिन्नप्रतियोगिताकः शुद्धयावत्साध्यतावच्छेदकता-पर्याप्तप्रतियोगितात्वभेदः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरधर्मानवच्छिन्नप्रतियो-गिताकभेदविधया कथं धर्तुं शक्यते ? यदि च शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्व-भेदोऽपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदविधया धर्तुं न शक्यते तर्हि अन्यः को भेदः धर्तुं शक्यते इति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्व-त्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदाऽप्रसिद्धेः लक्षणाऽसमन्वयः, सार्वत्रिकाच्चैतादृशलक्षणाऽ-समन्वयात् स्यादेवाऽसम्भवः।

एवं यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्व-गगनोभयभेदवारणाय यावत्प्रतियोगिता-वच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकभेदः..... इत्यादि परिष्कृतम्, ततश्च यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरगगनत्वधर्मानवच्छिन्नप्रतियोगिताकत्वाद् यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वगगनोभयभेदः यावत्प्रतियोगितावच्छेदकतापर्याप्त-प्रतियोगितात्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकभेदविधया धर्तुं न शक्यते, किन्तु पूर्वोक्तरीत्या यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वभेदीयप्रतियोगितायाः अपि यावत्प्रतियोगितावच्छेद-कतापर्याप्तप्रतियोगितात्वत्वेनाऽवच्छिन्नत्वाद् यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वत्वस्य यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वत्वगगनोभयभिन्नत्वात् = यावत्प्रतियोगितावच्छेद-कतापर्याप्तप्रतियोगितात्वत्वत्वेतरत्वाच्च यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतर-धर्मानवच्छिन्नप्रतियोगिताकभेदविधया यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वभेदस्य

शुद्धस्याऽपि अग्राह्यत्वमेवेति यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरधर्मानवच्छिन्न-प्रतियोगिताकभेदाप्रसिद्धेः लक्षणाऽसमन्वयः, असम्भवश्चेति ।

एतदसम्भववारणाय यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरत्वं = यावत्साध्यता-वच्छेदकतापर्याप्तप्रतियोगितात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदवत्त्वम् इत्यादि परिष्कार्यमेव। ततश्चैवं लक्षणम् - यावत्स्वावच्छेदकतापर्याप्तप्रतियोगितात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिता-निरूपकभेदविशिष्टधर्मा(प्रतियोगितात्वत्वेतरा)नवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मा(प्रतियोगिता-त्वेतरा)नवच्छिन्नप्रतियोगिताकभेदविशिष्टप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकभेदविशिष्टधर्मा-नवच्छिन्नप्रतियोगिताकभेदविशिष्टधर्मानवच्छिन्नप्रतियोगितानिरूपकभेदविशिष्टप्रतियोगिताऽनिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति। किन्तु एवमपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेद-विधया यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्व-गगनोभयभेदग्रहणाऽसम्भवेऽपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वत्व-गगनोभयभेदनिवारणमसम्भवि इति स्यादेव असम्भवः, तन्निवारणाय 'यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वत्वेतरत्वं = यावत्साध्यतावच्छेदकता-पर्याप्तप्रतियोगितात्वत्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः, न यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगितात्वत्वत्वनिष्ठप्रतियोगितानिरूपकभेदमात्रम्' इति परिष्कार्यम्, तत्र पुनः यावत्साध्यता-वच्छेदकतापर्याप्तप्रतियोगितात्वत्वत्वत्वेतरत्वप्रवेशः, ततः यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगितात्वत्वत्वत्व-गगनोभयभेदवारणाय यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वत्व-त्वेतरत्वं = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितात्वत्वत्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताक-भेदवत्त्वमिति परिष्करणीयम्, पुनस्तत्रेतरत्वप्रवेशः, पुनः तत्परिष्कारः, पुनः इतरत्वप्रवेशः, पुनः परिष्कारः इति दुरन्ता एवेयमनवस्थाराक्षसी । सर्वाणि लक्षणानि हि एतदसम्भवानवस्था-ग्रस्तानि इति नैकमपि लक्षणं ग्रहीतुं शक्यते इति भावार्थः ।

स्यादाशङ्का - ननु पूर्वं विभिन्नरीत्याऽनवस्थादोषः प्रदर्शितः आसीत्, तदनुसारेणैवाऽत्रापि असम्भवाऽनवस्थादिदोषकदम्बकं प्रदर्शनीयम्, किमर्थं ततो भिन्नरीत्या अनवस्था आपाद्यते ?

अयं भावः - पूर्वमेवं लक्षणेऽनवस्थाऽऽपादिता आसीत् - 'स्वावच्छेदकतात्वेतरधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्न-

य शो ल ता

प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' इति एवं लक्षणानुसारेण पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयवह्न्यभावमादाय अव्याप्तिः भवति, तद्यथा - यदि प्रकृते महानसीयवह्न्यभावः ग्रहीतुमिष्यते तदा साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपञ्चैकं भवेत् तदावश्यकम् । तत्र साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तु वह्नित्वगतैकत्वमेव विद्यते इति यदि महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वमेव भवेत् तदैव महानसीयवह्न्यभावः धर्तुं शक्यते । महानसीयवह्न्यभावीयवह्नित्ववृत्तितावैशिष्टप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं भवति, यद्यपि तादृशमहानसीयवह्न्यभावीयवह्नित्ववृत्तितावैशिष्टप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता प्रतियोगितावच्छेदकतात्वेन वह्नित्ववृत्तितावैशिष्ट्येन चाऽवच्छिन्ना वर्तते, अर्थात् प्रतियोगितावच्छेदकतात्वेतरेण वह्नित्ववृत्तितावैशिष्ट्येनाऽवच्छिन्ना तथापि तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायां महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नत्वं स्यादेव, यतः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नत्वं = महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वाभावः = महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावः । महानसीयवह्न्यभावीयवह्नित्ववृत्तितावैशिष्टप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायां प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्वं वर्तते, किन्तु प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्व-गगनोभयं तु नैव वर्तते, उभयाभावः एव वर्तते, एकसत्त्वेऽपि द्वयं नास्तीति न्यायात् । एतादृशोभयाभावीयप्रतियोगिता प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्वेऽपि अस्ति, गगनेऽपि अस्ति इति प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्व-गगनोभयाभावः प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावविधया धर्तुं शक्यते, अतः वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितायां प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्व-गगनोभयाभावसत्त्वे प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यधर्मावच्छिन्नत्वनिष्ठप्रति-

य शो ल ता

योगिताकाभावः = प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यधर्मावच्छिन्नत्वाभावः = प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्याऽनवच्छिन्नत्वं स्यादेव ।

ततश्च प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताविधया ग्राह्या एव वह्नित्व-वृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता, तादृशप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः प्रतियोगितावच्छेदकता-त्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वमेव स्यात् । तथा च साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-गतैकत्वरूपे महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकत्वसत्त्वात् स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकवह्नित्वगतैकत्वरूपे तादृशमहानसीयवह्न्यभावीयप्रतियोगितायाः सत्त्वात् तादृश-महानसीयवह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् इत्यत्रापि वह्न्यभावमादाय लक्षणाऽसमन्वयः । तद्यथा - यदि प्रकृते वह्न्यभावः ग्राह्यः तदा साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकं रूपञ्चैकं स्यात्तदावश्यकम् । तत्र वह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तु वह्नित्वगतैकत्वमेव विद्यते इति यदि साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वं स्यात् तदैव वह्न्यभावः धर्तुं शक्यते, साध्यतावच्छेदकतायाः प्रकृते महानसीयत्व -वह्नित्वोभयस्मिन् वर्तमानत्वात् साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताविधया साध्यता-वच्छेदकतानिष्ठप्रतियोगिताग्रहणे तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्व-गतैकत्वमेव भवेत् । यदि वह्नित्ववृत्तिताविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता गृह्यते तदा वह्नित्ववृत्तिताविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं

या शो ल ता

रूपं वह्नित्वगतैकत्वं स्यात्, वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतायाः वह्नित्वे पर्याप्तत्वात् । यद्यपि वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां साध्यतावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्येनाऽवच्छिन्नत्वमस्ति तथापि तादृशप्रतियोगितायां साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नत्वमपि स्यात्, यतः साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नत्वं = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वाभावः = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावः । वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां साध्यतावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्वं वर्तते, किन्तु गगनं तु नास्त्येवेति साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां वर्तते । एतदुभयाभावीयप्रतियोगिता साध्यतावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्वे गगने च वर्तते इति तादृशोभयाभावः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावविधया धर्तुं शक्यते । अतः वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां साध्यतावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्व-गगनोभयाभावसत्त्वे साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावः = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वाभावः = साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नत्वमपि स्यादेव, तद्व्यपत्वात्तस्य । तथा च वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्य प्राप्तेः साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वमेव स्यात् । ततश्च साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसत्त्वात् स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे तादृशवह्न्यभावीयप्रतियोगिता वृत्तिः एव स्यादिति वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोर्वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवं सर्वत्र लक्षणाऽसमन्वयात् स्यादेवाऽसम्भवः । एतदसम्भवनिवारणाय साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नत्वं = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टत्वमित्यादि परिष्कृत्य 'स्वावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मा-

य शो ल ता

नवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपगन्तव्यम्, तथा च पर्वतो वह्निमान् धूमाद् - इत्यत्र वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यः प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावविशिष्टत्वावच्छिन्नत्व-गगनोभयाभावः गृहीतः सः प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं न शक्यते, यतः तादृशोभयाभावीयप्रतियोगिता यथा प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावविशिष्टत्वावच्छिन्नत्वे वर्तते, गगनेऽपि वर्तते इति तादृशोभयाभावीयप्रतियोगिता प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरगगनत्वेनाऽवच्छिन्ना, ततः प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया तादृशोभयाभावः कथं धर्तुं शक्यते ?

किन्तु शुद्धः प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वाभावः ग्राह्यः, तादृशाभावीयप्रतियोगितायाः प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वे एव सत्त्वेन प्रतियोगितावच्छेदकतात्वत्वेतरधर्मावच्छिन्नत्वत्वेनैवाऽवच्छिन्नत्वात्, तदितरेणाऽनवच्छिन्नत्वाच्च प्रतियोगितावच्छेदकतात्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया तादृशप्रतियोगितावच्छेदकतात्वत्वेतरधर्मावच्छिन्नत्वाभावः शुद्धः धर्तुं शक्यते । तादृशशुद्धाभावो हि वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां नैव विद्यते, वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः प्रतियोगितावच्छेदकतात्वेतरधर्मवह्नित्ववृत्तितावैशिष्ट्येनाऽवच्छिन्नत्वात् । तथा च वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितावधया धर्तुं न शक्यते ।

शुद्धः प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वाभावः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां च अस्तीति प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगितावधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्न्यभावीय-

प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता च धर्तुं शक्येते । तत्र महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः, साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया च वह्नित्वगतैकत्वस्यैव प्राप्तेः स्वावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे महानसीयवह्न्यभावीयप्रतियोगिता वर्तमाना नैव भवेत् । अतः महानसीयवह्न्यभावः धर्तुं न शक्यते ।

वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वमेव प्राप्यते इति साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसत्त्वात् स्वावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे वह्न्यभावीयप्रतियोगिता वर्तमानाऽस्तीति वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोः अवृत्तितया लक्षणसमन्वयः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानम्, विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां यः साध्यतावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यधर्मावच्छिन्नत्व-गगनोभयाभावः गृहीतः सः धर्तुं न शक्यते, यतः तादृशोभयाभावीयप्रतियोगिता साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वे गगने चोभयत्र वर्तते इति तादृशोभयाभावीयप्रतियोगिता साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेन गगनत्वेन चावच्छिन्ना भवति, अर्थात् साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरगगनत्वधर्मावच्छिन्ना तादृशोभयाभावीयप्रतियोगिता भवतीति साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतर-

य शो ल ता

धर्मानवच्छिन्नप्रतियोगिताकाभावविधया तादृशसाध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं न शक्यते, किन्तु यः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वाभावः शुद्धः स एव साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं शक्यते, यतः तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वे एव सत्त्वेन साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेनैव अवच्छिन्नत्वात्, तदितरेणाऽनवच्छिन्नत्वाच्च तादृशा-ऽभावीयप्रतियोगितायां साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं सम्भवति।

वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां साध्यतावच्छेदकतात्वेतर-वह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्वस्य सत्त्वेन शुद्धसाध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वाभावः नास्ति इति साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्ट-प्रतियोगितावैशिष्ट्यविधया वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं न शक्यते, किन्तु यस्यां शुद्धसाध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वाऽभावः वर्तते सा साध्यतावच्छेदकतात्वेनैवाऽ-वच्छिन्ना साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतर-धर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितावैशिष्ट्यविधया धर्तुं शक्यते । तादृशसाध्यतावच्छेदकता-निष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं नास्ति, किन्तु महानसीयत्व-वह्नित्वगतद्वित्वमेव वर्तते, साध्यतावच्छेदकतायाः महानसीयत्व-वह्नित्वोभयस्मिन्नेव पर्याप्तत्वात्। तथा च साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयो-गितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत् ।

वह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताका-भावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वमेव प्राप्यते, न महानसीयत्व-वह्नित्वगतद्वित्वम् । अतः स्वावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्न-प्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यता-वच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपे वह्न्यभावीयप्रतियोगिता वर्तमाना नैव सम्भवतीति वह्न्यभावः कथं धर्तुं शक्यते ? किन्तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदक-तात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्य-

य शो ल ता

नुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः महानसीयवह्न्यभावीयप्रतियोगिता स्वावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपे वर्तमाना स्यादेव । तथा च महानसीयवह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तित्वाभावाल्लक्षणसमन्वयः ।

किन्तु एतादृशलक्षणसमन्वयः आपाततः एव, असम्भवतादवस्थ्यात् । तथा हि - पर्वतो वह्निमान् धूमाद् - इत्यत्र तादृशमहानसीयवह्न्यभावीयवह्नित्ववृत्तितावैशिष्टप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्व-गगनोभयाभावः प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं न शक्यते, तादृशोभयाभावीयप्रतियोगितायां प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वादित्युक्तं भवता, किन्तु व्यर्थं हि तत्, यतः तादृशप्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां तादृशप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेऽपि तादृशप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वमप्यस्ति, यतः प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = पूर्वोक्तरीत्या प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वाभावः = प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः इत्यर्थः । ततश्च यद्यपि तादृशप्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वं वर्तते तथापि गगनं तु तत्र नैव वर्तते इति प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः तादृशप्रतियोगितावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां स्यादेव, तादृशप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायाः प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वे सत्त्वात् प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावविधया तादृशोभयाभावः धर्तुं शक्यते इति तादृशप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां तादृशप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतर-

य शो ल ता

धर्मावच्छिन्नत्व-गगनोभयाभावसत्त्वे तादृशप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः = तादृशप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वाभावः = तादृशप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं स्यादेव।

तथा च प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं शक्यते, तादृशोभयाभावस्य वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां सत्त्वात् प्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितावैशिष्ट्यविधया वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेवेति पूर्वोक्तरीत्या महानसीयवह्न्यभावस्य ग्राह्यत्वेन लक्षणाऽसमन्वयः दुर्वारः एव ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां वर्तमानः यः साध्यतावच्छेदकतात्वेतरवह्नित्ववृत्तितावैशिष्ट्यधर्मावच्छिन्नत्व-गगनोभयाभावः सः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं न शक्यते, तादृशोभयाभावीयप्रतियोगितायाः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरगगनत्वधर्मावच्छिन्नत्वात् - इति यदुक्तं तदसत् यतः तादृशोभयाभावीयप्रतियोगितायां साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेऽपि साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वमपि वर्तते, साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वाभावः = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः । यः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः तादृशोभयाभावीयप्रतियोगितायाः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वे सत्त्वात् साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावविधया साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनो-

यशोलता

भयाभावः धर्तुं शक्यते । साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरगगनत्वावच्छिन्नत्व-सत्त्वेऽपि गगनस्याऽसत्त्वात् साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः सम्भवत्येव, एकसत्त्वेऽपि द्वयं नास्तीति न्यायस्य जागरुकत्वात् । तादृशसाध्यता-वच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावस्य साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकत्वात् साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां तादृशसाध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावसत्त्वे साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वाभावः = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं स्यादेव ।

ततश्च साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविधया साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं शक्यते । साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावस्य वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां सत्त्वात्, तादृशप्रतियोगिताश्रयवह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वेन वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतावृत्तितादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेश्च साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वं लभ्यते एव । वह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वमेव समस्तीति पूर्वोक्तरीत्या वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः । एवञ्च सर्वत्राऽपि लक्षणाऽसमन्वयात् स्यादेव असम्भवः ।

यथा च पूर्वं साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्व-गगनोभयाभाववारणाय साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः इत्येवं साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नत्वस्याऽर्थः अङ्गीकृतः, परिष्कारश्चादृतः तथैव साध्यतावच्छेदकतात्वेतरधर्मा-

वच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभाववारणाय साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतर-धर्मानवच्छिन्नत्वं = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्न-प्रतियोगिताकाभावः, न तु साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वाभावमात्र-मित्येवं परिष्कृत्य "स्वावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रति-योगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रति-योगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूप-वृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवं लक्षणमभ्युपगन्तव्यम् । ततश्च साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः 'अत्र महान-सीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र एतत्परिष्कारानुसारेण साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानव-च्छिन्नप्रतियोगिताकाभावविधया धर्तुं न शक्यते, तादृशसाध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वे-तरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायाः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतर-धर्मावच्छिन्नत्वातिरिक्तगगनेऽपि वर्तमानत्वेन साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मा-वच्छिन्नत्वत्वेतरगगनत्वेनाऽपि अवच्छिन्नत्वात् । तथा च यः शुद्धः साध्यतावच्छेदकतात्वेतर-धर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वाभावः सः ग्राह्यः, तादृशशुद्धाभावीयप्रतियोगितायाः साध्यता-वच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेनैवाऽवच्छिन्नत्वेन साध्यतावच्छेदकतात्वे-तरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया तादृशशुद्धा-भावस्य ग्राह्यत्वात् । तादृशाभावः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावे नैव सम्भवति, तादृशोभयाभावीयप्रतियोगितायां साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरगगनत्व-धर्मावच्छिन्नत्वसत्त्वात्, किन्तु शुद्धः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वाभावः एव ग्राह्यः, तादृशशुद्धाभावीयप्रतियोगितायाः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वात् । तादृशशुद्धसाध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वाभावः वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकता-वृत्तिप्रतियोगितायां नैव स्यात्, तादृशप्रतियोगितायाः साध्यतावच्छेदकतात्वेतरधर्मवह्नित्ववृत्तिता-वैशिष्ट्येनाऽवच्छिन्नत्वात्, किन्तु साध्यतावच्छेदकतावृत्तिप्रतियोगितायामेव स्यात्, अर्थात् साध्यता-वच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्ट-

प्रतियोगिताकाभावविशिष्टप्रतियोगितावधिया साध्यतावच्छेदकतावृत्तिप्रतियोगिता एव धर्तुं शक्यते, वह्नित्ववृत्तितावशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगिता नैवेति साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेदिति सम्पूर्णः लक्षणसमन्वयः प्रागुक्तरीत्याऽनुसन्धेयः ।

किन्तु एषः लक्षणसमन्वयः आपाततः एव, यतः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं शक्यते, तादृशोभयाभावीयप्रतियोगितायां साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेऽपि साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावस्य सत्त्वात्, तादृशसाध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावस्य साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-निष्ठप्रतियोगिताकाभावरूपतया, तादृशसाध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावस्य साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वरूपतया तादृशोभयाभावसत्त्वे साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वस्य तादृशसाध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायामवश्यम्भावात् । तथा च साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः गृह्यते, तादृशाभावविशिष्टप्रतियोगिताकाभावविधया साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं शक्यते, तादृशाभावविशिष्टप्रतियोगिता वह्नित्ववृत्तितावशिष्टसाध्यतावच्छेदकतानिष्ठा इति साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगितावधिया वह्नित्ववृत्तितावशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति पुनः लक्षणाऽसमन्वयः ।

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रापि नूतनलक्षणानुसारेण लक्षणाऽसमन्वयनिराकरणं

पुनश्च तदापादनमेतद्दिशा समनुसन्धेयम् ।

इत्थञ्च यथा साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभाव-वारणार्थं साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = साध्यतावच्छेदक-तात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः इत्येवं परिष्कृतम्, तथैव साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभया-भाववारणाय साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्न-प्रतियोगिताकाभावः - इत्येवं परिष्कृत्य "स्वावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्न-त्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्ट-प्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेद-कतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिता-काभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवं लक्षण-मभ्युपगन्तव्यम् ।

किन्तु अत्रापि अनवच्छिन्नत्वप्रवेशः वर्तते एव । ततश्च यथा साध्यतावच्छेदकतात्वेतरधर्मा-वच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभाववारणाय साध्यतावच्छेदकतात्वेतर-धर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्न-त्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः इत्येवं परिष्कृतम्, तथैव साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मा-वच्छिन्नत्व-गगनोभयाभाववारणार्थं साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतर-धर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = साध्यतावच्छेदकतात्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-त्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः इत्येवं परिष्कार्यमेव। अत्र पुनः अनवच्छिन्नत्वप्रवेशः वर्तते एवेति पुनः अवच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिता-काभावः इत्येवं परिष्करणीयम्, पुनस्तत्रानवच्छिन्नत्व प्रवेशः, पुनः परिष्कारः..... एवमसम्भववारणायोक्तरीत्या परिष्कारादरे दुरन्ता हि अनवस्था ।

एवञ्च पूर्वं यथा भवद्भिरेव प्रदर्शितं तथा असम्भवाऽऽपादनसम्भवेऽपि किमर्थं भिन्नरीत्याऽसम्भवः आपाद्यते ? किमस्ति अत्र प्रयोजनं किमपि यदृच्छामृते ? लाघवाद्यसम्भवेऽपि परिवर्तकस्य वाच्यत्वादिति ।

अथ द्वितीयपरिष्कारघटितलक्षणे उक्तरीत्या एव अनवस्था यथा भवति तथा दर्श्यते -

पर्वतो वह्निमान् धूमाद् - इत्यत्र निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकता-भिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-निरूपितत्व-समबन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकतानिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतानिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणानुसारेण यदि महानसीयवह्न्यभावः धर्तुमिष्यते तदा निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठप्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपञ्चैकं भवेत् तदावश्यकम् ।

तत्र निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतानिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव विद्यते । महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वात्तादृशप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं वर्तते एव, किन्तु तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव विद्यते, न वह्नित्वगतैकत्वम् । यदि निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगिता-

वच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यात् तदैव महानसीयवह्न्यभावः धर्तुं शक्यः स्यात्। अतः वह्नित्ववृत्तिताविशिष्ट-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता गृह्यते, तादृशप्रतियोगिताश्रयवह्नित्व-वृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतायाः वह्नित्वे एव पर्याप्तत्वात् तादृश-वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वमेव प्राप्यते ।

यद्यपि तादृशवह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-प्रतियोगितायाः प्रतियोगित्वेन, अवच्छेदकतात्वेन वह्नित्ववृत्तितावैशिष्ट्येन चावच्छिन्नत्वात् तादृशप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियो-गितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नवह्नित्ववृत्तिताविशिष्टत्वनिष्ठ-प्रतियोगितावच्छेदकतानिरूपितत्वमेव वर्तते, ***तथापि*** तादृशवह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्य-भावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-वह्नित्ववृत्तितावैशिष्ट्यादिनिष्ठप्रतियोगितावच्छेदकताऽनिरूपितत्वमपि स्यादेव, यतः निरूपितत्व-सम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं = निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियो-गितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वाभावः = तादृशभिन्नप्रतियोगितावच्छेद-कतानिरूपितत्वनिष्ठप्रतियोगितानिरूपकाभावः । वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां तादृशभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वम् अस्ति, किन्तु गगनं तु नास्त्येवेति निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-निरूपितत्व-गगनोभयाभावः तादृशवह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेद-कतावृत्तिप्रतियोगितायां स्यादेव । तादृशोभयाभावीयप्रतियोगिता तादृशभिन्नप्रतियोगितावच्छेदकता-निरूपितत्वे वर्तते एवेति तादृशभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वनिष्ठप्रतियोगितानिरूपका-भावविधया तादृशोभयाभावः धर्तुं शक्यते एव ।

अतः वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्व-गगनोभयाभावसत्त्वे निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वनिष्ठप्रतियोगिताकाभावः = निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वाभावः = निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं स्यादेव । तादृशवह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्य प्राप्तेः निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेव।

ततः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे तादृशमहानसीयवह्न्यभावीयप्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वृत्तित्वसम्भवाद् महानसीयवह्न्यभावः धर्तुं शक्यते, तादृशमहानसीयवह्न्यभावाधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि वह्न्यभावमादाय लक्षणाऽसमन्वयः, तद्यथा - यदि प्रकृते वह्न्यभावः ग्राह्यः तदा निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं निरूपितत्वसम्बन्धावच्छिन्न-तादृशवह्न्यभावीयप्रतियोगितानिष्ठ

-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपञ्च अभिन्नं स्यात्तदावश्यकम्, निरूपितत्वसम्बन्धावच्छिन्न-तादृशवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तु वह्नित्वगतैकत्वमेव स्यात् । निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि यदि वह्नित्वगतैकत्वमेव स्यात्, तदा वह्न्यभावः धर्तुं शक्यते इत्यपि सिद्धम् । साध्यतावच्छेदकतावृत्तिप्रतियोगिता यदि धर्तुम् इष्यते तदा तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं वर्तते, किन्तु तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं वर्तते, वह्नित्वगतैकत्वं नैवेति यदि वह्न्यभावः धर्तुमिष्यते तदा तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगिता नैव ग्राह्या । या वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता सा यदि धर्तुमिष्यते तदा तादृशवह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेव । तादृशवह्नित्ववृत्तितावैशिष्ट-साध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यत्वेन अवच्छेदकतात्वेन वह्नित्ववृत्तितावैशिष्ट्येन चावच्छिन्ना इति निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नवह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वं तादृश-वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां यद्यपि वर्तते, तथापि तादृशवह्नित्व-वृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-ऽनिरूपितत्वमपि स्यादेव, यतः पूर्वोक्तरीत्या निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगिता-वच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रति-योगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वाभावः = तादृशभिन्नप्रतियोगितावच्छे-दकतानिरूपितत्वनिष्ठप्रतियोगितानिरूपकाभावः ।

य शो ल ता

वह्नित्ववृत्तितावि॰शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वं वर्तते, किन्तु गगनं तु नैव वर्तते इति निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्व-गगनोभयाभावः तादृशवह्नित्ववृत्तितावि॰शिष्टसाध्यतावच्छेदकतानिष्ठ-प्रतियोगितायां वर्तते एव । तादृशोभयाभावीयप्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वेऽपि सत्त्वात् तादृशोभयाभावः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वनिष्ठप्रतियोगिताकाभावविधया धर्तुं शक्यते एव ।

तथा च निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्व-गगनोभयाभावस्य वह्नित्ववृत्तितावि॰शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां सत्त्वे निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वनिष्ठप्रतियोगितानिरूपकाभावः = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वाभावः = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं स्यादेव । ततश्च तादृशवह्नित्ववृत्तितावि॰शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिता(=वह्नित्ववृत्तितावि॰शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता)निरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेव ।

तथा च निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनु-

योगितावच्छेदकत्वसम्बन्धेन तादृशवह्न्यभावीयप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-साध्यता-निष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे वर्तमाना स्यादेव । अतः वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽ-समन्वयः । एवञ्च सार्वत्रिकाल्लक्षणाऽसमन्वयात् स्यादेवाऽसम्भवः ।

एतदसम्भवनिवारणार्थम् अनिरूपितत्वं = निरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः इत्यादि परिष्कृत्य 'निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताका-भावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन निरूपितत्वसम्बन्धावच्छिन्न -साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयो-गितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमङ्गी-कार्यम्। ततश्च पर्वतो वह्निमान् धूमाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतानिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियो-गितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्व -गगनोभयाभावः गृहीतः सः धर्तुं न शक्यते, यतः तादृशोभयाभावीयप्रतियोगितायाः निरूपितत्व-सम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेद-कताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वेतरगगनेऽपि सत्त्वाद् निरूपितत्वसम्बन्धावच्छिन्न-प्रतियो-गितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकतानिरूपितत्वत्वेतरगगनत्वेनाऽवच्छिन्नत्वमेवेति निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगिता-निष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेद-कतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया तादृशोभयाभावः धर्तुं न शक्यते, अपि तु शुद्धः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठप्रतियोगितावच्छेदकताभिन्नावच्छेदकता-त्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वाभावः एव ग्राह्यः, तादृशाऽ-भावीयप्रतियोगितायाः तादृशभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वे एव सत्त्वेन तादृशभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्वत्वातिरिक्तधर्मानवच्छिन्नत्वात् । तादृशशुद्धभिन्नप्रतियोगिता-

य शो ल ता

वच्छेदकतानिरूपितत्वाभावश्च वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता-वृत्तिप्रतियोगितायां नैव वर्तते, वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता-वृत्तिप्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदक-तात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वात् । तथा च निरूपितत्व-सम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेद-कताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियो-गितावविधया वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुमशक्या, किन्तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव ग्राह्या, तादृशप्रतियोगितायाः प्रतियोगित्वेन अवच्छेदकतात्वेन चैवावच्छिन्नत्वात् तादृशप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रति-योगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वाभावस्य शुद्धस्य सम्भवः इति निरूपितत्व-सम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेद-कताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियो-गितावविधया तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते।

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव विद्यते इति निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ -प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-निरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छे-दकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् । ततश्च निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ -प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-निरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेद-कत्वसम्बन्धेन तादृशमहानसीयवह्न्यभावीयप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ -प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-निरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे वर्तमाना नैव स्यात्, किन्तु वह्न्यभावीयप्रतियोगिता एव वर्तमाना स्यात्, निरूपितत्वसम्बन्धा-वच्छिन्नतादृशवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठ-

प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः, ततश्च वह्न्यभावः एव ग्राह्यः, महानसीयवह्न्यभावः नैव ग्राह्यः, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयः।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां यः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्व-गगनोभयाभावः गृहीतः सः धर्तुं न शक्यते, यतः तादृशोभयाभावीयप्रतियोगिता निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वेऽपि वर्तते, तदितरस्मिन् गगनेऽपि वर्तते, अतः तादृशनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरगगनत्वधर्मावच्छिन्ना एव तादृशोभयाभावीयप्रतियोगिता स्यात्, ततः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविधया तादृशनिरूपितत्व-गगनोभयाभावः कथं धर्तुं शक्यते ?

तथा च यः शुद्धः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वाभावः एव निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं शक्यते, तादृशशुद्धनिरूपितत्वाभावीयप्रतियोगितायाः तादृशनिरूपितत्वे एव वर्तमानत्वेन निरूपितत्वत्वातिरिक्तेन अनवच्छिन्नत्वात् । एतादृशशुद्धनिरूपितत्वाभावस्तु वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां नैव वर्तते, तादृशप्रतियोगितायाः साध्यत्वावच्छेदकतात्वोभयातिरिक्तवह्नित्ववृत्तितावैशिष्ट्येनावच्छिन्नत्वेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नवह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगिता-

वच्छेदकतानिरूपितत्वात् । या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा साध्यत्वावच्छेदकतात्वोभयेनैवाऽवच्छिन्ना, तदतिरिक्तेन अनवच्छिन्ना इति तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वाभावः शुद्धः स्यादेव ।

ततश्च निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगितविधया वह्नित्वावृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता न गृह्यते, किन्तु साध्यतावच्छेदकतानिष्ठप्रतियोगिता एव गृह्यते । साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तु वह्नित्वगतैकत्वं न विद्यते, महानसीयत्व-वह्नित्वगतद्वित्वमेव भवति इति निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्, न वह्नित्वगतैकत्वम् ।

तथा च निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तादृशनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकमहानसीयत्व-वह्नित्वगतद्वित्वरूपे तादृशमहानसीयवह्न्यभावीयप्रतियोगिता एव वर्तमाना भवेत्, न वह्न्यभावीयप्रतियोगिता इति महानसीयवह्न्यभावः एव ग्राह्यः, न वह्न्यभावः इति महानसीयवह्न्यभावाधिकरणे तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयः ।

किन्तु एषः लक्षणसमन्वयः आपाततः एव, असम्भवतादवस्थ्यात् । तद्यथा - भवता प्रतिपादितं यदुत - पर्वतो वह्निमान् धूमाद् - इत्यत्र वह्नित्वावृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-

निरूपितत्व-गगनोभयाभावः गृहीतः सः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं न शक्यते, तादृशोभयाभावीयप्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगितानिष्ठप्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरगगनत्वेनाऽवच्छिन्नत्वात् । एतच्च असारम्, यतः तादृशोभयाभावीयप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरगगनत्वावच्छिन्नत्वसत्त्वेऽपि निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नत्वस्यापि वृत्तित्वमनाविलम् ।

तद्यथा - निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नत्वं = निरूपितत्वसमबन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वाभावः = तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः । निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्व-गगनोभयाभावीयप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नत्वसत्त्वेऽपि गगनं तु नैव वर्तते इति तादृशोभयाभावीयप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः प्राप्यते एव । एतादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगिता तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्वे वर्तते इति तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकभावविधया तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं शक्यते ।

तथा च निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्व-गगनोभयाभावीयप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठ-गगनोभयाभावसत्त्वे निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः = निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वाभावः = निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नत्वं स्यादेव । तथा च निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्ट(= निरूपितत्व-गगनोभयाभावविशिष्ट)प्रतियोगितावधिया वह्नित्व-वृत्तितावशिष्टमहानसीयवह्न्यभावीयप्रतियोगिता धर्तुं शक्यते ।

ततश्च वह्नित्ववृत्तितावशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्य प्राप्तेः निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्ट-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेवेति निरूपितत्व-सम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगिता-वच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतर-धर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-गतैकत्वरूपे तादृशमहानसीयवह्न्यभावीयप्रतियोगितायाः वृत्तिताऽनाविला इति महानसीयवह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयः दुर्निवारः एव ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि ***यत्*** प्रतिपादितं भवता - निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-निरूपितत्व-गगनोभयाभावः वह्नित्ववृत्तितावच्छिन्नसाध्यतावच्छेदकतायां वर्तमानः निरूपितत्व-सम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं न शक्यते, तादृशोभयाभावीयप्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-भिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरगगनत्व--धर्मेणाऽवच्छिन्नत्वात्, ***तन्निःसारम्,*** यतः तादृशनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगिता-वच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्व -गगनोभयाभावीयप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-भिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरगगन-त्वेन अवच्छिन्नत्वसत्त्वेऽपि निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्ना-वच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्न-त्वमपि स्यात्, यतः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेद-कतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नत्वं = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियो-गितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वाभावः = तादृशनिरू-पितत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावः । तादृशनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियो-गितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वस्य तादृशनिरूपितत्व-गगनोभयाभावीयप्रतियोगि-तायां सत्त्वेऽपि गगनं तु नैव वर्तते इति तादृशनिरूपितत्व-गगनोभयाभावीयप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियो-गितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः वर्तते एव । तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायाः तादृशनिरूपितत्व-त्वेतरधर्मावच्छिन्नत्वे वर्तमानत्वेन तादृशोभयाभावः तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रति-

योगिताकाभावविधया धर्तुं शक्यते ।

तथा च निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्व-गगनोभयाभावीयप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगिता-वच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावसत्त्वे निरूपितत्व-सम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः = निरूपितत्व-सम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेद-कताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वाभावः = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतांभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नत्वं स्यादेव । तथा च निरूपितत्वसम्बन्धा-वच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया तादृशनिरूपितत्व-सम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्व-गगनोभयाभावः धर्तुं शक्यते, तादृशोभयाभावश्च वह्नित्ववृत्तिता-विशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां वर्तते एवेति निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-निरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगितावधया तादृशवह्नित्व-वृत्तितावशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते । तथा च निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियो-गितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेव, तत्र च निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽ-वच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छि-न्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तादृशवह्न्यभावीयप्रतियोगितायाः वृत्तित्वसम्भवाद् वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तित्वाऽभावाल्लक्षणा-ऽसमन्वयः दुर्वारः एव।

य शो ल ता

यथा पूर्वं निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्व-गगनोभयाभाववारणाय निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपितत्वं = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मानवच्छिन्नत्वम् इत्यादि परिष्कृतम्, तथैव प्रकृतेऽपि निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपिततत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभाववारणाय निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वं = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितााकाभावः - इत्यादि परिष्कृत्य 'निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितााकाभावविशिष्टप्रतियोगितााकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितााकाभावविशिष्टप्रतियोगितााकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणमभ्युपगन्तव्यम् ।

ततश्च पर्वतो वह्निमान् धूमाद् - इत्यत्र वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितावृत्तिः यः तादृशनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्व-गगनोभयाभावः तादृशोभयाभावीयप्रतियोगितायां यः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः गृहीतः सः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-

प्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं नैव शक्यते, तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायाः तादृश-निरूपितत्वत्वेतरधर्मावच्छिन्नत्वभिन्नगगनेऽपि सत्त्वेन तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतर-गगनत्वेनाऽपि अवच्छिन्नत्वात् । तथा च शुद्धः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ -प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-निरूपितत्वत्वेतरधर्मावच्छिन्नत्वाभावः एव निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगिता-वच्छेकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपित-त्वत्वेतरधर्मावच्छिन्नत्वत्वेवरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया ग्राह्यः, तादृशाऽभावीय-प्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदक-तात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वे एव सत्त्वेन निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतर-धर्मानवच्छिन्नत्वात् ।

तादृशशुद्धनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽव-च्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वाभावः वह्नित्व-वृत्तितावशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां नैव भवति, निरूपि-तत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगिता-वच्छेदकताभिन्नवह्नित्ववृत्तितावशिष्टत्वनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वस्य तादृशप्रतियो-गितायां सत्त्वात् । किन्तु शुद्धमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामेव तादृशाभावः भवेत् । तथा च निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपित-त्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्ट-प्रतियोगिताविधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता एव ग्राह्या, न वह्नित्ववृत्तितावशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता । तथा च निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रति-योगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्न-

य शो ल ता

प्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव भवेत्, न वह्नित्वगतैकत्वम् । तथा च निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्ट-प्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तादृशमहानसीयवह्न्यभावीयप्रतियोगितायाः वृत्तिता न सम्भवति इति महानसीयवह्न्यभावः धर्तुं न शक्यते ।

किन्तु निरूपितत्वसम्बन्धावच्छिन्न-तादृशवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपतत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेदिति वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयः । य शो ल ता

किन्त्वेतदापाततः एव, वस्तुतः न लक्षणसमन्वयः सम्भवति, यतः "निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं न शक्यते, तादृशोभयाभावीयप्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-निरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरगगनत्वावच्छिन्नत्वादि"त्युक्तं तन्निःसारम्, तादृशधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां तादृशधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेऽपि तादृशधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वस्यापि सम्भवात् । तद्यथा - निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्न-(प्रतियोगिता)अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = निरूपितत्वसम्बन्धा-

वच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः । तादृशनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीय-प्रतियोगितायां तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेऽपि गगनं तु नास्त्येवेति तादृशोभयाभावीयप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेद-कताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतर-धर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः स्यादेव ।

एतादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायाः निरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वे सत्त्वेन तादृशनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावविधया धर्तुं शक्यते । तथा च निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावसत्त्वे निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः = निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं स्यादेव ।

तथा च निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतर-

धर्मानवच्छिन्नप्रतियोगिताकाभावविधया तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं शक्यते । तादृशाऽभावविशिष्टप्रतियोगितानिरूपकाभावविधया च तादृशनिरूपितत्व-गगनोभयाभावः धर्तुं शक्यते, तादृशनिरूपितत्व-गगनोभयाभावीयप्रतियोगितायां तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावस्य सत्त्वात् । तादृशनिरूपितत्व-गगनोभयाभावस्य च वह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां सत्त्वाद् निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगिताविधया तादृशवह्नित्ववृत्तितावविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्ट-प्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वं प्राप्यते एवेति महानसीयवह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोर्वृत्तितया लक्षणाऽसमन्वयः दुर्निवार एव ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्रापि निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावमादाय तादृशनिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं शक्यते इति स्यादेव पूर्वोक्तरीत्या लक्षणाऽसमन्वयः ।

ततश्च यथा पूर्वं निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्न-(साध्यता)अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभाववारणाय निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगिता-

वच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्व-त्वेतरधर्मानवच्छिन्नत्वं = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽ-वच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्न-त्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः इत्येवं परिष्कृतम्, तथैव निरूपितत्वसम्बन्धावच्छिन्न -साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगिता-वच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभाववारणार्थं निरूपितत्व-सम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छे-दकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = निरूपितत्व-सम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छे-दकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मा-नवच्छिन्नप्रतियोगिताकाभावः इत्येवं परिष्कार्यम् ।

तथा चैवं लक्षणम् - निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽ-वच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्न-त्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्ट-प्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन निरूपितत्व-सम्बन्धावच्छिन्नसाध्यतानिष्ठप्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्न-प्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणानुसारेण यद्यपि 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र निरूपितत्वसम्बन्धावच्छिन्न -प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्न-प्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं न शक्यते, तादृशोभयाभावीयप्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ -प्रतियोगितावच्छेदकंताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकता-निरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेनाऽवच्छिन्नत्वात् । तथापि तादृशनिरूपितत्व-

त्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावमादाय लक्षणाऽसमन्वयः तदवस्थः एव ।

तन्निवारणाय निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः इत्येवं परिष्कृत्य 'निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकतानिरूपितत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिंताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपगन्तव्यम् ।

एतल्लक्षणे पुनः अनवच्छिन्नत्वप्रवेशः, तथा च अनवच्छिन्नत्वम् = अवच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः इति परिष्कार्यम्, पुनस्तत्र अनवच्छिन्नत्वप्रवेशः, पुनः परिष्कारः इति दुरन्ता इयमनवस्था प्रसज्यते । तथा च द्वितीयलक्षणमपि एवं परिष्कारानन्त्येऽपि अनवस्थानाद् अनवस्थाग्रस्तम्, परित्याज्यमेव ।

अधुना तृतीयलक्षणे अनवस्था प्रदर्श्यते - 'यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपे यत्किञ्चित्स्वावच्छेदकताऽवृत्तिधर्मानव-

य शो ल ता

च्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वर्तमानप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिः । तथा हि - यदि प्रकृते महानसीयवह्न्यभावः ग्राह्यः तदा यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं यत्किञ्चिद्महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपञ्चैकमेव स्यात् तदावश्यकम् । तत्र महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं वर्तते, किन्तु यदि वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता गृह्यते तदा तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं नैव वर्तते, किन्तु वह्नित्वगतैकत्वं स्यात् । ***यद्यपि*** तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता प्रतियोगत्वावच्छेदकतात्व-वह्नित्ववृत्तितावैशिष्ट्यत्रितयेनाऽवच्छिन्ना, तत्र प्रतियोगितावच्छेदकतात्वोभयं न यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया गृह्यते, यावद्महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तित्वात् तादृशोभयधर्मस्य, किन्तु वह्नित्ववृत्तितावैशिष्ट्यं महानसीयवह्न्यभावीयमहानसीयत्वनिष्ठप्रतियोगितावच्छेदतायां न वर्तते इति यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यमिति तदवच्छिन्नत्वमेव तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां स्यात् ***तथापि*** तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वमपि स्यात्, यतः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं = यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वाभावः = यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः । तादृशयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वसत्त्वेऽपि गगनं तु वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां न स्यादेवेति तादृशवह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावः स्यादेव । तादृशोभयाभावीयप्रतियोगितायाः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वेऽपि वर्तमानत्वात् तादृशयत्कि-

या शो ल ता

ञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावविधया तादृशोभयाभावः धर्तुं शक्यते ।

ततश्च वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावसत्त्वे यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः = यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं स्यादेवेति यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितावैशिष्ट्यविधया वह्नित्ववृत्तितावैशिष्टप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः ग्रहणसम्भवाद् यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेव ।

यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं वर्तते इति यत्किञ्चित्स्वावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे तादृशमहानसीयवह्न्यभावीयप्रतियोगितायाः वर्तमानत्वाद् महानसीयवह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयः दुर्वारः । य शो ल ता

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावः धर्तुं शक्यते, यतः वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं स्यात् । यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं = यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वाभावः = यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः । ***यद्यपि*** वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्येनाऽवच्छिन्ना, वह्नित्ववृत्तितावैशिष्ट्यञ्च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मविधया ग्राह्यम्, महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामवर्तमानत्वात्तस्य । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वमेव वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां स्यात्, ***तथापि*** यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वमपि स्यात्, यतः यत्किञ्चित्साध्यतावच्छेदक-

ताऽवृत्तिधर्मावच्छिन्नत्वस्य वह्नित्ववृत्तितावच्छेदकतानिष्ठप्रतियोगितायां सत्त्वेऽपि गगनस्याऽसत्त्वात् तादृशवह्नित्ववृत्तितावच्छेदकतावृत्तिप्रतियोगितायां यत्किञ्चित्-साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावः स्यादेव, तादृशोभयाभावीयप्रतियोगितायाः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वेऽपि सत्त्वेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावविधया तादृशोभयाभावः धर्तुं शक्यते ।

अतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावस्य वह्नित्ववृत्तिता-विशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां सत्त्वे यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः = यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं स्यादेव, तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितावविधया वह्नित्ववृत्तितावविशिष्ट-साध्यतावच्छेदकतावृत्तिप्रतियोगितायाः ग्रहणसम्भवात् तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्ति-धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यात्, वह्नित्व-वृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः । तादृशवह्न्यभावीययत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मा-नवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वमेव अस्ति । अतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपे यत्किञ्चित्स्वावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्या-प्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वह्न्यभावीयप्रतियोगितायाः वृत्तित्वसम्भवाद् वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोर्वृत्तितया लक्षणाऽसमन्वयः दुर्वारः ।

एतल्लक्षणाऽसमन्वयनिवारणाय यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं = यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः, न केवलं यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः - इत्यादि परिष्कृत्य 'यत्किञ्चित्स्वावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रति-योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-रूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमेव अङ्गीकार्यम् ।

ततश्च 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं न शक्यते, यतः तादृशोभयाभावीयप्रतियोगितायाः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वेतरगगनेऽपि सत्त्वेन यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मगगनत्वेनाऽपि अवच्छिन्नत्वात् तादृशयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविधया तादृशयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया कथं धर्तुं शक्यते ? किन्तु यः शुद्धयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वाभावः स एव यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वे एव वृत्तितया शुद्धयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वात्, शुद्धयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वेतराऽवृत्तित्वात् । तादृशः शुद्धयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वाभावः वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां न वर्तते एव, तादृशप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मवह्नित्ववृत्तितावैशिष्ट्यावच्छिन्नत्वसत्त्वात् । किन्तु यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वाभावः शुद्धः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामेव भवेत् । तथा च यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितावधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, तादृशप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् । अतः महानसीयवह्न्यभावः धर्तुं न शक्यते, ततः कुतः लक्षणाऽसमन्वयः ?

'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावः वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां वर्तमानः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं न शक्यते, तादृशोभयाभावीयप्रतियोगितायाः

य शो ल ता

यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वेतरगगनेऽपि सत्त्वेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरगगनत्वेनाऽप्यवच्छिन्नत्वात् । तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं न शक्यते, किन्तु शुद्धः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वाभावः एव ग्राह्यः, तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वेतरस्मिन् तादृशाऽभावीयप्रतियोगितायाः अवर्तमानत्वेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वात् । तादृशः शुद्धयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वाभावः वह्नित्ववृत्तितावैशिष्ट्यसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां नैव वर्तते, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिवह्नित्ववृत्तितावैशिष्ट्यधर्मावच्छिन्नत्वस्य तादृशप्रतियोगितायां सत्त्वात् । किन्तु तादृशाऽभावः साध्यतावच्छेदकतावृत्तिप्रतियोगितायामेव स्यात् । अतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वं नैव प्राप्यते, महानसीयत्व-वह्नित्वगतद्वित्वमेव प्राप्यते, तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः । यत्किञ्चिद्वह्न्यभावीयप्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव वर्तते इति वह्न्यभावः धर्तुं न शक्यते, लक्षणाऽसमन्वयोऽपि नैव स्यात् ।

किन्त्वेतल्लक्षणाऽसमन्वयनिराकरणमापाततः, उक्तपरिष्कारेण यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावादेः वारणसम्भवेऽपि यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावमादाय तादृशोभयाभावग्रहणसम्भवेन लक्षणाऽसमन्वयतादवस्थ्यात् । अयं भावः - पर्वतो वह्निमान् धूमाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वर्तमानयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेऽपि यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वमपि स्यात्, यतः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतर-

धर्मावच्छिन्नत्वाभावः = यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-निष्ठप्रतियोगिताकाभावः। यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां सत्त्वेऽपि गगनस्याऽसत्त्वाद् यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः स्यादेव । तादृशयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायाः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वेऽपि सत्त्वाद् यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावविधया यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं शक्यते ।

अतः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावसत्त्वे यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः = यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं स्यादेवेति यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं शक्यते, तादृशोभयाभावः वह्नित्ववृत्तितावच्छिन्नमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वर्तते एवेति यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्ट-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगिताविधया वह्नित्ववृत्तितावच्छिन्नमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते । तथा च यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्न-प्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वं प्राप्यते इति महानसीयवह्न्यभावः धर्तुं शक्यते, तादृशमहानसीयवह्न्यभावाधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि वह्नित्ववृत्तितावच्छिन्नसाध्यतावच्छेदकतानिष्ठप्रतियोगितायां वर्तमान-यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां यत्किञ्चित्-साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेऽपि यत्किञ्चित्साध्यतावच्छेदक-

ताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वमपि स्यात्, यतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः । तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वस्य यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां सत्त्वेऽपि गगनस्याऽसत्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः स्यादेव, एतादृशोभयाभावीयप्रतियोगितायाः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वेऽपि वर्तमानत्वाद् यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावविधया धर्तुं शक्यते एव ।

तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावसत्त्वे यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः = यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं स्यात् । ततः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं शक्यते । तादृशोभयाभावः वह्नित्ववृत्तितावविशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां वर्तते, तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितावविधया वह्नित्ववृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते इति यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वं प्राप्यते । अतः वह्न्यभावोऽपि धर्तुं शक्यते, वह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयः दुर्निवारः ।

ततश्च यथा पूर्वं यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभाववारणाय यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्नत्वं = यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टत्वम्..... इत्यादि परिष्कृतम्, तथैव यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = यत्किञ्चित्-

साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः..... इत्यादि परिष्कृत्य 'यत्किञ्चित्स्वावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणम् अभ्युपगन्तव्यम् ।

तथा च पर्वतो वह्निमान् धूमाद् - इत्यत्र वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां वर्तमानयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां वर्तमानयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः यः गृहीतः तादृशोभयाभावीयप्रतियोगितायाः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरगगनत्वेनाऽवच्छिन्नत्वात् तादृशयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया तादृशोभयाभावः धर्तुं न शक्यते, किन्तु यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वाभावः शुद्धः एव यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं शक्यते । तादृशशुद्धयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वाभावः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां न स्यात्, किन्तु शुद्धयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वाभावीयप्रतियोगितायामेव स्यात् । तादृशयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वाभावः वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां नैव वर्तते, किन्तु महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायामेव वर्तते ।

तथा च यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगिताविधया तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः एव प्राप्तेः वह्नित्ववृत्तितावैशिष्टमहान-

सीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः अप्राप्तेश्च यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वमेव प्राप्यते, यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं विद्यते इति महानसीयवह्न्यभावः धर्तुं न शक्यते इति न तमादाय लक्षणाऽसमन्वयः ।

किन्त्वेतल्लक्षणाऽसमन्वयनिवारणमपि आपाततः एव ज्ञेयम्, यतः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतर(गगनत्व)धर्मावच्छिन्नत्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां सत्त्वेऽपि यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्माऽवच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वमपि स्यात्। तादृशयत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वाभावः = यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावः । यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायाः यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वेऽपि वर्तमानत्वाद् यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावविधया तादृशोभयाभावः धर्तुं शक्यते।

तादृशोभयाभावश्च यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां वर्तते, तादृशोभयाभावीयप्रतियोगितायां यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेऽपि गगनस्याऽसत्त्वात्। तथा च यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं शक्यते । तादृशाऽभावविशिष्टप्रतियोगिताकाभावविधया

यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं शक्यते, तादृशोभयाभावविशिष्टप्रतियोगितविधया वह्नित्ववृत्तितविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते । तथा च यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितविधया वह्नित्ववृत्तितविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति यत्किञ्चित्प्रतियोगितावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेवेति पुनः लक्षणाऽसमन्वयः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितविशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां वर्तमानयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां वर्तमानयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां वर्तमानयत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेन लक्षणाऽसमन्वयनिवारणम्, पुनः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावमादाय लक्षणाऽसमन्वयः इति विभावनीयम् ।

ततश्च एतल्लक्षणाऽसमन्वयनिवारणार्थं पूर्वं यथा यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभाववारणाय यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः - इत्येवं परिष्कृतम्, तथैव यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभाववारणाय यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः - इत्येवं परिष्कृत्य 'यत्किञ्चित्स्वावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-

या शो ल ला

वच्छेदकत्वसम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमङ्गीकार्यम् ।

किन्त्वत्रापि अनवच्छिन्नत्वप्रवेशः, तथा च यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावमादाय लक्षणाऽसमन्वयः । अतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः - इत्येवं परिष्कार्यम्, तत्र पुनः अनवच्छिन्नत्वप्रवेशः, पुनः अवच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावरूपः परिष्कारः निवेशनीयः, पुनः तत्राऽनवच्छिन्नत्वप्रवेशः इति दुरन्ता इयमनवस्था ।

एवं चतुर्थलक्षणेऽपि अनवस्था दुर्निवारा, यतः 'यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपे यावत्स्वावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वर्तमानप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाऽनुसारेण 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादायाऽव्याप्तिः सम्भवत्येव, यतः वह्नित्ववृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपञ्च वह्नित्वगतैकत्वमेव वर्तते । वह्नित्ववृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां ***यद्यपि*** यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नवह्नित्ववृत्तितावविशिष्टसाध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकत्वं वर्तते इति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावविधया वह्नित्ववृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता धर्तुं न शक्यते, ***तथापि*** वह्नित्ववृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां यावत्साध्यता-

वच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकत्वमपि सम्भवति, यतः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकत्वं = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वाभावः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वनिष्ठप्रतियोगितानिरूपकाभावः । यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्व-गगनोभयाभावोऽपि तादृशोभयाभावीयप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वेऽपि सत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वनिष्ठप्रतियोगितानिरूपकाभावविधया धर्तुं शक्यते।

वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वसत्त्वेऽपि गगनस्याऽसत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्व-गगनोभयाभावः स्यादेव, तत्सत्त्वे च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वनिष्ठप्रतियोगितानिरूपकाभावः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वाभावः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकत्वमपि स्यादेवेति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावि‌धया वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः ग्रहणसम्भवाद् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव स्यात्, यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव अस्ति इति वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयः दुर्वारः ।

एवं 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादाय लक्षणाऽसमन्वयः स्यात्, यतः वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वमेव प्राप्यते, साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वमेव अस्ति । वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां यावद्महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिताभिन्नवह्नित्ववृत्तितावि‌शिष्ट-

महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकत्वसत्त्वेऽपि यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकत्वमपि स्यात्, यतः यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकत्वं = यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वाभावः = यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वनिष्ठप्रतियोगितानिरूपकाभावः । यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्व-गगनोभयाभावः तादृशोभयाभावीयप्रतियोगितायाः यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वेऽपि सत्त्वाद् यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वनिष्ठप्रतियोगितानिरूपकाभावविधया धर्तुं शक्यते । वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वसत्त्वेऽपि गगनस्याऽसत्त्वाद् यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्व-गगनोभयाभावः स्यादेव । ततश्च यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वनिष्ठप्रतियोगितानिरूपकाभावः = यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वाभावः = यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकत्वमपि स्यादेवेति यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावि‌धया वह्नित्ववृत्तितावि‌शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता धर्तुं शक्यते ।

अतः महानसीयवह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यादेव, यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वमेव वर्तते इति महानसीयवह्न्यभावः धर्तुं शक्यते, तदधिकरणे धूमहेतोः वृत्तितया लक्षणाऽसमन्वयः सुदुर्निवारः ।

एतल्लक्षणाऽसमन्वयवारणाय यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकत्वं = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावः इत्येवं परिष्कृत्य 'यावत्स्वावच्छेदकतापर्याप्तप्रतियोगिताभिन्न-

प्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपगन्तव्यम् । तथा च 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावच्छिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्व-गगनोभयाभावः गृहीतः सः धर्तुं न शक्यते, यतः तादृशोभयाभावीयप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वेतरगगनेऽपि वर्तमानत्वेन तादृशोभयाभावीयप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरगगनत्वधर्मेणाऽवच्छिन्नत्वात् तादृशोभयाभावः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविधया कथं धर्तुं शक्यते ? किन्तु यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वाभावः शुद्धः एव यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुं शक्यते, तादृशशुद्धनिरूपकत्वाभावीयप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वे एव वर्तमानत्वेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मेणाऽनवच्छिन्नत्वात् ।

तादृशशुद्धनिरूपकत्वाभावस्तु वह्नित्ववृत्तितावच्छिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां नैव वर्तते, यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वस्य तत्र सत्त्वात्, तथा च शुद्धसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायामेव तादृशशुद्धनिरूपकत्वाभावः वर्तते इति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायाः एव ग्राह्यत्वात् तादृशयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं न स्यात्, महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् । महानसीयवह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-

भिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकरूपमेव महानसीयत्व-वह्नित्वगतद्वित्वं वर्तते, वह्न्यभावीययावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकं रूपन्तु वह्नित्वगतैकत्वमेव वर्तते, तथा च महानसीयवह्न्यभावः एव ग्राह्यः, न वह्न्यभावः, महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणाऽसमन्वयः न स्यात् ।

किन्त्वेतदापाततः एव, यतः वह्नित्ववृत्तितावविशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां वर्तमानयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकत्व-गगनोभयाभावीयप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नत्वमपि स्यात्, यतः तादृशनिरूपकत्वत्वेतरधर्मानवच्छिन्नत्वं = तादृशनिरूपकत्वत्वेतरधर्मावच्छिन्नत्वाभावः = तादृशनिरूपकत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावः । यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः, एतादृशोभयाभावीयप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वेऽपि वर्तमानत्वाद्, यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावविधया धर्तुं शक्यते । यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्व-गगनोभयाभावीयप्रतियोगितायां गगनस्याऽसत्त्वाद् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः तादृशनिरूपकत्व-गगनोभयाभावीयप्रतियोगितायां वर्तते, तथा च तादृशोभयाभावीयप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वाभावः = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नत्वं स्यादेव। तथा च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टपर्याप्त्यनुयोगिताविधया तादृशनिरूपकत्व-गगनोभयाभावविशिष्ट-वह्नित्व-

य शो ल ता

वृत्तितावि॰शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता धर्तुं शक्यते, तादृशाऽनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्य प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव स्यात् । ततश्च वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयः ।

एवं पर्वतो वह्निमान् धूमाद् - इत्यत्रापि यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकत्वं = यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावः - इत्येवं परिष्कारेणाऽऽपाततः वह्नित्ववृत्तितावि॰शिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां गृहीतः यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविधया धर्तुमशक्यः यः यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्व-गगनोभयाभावः तन्निवारणाद् लक्षणसमन्वयः, पुनः यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावमादाय तादृशोभयाभावग्रहणसम्भवाल्लक्षणाऽसमन्वयश्च स्यातामेवेति स्वयं विभावनीयम् ।

पूर्वं यथा यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्व-गगनोभयाभाववारणाय यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकत्वं = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः - इत्येवं परिष्कृतम्, तथैव यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभाववारणाय यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मानवच्छिन्नत्वं = यावत्साध्यतवच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः, न यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावमात्रम् इत्यादि परिष्कृत्य 'यावत्स्वावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्न-

य शो ल ता

प्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्ट-प्रतियोगितानिरूपकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपगन्तव्यम् ।

किन्त्वेवमपि आपाततः एव लक्षणाऽसमन्वयनिवारणं स्यात्, यतः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगितानिरूपकाभावः । यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायाः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वेऽपि वर्तमानत्वात् तादृशनिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वनिष्ठप्रतियोगिताकाभावविधया तादृशोभयाभावः धर्तुं शक्यते । 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्नित्ववृत्तितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितायां वर्तमानयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्व-गगनोभयाभावीयप्रतियोगितायां वर्तमानयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावीयप्रतियोगितायां यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वसत्त्वेऽपि यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वमपि स्यात्, यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावस्य सत्त्वात्, तादृशोभयाभावस्य तादृशनिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वरूपत्वसम्भवाच्च । तथा च यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविधया यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्व-गगनोभयाभावः धर्तुं शक्यते, तादृशावच्छिन्नत्व-गगनोभयाभावविशिष्टप्रतियोगितानिरूपकाभावविधया तादृशनिरूपकत्व-गगनोभयाभावस्य प्राप्तेः यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभावविशिष्टप्रतियोगितानिरूपकाभावविधया तादृशयाव-

त्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्व-गगनोभयाभावः धर्तुं शक्यते । तादृशनिरूपकत्व-गगनोभयाभावाधिकरणविधया वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकता-निष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता प्राप्यते, तथा च यावत्साध्यतावच्छेदकतापर्याप्तप्रति-योगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकाभाव-विशिष्टप्रतियोगितानिरूपकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव स्यादिति वह्न्यभावस्य धर्तुं शक्यत्वसिद्ध्या लक्षणाऽसमन्वयः दुर्वारः ।

ततश्च एतल्लक्षणाऽसमन्वयनिवारणार्थं पूर्ववद् यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-भिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वं = यावत्साध्यतावच्छेदकता-पर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नत्वत्वेतरधर्मा-नवच्छिन्नप्रतियोगिताकाभावः - इत्यादि परिष्कृत्य 'यावत्स्वावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रति-योगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभाव-विशिष्टप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगितानिरूपकत्वत्वेतरधर्मावच्छिन्नत्वत्वेतर-धर्मावच्छिन्नत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावविशिष्टप्रतियो-गिताकाभावविशिष्टपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः इत्येवं लक्षणमभ्युपगन्तव्यम् ।

व्या शो ल ता

किन्त्वत्रापि अनवच्छिन्नत्वप्रवेशः वर्तते एव, अतः तादृशाऽनवच्छिन्नत्वमपि अवच्छिन्नत्व-त्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावरूपमङ्गीकार्यम्, तत्र पुनः अनवच्छिन्नत्वप्रवेशः, पुनः उक्तपरिष्कारः, पुनस्तत्राऽनवच्छिन्नत्वप्रवेशः, पुनः परिष्कारः इति दुरन्ताऽनवस्था एतल्लक्षणेऽपि । एवं लक्षणचतुष्टयमपि अनवस्थाग्रस्तं भवत्येव । ततश्च यदि एवंरीत्याऽनवस्थापादनं शक्यं तदा ग्रन्थकृता किमर्थम् एतद्रीत्याऽऽपादनं न कृतम्, अन्यः पन्थाः प्रदर्शितः ?

न चैतद्रीत्याऽनवस्थापादनं केवलमस्माकमेवेष्टम्, किन्तु **व्याप्तिपञ्चकमाथुरीरहस्यवृत्तौ श्रीशिवदत्तमिश्रेणा**ऽपि 'स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-

वृत्तित्वाभावः'- इत्येवं लक्षणानुसारेण उक्तरीत्या एव अव्याप्त्यनवस्थाद्यापादनं कृतम् । तथा च तत्पाठः - (शब्दलेशभेदेऽपि अर्थाभेदादेतावत्पठनसमुपलब्धव्युत्पत्तिशालिनां शब्दकाठिन्यग्रस्तोऽपि अयं पाठः न सर्वथाऽगम्यः इति सावधानमनसा पठनीयम्, प्रयत्नगम्यश्चैषः इति) "ननु पर्याप्तिनिवेशेऽपि 'वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभाववारणाऽसम्भवः, तादृशप्रतियोगितानिरूपितावच्छेदकतायाः अवच्छेदकतात्वेन व्यासज्यवृत्तित्वेऽपि स्वनिरूपितवह्नित्ववृत्तितावैशिष्ट्य-तदवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन महानसीयवह्न्यभावप्रतियोगितायाः वह्नित्वगतैकत्वे सत्त्वात् । (अत्र तदीयमेव टिप्पनकम् - यद्यपि वह्नित्ववृत्तित्ववैशिष्ट्य-अवच्छेदकतात्वोभयधर्मावच्छिन्ना सांसर्गिकप्रतियोगिता नावच्छेदकतात्वावच्छिन्ना, तथापि वह्नित्ववृत्तितावैशिष्ट्य-अवच्छेदकतात्वोभयपर्याप्ताया अपि प्रतियोगितावच्छेदकताया अवच्छेदकतात्वपर्याप्तत्वमक्षतमेवेत्यवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वं वह्नित्वगतैकत्वेऽस्तीति)

य शो ल ता

(न च) सम्बन्धकोटौ निरूपितत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताभिन्ना सती अवच्छेदकतात्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका ईदृशावच्छेदकताद्वयनिरूपिका या अवच्छेदकतानिष्ठसांसर्गिकप्रतियोगिता तन्निरूपकपर्याप्तीत्यादिविवक्षणे न दोषः, तदवच्छेदकतात्वावच्छिन्नसांसर्गिकप्रतियोगितायाः निरूपितत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताभिन्नेन अवच्छेदकतात्वनिष्ठावच्छेदकताभिन्नेन च तत्त्व-तद्व्यक्ति(= वह्नि)वृत्तित्ववैशिष्ट्यनिष्ठावच्छेदकत्वेन च निरूपिततया धर्तुमशक्यत्वाद् ***इति वाच्यम्;***

तदवच्छेदकतानिष्ठसांसर्गिकप्रतियोगितायां तत्त्व-तद्व्यक्तिवृत्तित्ववैशिष्ट्यनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तदवच्छेदकतानिरूपकत्व-घटोभयाभावमादाय तादृशाऽवच्छेदकत्वानिरूपकत्वस्यापि सत्त्वात्तद्दोषतादवस्थ्यात् ।

यदि च 'तादृशावच्छेदकत्वानिरूपकेत्यनेन तादृशाऽवच्छेदकतानिरूपकत्वत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वाऽनिरूपकनिरूपकत्वनिष्ठप्रतियोगिताकाभावस्य विवक्षायां न दोषः, तादृशावच्छेदकतानिरूपकत्व-घटोभयाभावीयप्रतियोगितायाः निरूपकत्वत्वनिष्ठावच्छेदकताभिन्नेन घटत्वनिष्ठावच्छेदकत्वेन निरूपकत्वाद् वारणम्' ***इत्युच्यते,***

तदाऽसम्भवः, निरूपकत्वत्वनिष्ठावच्छेदकताया अपि निरूपकत्वत्वनिष्ठावच्छेदकता-घटोभयभेदवत्त्वात् । तादृशावच्छेदकतात्वावच्छिन्नप्रतियोगिताकभेदविवक्षणे त्वनवस्था इति" (व्या. मा. रहस्य. वृ. पृ. ३३-३४) इति ।

इत्थञ्च एतद्रीत्या एव अनवस्थापादनसम्भवे किमर्थं विभिन्नः पन्थाः भवता ग्रन्थकृता च प्रदर्शितः ? ***इति चेत् ?***

न, तथा अनवस्थाऽसम्भवात् । अयमाशयः - भवता यथा प्रदर्शितं तथा अव्याप्तिः अनवस्था वा नैव भवति, यतः पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयवह्न्यभावमादाय 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादाय च अव्याप्तिरेव कुत्राऽपि लक्षणे न वर्तते । तद्यथा -

प्रथमलक्षणानुसारेण = स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणानुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र यदि महानसीयवह्न्यभावः धर्तुमिष्यते तदा तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपञ्चैकं स्यात्तदावश्यकम् । किन्तु प्रकृते साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिता तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिता चैवाऽप्रसिद्धा, यतः वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिताऽपि साध्यतावच्छेदकतात्वेन तु अवच्छिन्ना भवेदेव, साध्यतावच्छेदकतात्वमपि च साध्यतावच्छेदकतात्वेतरत्, साध्यतावच्छेदकतात्व-गगनोभयभिन्नत्वात् । तथा च साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताऽप्रसिद्ध्या महानसीयवह्न्यभावः कथं धर्तुं शक्यते ? सर्वस्य लक्षणस्याऽप्रसिद्धत्वात् । तथा चाऽप्रसिद्धिनिबन्धना अनवस्था ग्रन्थकृदुक्ता सम्भवेत्, किन्तु महानसीयवह्न्यभावमादाय लक्षणाऽसमन्वयः, तन्निबन्धना च अनवस्था न सम्भवति, एवं सर्वेषु लक्षणेषु विभावनीयम् ।

यदि च "ननु अस्माभिरुक्तं यथा तथाऽनवस्था सम्भवत्येव, यतः साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिता महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिता च प्रसिद्धे एव, साध्यतावच्छेदकतात्वेतरधर्मविधया साध्यतावच्छेदकतात्वस्य प्राप्तौ अपि, साध्यतावच्छेदकतात्वावच्छिन्नत्वस्य वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां वर्तमानत्वेऽपि साध्यतावच्छेदकतात्वावच्छिन्नत्व-गगनोभयं तु वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां नैव भवेदिति साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताविधया वह्नित्ववृत्तिसाध्यता-

अवच्छेदकतात्वभेदस्याऽपि तथैव परिष्कारेऽनवस्थाप्रसङ्गः ।

वच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते । वह्नित्ववृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वं प्राप्यते इति साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यात् ।

एवं महानसीयवह्न्यभावीयवह्नित्ववृत्तितावैशिष्ट्यप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः वह्नित्ववृत्तितावैशिष्ट्य-प्रतियोगितावच्छेदकतात्वोभयेनाऽवच्छिन्नत्वेऽपि वह्नित्ववृत्तितावैशिष्ट्य-प्रतियोगितावच्छेदकतात्वोभयस्य प्रतियोगितावच्छेदकतात्वेतरत्वेऽपि च वह्नित्ववृत्तितावैशिष्ट्य-प्रतियोगितावच्छेदकतात्वोभयावच्छिन्नत्व-गगनोभयाभावस्य वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां सत्त्वात् तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नत्वं तादृशवह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां स्यादेवेति तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्वगतैकत्वमेव स्यात् । तथा च महानसीयवह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयः इति पुनः पुनः तदेवाऽऽवर्तते पूर्वोक्तरीत्या, ततश्च अनवस्थाऽऽपादनं पूर्ववदेव विज्ञेयम्, सर्वेषु लक्षणेषु एवमनवस्था स्यादेवेति कथमुच्यते एवमसम्भवाऽनवस्थाद्यसम्भवः" ***इत्युच्यते; तदाऽपि*** साध्यतावच्छेदकतात्वेतरत्वादिकमाश्रित्याऽनवस्थासम्भवे तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नत्व-साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नत्वादिकमाश्रित्यानवस्थापादनस्याऽयुक्तत्वाऽच्युतेः इति विभावनीयम् । एवञ्च उक्तरीत्याऽपि लक्षणासमन्वयः सम्भवति एवेति अङ्गीकर्तव्यमेव ।

एतत्सर्वं मनसिकृत्याह - **अवच्छेदकतात्वभेदस्यापि तथैव परिष्कारे** = साध्यतावच्छेदकतात्वभेदस्य प्रतियोगितावच्छेदकतात्वभेदस्य च तथैव परिष्कारे = यथा पूर्वं साध्यतावच्छेदकतात्वा-

★ ગ્રંથકાર કહી રહ્યા છે તે જ વાત ★

शब्दार्थ :- અવચ્છેદકતાત્વભેદનો પણ તાદેશ પરિષ્કાર કરવામાં આવે તો અનવસ્થા દોષની આપત્તિ આવશે. મતલબ કે , સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્ન = સાધ્યતાઅવચ્છેદકતાત્વઅતિરિક્તધર્મઅનવચ્છિન્ન - આવું માનવા છતાં સાધ્યતાઅવચ્છેદકતાત્વ-

वच्छिन्नत्वस्य साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः इत्येवं परिष्कृतम्, तथैव साध्यतावच्छेदकतात्वेतरत्वं = साध्यतावच्छेदकतात्वभेदः = साध्यतावच्छेदकतात्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेद इत्येवं परिष्क्रियते तदा **अनवस्थाप्रसङ्गः**, तादृशपरिष्कारेऽपि साध्यतावच्छेदकतात्वत्वेतरत्वप्रवेशेन तस्याऽपि साध्यतावच्छेदकतात्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदरूपत्वपरिष्कारः कर्तव्यः, तत्र पुनः साध्यतावच्छेदकतात्वत्वत्वेतरत्वप्रवेशेन तस्यापि साध्यतावच्छेदकतात्वत्वत्वत्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदरूपत्वपरिष्कारः कर्तव्यः इति अनवस्थाप्रसङ्गः ।

अथ पुनरपि शङ्कते - **यदि चे**त्यादि । पूर्वपक्षस्याऽयमाशयः - ननु असम्भवोऽनवस्था इत्यादिकं सर्वं यद् आपादितं तत्सर्वमुलूककल्पम् अस्मत्परिष्काररविकरनिकरोदयमात्रेण निरस्ततामेष्यति । तत्र 'साध्यतावच्छेदकतात्वधर्मावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपे स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वर्तमानप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वत्वाभावः' - इत्येवं लक्षणानुसारेण परिष्कारः एवं बोद्धव्यः - साध्यतावच्छेदकतात्वावच्छिन्नत्वं = साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकाभावः - इत्येव न केवलम्, किन्तु विलक्षणप्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्व-

ગગનઉભયભેદ લઈને અસંભવ આવે જ. તે દૂર કરવા માટે સાધ્યતાઅવચ્છેદકતાત્વઅતિરિક્ત = સાધ્યતાઅવચ્છેદકતાત્વત્વઅતિરિક્તધર્મઅનવચ્છિન્નપ્રતિયોગિતાનિરૂપકભેદવિશિષ્ટ - આ પ્રમાણે પરિષ્કાર કરો તો અનવસ્થા દોષ લાગુ પડી જશે. કારણ કે આ ખુલાસા પછી પણ ગગનમિશ્રિતભેદ લઈને અસંભવ આવવાનો જ. માટે, નવા - નવા ખુલાસા તમારે કરે જ રાખવા પડશે. પરિણામે, અનવસ્થા દોષ જડબેસલાક રીતે આવી જશે. આ લક્ષણ તો હવે તમારે છોડવું જ રહ્યું.

❁ અસંભવ થશે દૂર 'વિલક્ષણ પ્રતિયોગિતા'થી ❁

પ્રશ્ન :- (**यदि**.) (મૂળ પૂર્વપક્ષની સામે આ પ્રશ્ન કરનાર છે, જે **यदि.....इत्युच्यते** - ત્યાં સુધી પોતાની માન્યતા રજૂ કરી આ અસંભવ દોષ દૂર કરશે. પછી પાછો પૂર્વપક્ષ ઉત્તર આપશે અને પોતાનું મંતવ્ય રજૂ કરશે. ત્યાર બાદ મુખ્ય ઉત્તરપક્ષ આવશે.)

જુઓ ! અમે તમને અસંભવ દોષ દૂર કરી આપીએ. આપણો મૂળ વિવાદ એ છે

विशिष्टभेदवद्धर्मानवच्छिन्नत्वम् - इत्येवं रूपम् । तथा चैवं लक्षणम् - विलक्षणप्रतियोगितासंसर्गेण स्वावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन विलक्षणप्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपक-

●

કે સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્ન = શું ? જો સાધ્યતાઅવચ્છેદકતાત્વઅતિરિક્તધર્મ-અનવચ્છિન્ન અર્થ કરો તો અનવસ્થા દોષ લાગુ પડે છે. (સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નનો જ પ્રવેશ કરાવવામાં આવે તો વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્યઅવચ્છિન્ન પ્રતિયોગિતાને લઈને અવ્યાપ્તિ દોષ લાગુ પડી જાય. માટે, તેની જગ્યાએ બીજો પરિષ્કાર મૂકવો અનિવાર્ય છે.)

મૂળ અમારું લક્ષણ છે - સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિ-અનુયોગિતાઅવચ્છેદક રૂપમાં સ્વઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિ-અનુયોગિતાઅવચ્છેદકત્વસંબંધથી વૃત્તિપ્રતિયોગિતાનિરૂપકઅભાવઅધિકરણઅવૃત્તિત્વ.

⌘ અવ્યાપ્તિના મૂળની તપાસ ⌘

આ લક્ષણમાં '**महानसीयवह्निः अत्र वर्तते**' - **इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वात्** અને '**पर्वतो वह्निमान् धूमात्**' - આ બન્ને સ્થલમાં અવ્યાપ્તિ આવે છે. પ્રથમ સ્થલમાં સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નવહ્નિત્વવૃત્તિતાવૈશિષ્ટ્યઅવચ્છિન્ન પ્રતિયોગિતા કે જે માત્ર વહ્નિત્વમાં રહે છે તે પ્રતિયોગિતાને લઈને તાદૃશપ્રતિયોગિતાનિરૂપકપર્યાપ્તિ-અનુયોગિતાઅવચ્છેદક રૂપ વહ્નિત્વગતએકત્વ બનાવી શકાય છે. આ વહ્નિત્વગતએકત્વ રૂપમાં સ્વઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વ-સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતા રહી જાય છે. કારણ કે વહ્નિઅભાવીયપ્રતિયોગિતા-અવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપ પણ વહ્નિત્વ-ગતએકત્વ જ છે. માટે, તાદૃશપ્રતિયોગિતાનિરૂપકવહ્નિઅભાવ લઈ શકાશે. અવ્યાપ્તિ સ્પષ્ટ છે. **पर्वतो वह्निमान् धूमात्** - આ સ્થલમાં પણ મહાનસીયવહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક-તાત્વ-વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્યઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપ વહ્નિત્વગતએકત્વ થઈ જવાથી મહાનસીયવહ્નિઅભાવીયપ્રતિયોગિતા સાધ્યતાઅવચ્છેદકતાત્વ-અવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદક વહ્નિત્વગતએકત્વરૂપમાં સ્વઅવ-ચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વસંબંધથી રહી જશે. માટે, તાદૃશપ્રતિયોગિતાનિરૂપક મહાનસીયવહ્નિઅભાવ લઈ શકાતા અવ્યાપ્તિ સ્પષ્ટ છે.

આ બન્ને અવ્યાપ્તિ દૂર કરવા માટે સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નનો અને

पर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः । एवमेव लक्षणाङ्गीकारे यथा असम्भवः अनवस्था वा पूर्वमापादिता तथा अत्र नैव स्यात् । लक्षण-समन्वयश्चैवम् - 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र वह्नित्ववृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगिता साध्यतावच्छेदकतात्वेतरधर्मेणाऽनवच्छिन्ना एव, तत्र यद्यपि साध्यतावच्छेदकतात्वमपि साध्यतावच्छेदकतात्वभिन्नं पूर्वं प्रस्थापितं भवता तथापि विलक्षणप्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्व-विशिष्टभेदवद्धर्मविधया साध्यतावच्छेदकतात्वं नैव धर्तुं शक्यते, यतः साध्यतावच्छेदकतात्वभेदः शुद्धः, साध्यतावच्छेदकतात्व-गगनोभयभेदः..... इत्यादयः सर्वेऽपि भेदाः परस्परं भिन्नाः भिन्नाः एव । अतः शुद्धसाध्यतावच्छेदकतात्वभेदीय-यादृशप्रतियोगिता साध्यतावच्छेदकतात्वे

●

प्रतियोगिताअवच्छेदकतात्वअवच्छिन्ननो એવો પરિષ્કાર કરવો જરૂરી બન્યો કે જે પરિષ્કાર દ્વારા વહ્નિત્ववૃત્તितावैशिष्ट्यअवच्छिन्नप्रतियोगिता લઈ ન શકાય. અમે પૂર્વે साध्यता-अवच्छेदकतात्वअवच्छिन्ननो અને प्रतियोगिताअवच्छेदकतात्वअवच्छिन्ननो क्रमशः साध्यता-अवच्छेदकतात्वअतिरिक्तधर्मअनवच्छिन्न અને प्रतियोगिताअवच्छेदकतात्वअतिरिक्तधर्म-अनवच्छिन्न - આ પ્રમાણે પરિષ્કાર કર્યા. તેનાથી ઉક્ત બન્ને આપત્તિ દૂર થઈ ગઈ. કારણ કે ઉક્ત બન્ને આપત્તિ ત્યારે જ આવી શકે કે જ્યારે वह्नित्ववृत्तितावैशिष्ट्यअवच्छिन्न પ્રતિયોગિતા લઈ શકાય. वह्नित्ववृत्तितावैशिष्ट्यधर्म તો साध्यताअवच्छेदकतात्वથી અતિરિક્ત હોવાથી નૂતન પરિષ્કાર મુજબ वह्नित्ववृत्तितावैशिष्ट्यअवच्छिन्न પ્રતિયોગિતા લઈ ન શકાય. માટે, અવ્યાપ્તિ આવવાનો કોઈ પ્રશ્ન રહેતો નથી.

પરંતુ આ બન્ને પરિષ્કારમાં साध्यताअवच्छेदकतात्व-गगनઉભયભેદ લઈ साध्यता-अवच्छेदकतात्वधर्मને જ साध्यताअवच्छेदकतात्वથી અતિરિક્ત સાબિત કરી દેતા અસંભવ દોષ આવ્યો. તેમાંથી બહાર નીકળવા જે પરિષ્કાર કર્યો તેમાં પુનઃ અસંભવ દોષ. આ રીતે અનવસ્થા ચાલી. માટે, साध्यताअवच्छेदकतात्वअतिरिक्तधर्मअनवच्छिन्नની જગ્યાએ साध्यताअवच्छेदकतात्वअवच्छिन्ननો કોઈ નવો જ પરિષ્કાર કરવો પડશે. તે પરિષ્કાર કરી લક્ષણ આ પ્રમાણે બનાવી શકાશે - विलक्षणप्रतियोगितासंबंधથી साध्यताअवच्छेदकतात्व-विशिष्टभेदविशिष्टअवच्छिन्नत्वअभावविशिष्टप्रतियोगितानिरूपकपर्याप्तिअनुयोगिता-अवच्छेदक રૂપમાં विलक्षणप्रतियोगितासंबंधથી प्रतियोगिताअवच्छेदकतात्वविशिष्टभेद-विशिष्टअवच्छिन्नत्वअभावविशिष्टप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकत्वसंबंधથી वृत्तिप्रतियोगितानिरूपकअभावअधिकरणअवृत्तित्व.

अस्ति तादृशप्रतियोगिता साध्यतावच्छेदकतात्व-गगनोभयभेदीया न सम्भवति, अर्थात् साध्यतावच्छेदकतात्वनिष्ठा शुद्धसाध्यतावच्छेदकतात्वभेदीयप्रतियोगिता साध्यतावच्छेदकतात्व-गगनोभयभेदीयप्रतियोगिता च भिन्ना भिन्ना एव ।

तथा च स्वनिष्ठयादृशप्रतियोगितानिरूपकत्वसंसर्गेण तादृशसाध्यतावच्छेदकतात्वं शुद्धसाध्यतावच्छेदकतात्वभेदे वर्तते, तादृशप्रतियोगितानिरूपकत्वसंसर्गेण न हि साध्यतावच्छेदकतात्वम् अन्यत्र कुत्रापि साध्यतावच्छेदकतात्व-गगनोभयभेदादौ वर्तते इति सिध्यति। प्रतियोगी अभावे स्वनिष्ठप्रतियोगितानिरूपकत्वसंसर्गेण वर्तते, स्वनिष्ठप्रतियोगितानिरूपकत्वमेव संक्षेपेण प्रतियोगितासंसर्गः अपि कथ्यते इति प्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वं स्वभेदे = साध्यतावच्छेदकतात्वभेदे वर्तते - इति कथ्यते, एवं घटः प्रतियोगितासंसर्गेण घटाभावे वर्तते इत्यपि कथ्यते, सर्वत्र प्रतियोगितासंसर्गः = स्वनिष्ठप्रतियोगितानिरूपकत्वसंसर्गः इति बोध्यम् । तथा च साध्यतावच्छेदकतात्वभेद-साध्यतावच्छेदकतात्व-गगनोभयभेदयोः प्रतियोगितयोः ऐक्याऽभावाद् न हि एकेनैव प्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वं साध्यतावच्छेदकतात्वभेदे साध्यतावच्छेदकतात्व-गगनोभयभेदे च वर्तते । ततश्च विलक्षणप्रतियोगितासंसर्गेण = यादृशप्रतियोगिता-

❋ असंभवदोषनी दवा ❋

હવે લક્ષણસમન્વય કરીએ - સ્થલ **पर्वतो वह्निमान् धूमात्** લઈએ. આ સ્થલમાં લક્ષણસમન્વય કરવા માટે સૌ પ્રથમ સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્ન એવી પ્રતિયોગિતા કે જે સાધ્યતાઅવચ્છેદકતામાં રહેનારી હોય તે મળવી જોઈએ. સાધ્યતાઅવચ્છેદકતામાં રહેનારી પ્રતિયોગિતા કે જે સાધ્યતાઅવચ્છેદકતાત્વથી અવચ્છિન્ન છે તે પ્રતિયોગિતામાં વિલક્ષણપ્રતિયોગિતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વવિશિષ્ટભેદવિશિષ્ટ જે કેવલ અવચ્છેદકતાત્વ વગેરે તેનાથી અવચ્છિન્નત્વનો અભાવ તે પ્રતિયોગિતામાં રહેવો જોઈએ - આ રીતે નવા પરિષ્કાર પ્રમાણે ઘટે.

આપણે વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્યઅવચ્છિન્નપ્રતિયોગિતાની બાદબાકી કરવી છે. માત્ર સાધ્યતાઅવચ્છેદકતાત્વથી જ અવચ્છિન્ન પ્રતિયોગિતા લેવી છે. મતલબ કે સાધ્યતાઅવચ્છેદકતાત્વથી અતિરિક્ત એવા ધર્મથી અનવચ્છિન્ન એવી પ્રતિયોગિતા લેવી છે. મતલબ કે સાધ્યતાઅવચ્છેદકતાત્વપ્રતિયોગિકભેદવિશિષ્ટધર્મથી અવચ્છિન્નત્વનો અભાવ રહેવો જોઈએ.

संसर्गेण साध्यतावच्छेदकतात्वं साध्यतावच्छेदकतात्वभेदे एव वर्तते तादृशप्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वविशिष्टभेदविधया साध्यतावच्छेदकतात्वभेदः शुद्धः एव ग्रहीतुं शक्यते, साध्यतावच्छेदकतात्व-गगनोभयभेदः नैव । साध्यतावच्छेदकतात्वभेदः शुद्धः साध्यतावच्छेदकतात्वे तु नैव वर्तते, किन्तु अन्यत्र घट-पटादौ एव भवेत्, वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्ति-प्रतियोगिता तादृशघट-पटादिना अनवच्छिन्ना एव । तथा च तादृशवह्नित्ववृत्तिसाध्यता-वच्छेदकतानिष्ठप्रतियोगितायां विलक्षणप्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वविशिष्टभेदवद्-(= साध्यतावच्छेदकतात्वभेदवद्)धर्मानवच्छिन्नत्वसत्त्वाद् विलक्षणप्रतियोगितासंसर्गेण साध्यता-वच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तिसाध्यतावच्छेदकतानिष्ठ-प्रतियोगिता धर्तुं शक्यते । तादृशवह्नित्ववृत्तिसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्या-प्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव विद्यते इति विलक्षणप्रतियोगितासंसर्गेण साध्यता-वच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव स्यात् ।

य शो ल ता

●

ઉભયભેદનું નિવારણ

આટલું જ કહેવામાં આવે તો સાધ્યતાઅવચ્છેદકતાત્વ-ગગનઉભયભેદ પકડાઈ જાય. માટે હજુ થોડું ઊંડાણમાં વિચારવું પડશે. ભેદ સાધ્યતાઅવચ્છેદકતાત્વપ્રતિયોગિક છે. માટે સ્વપ્રતિયોગિકત્વસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વ ભેદમાં રહે. આ સ્વપ્રતિયોગિકત્વને ટૂંકમાં પ્રતિયોગિતા પણ કહેવાય. મતલબ કે પ્રતિયોગિતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વ ભેદમાં રહી જાય. અહીં એક વાત વિચારો કે સાધ્યતાઅવચ્છેદકતાત્વ-ગગનઉભયભેદની પ્રતિયોગિતા અને માત્ર સાધ્યતાઅવચ્છેદકતાત્વભેદની પ્રતિયોગિતા ભિન્ન-ભિન્ન છે કે એક જ છે ? ભિન્ન - ભિન્ન જ છે. મતલબ કે સાધ્યતાઅવચ્છેદકતાત્વ-ગગનઉભયભેદીયપ્રતિયોગિતા પણ સાધ્યતાઅવચ્છેદકતાત્વમાં રહે છે અને શુદ્ધ સાધ્યતાઅવચ્છેદકતાત્વભેદીયપ્રતિયોગિતા પણ સાધ્યતાઅવચ્છેદકતાત્વમાં રહે છે. પરંતુ, આ બન્ને પ્રતિયોગિતા ભિન્ન - ભિન્ન છે. માટે, જે પ્રતિયોગિતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વ સાધ્યતાઅવચ્છેદકતાત્વ-ગગનઉભય-ભેદમાં રહે છે. તેના કરતા વિલક્ષણ = ભિન્નપ્રતિયોગિતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વ સાધ્યતાઅવચ્છેદકતાત્વભેદમાં રહે. બસ, આ જ વાત ઉપર અમારા નૂતન લક્ષણનું કેન્દ્રબિંદુ રહેલ છે. જે પ્રતિયોગિતાસંબંધથી માત્ર સાધ્યતાઅવચ્છેદકતાત્વ શુદ્ધસાધ્યતા-અવચ્છેદકતાત્વભેદમાં રહે છે તે પ્રતિયોગિતાસંબંધથી = વિલક્ષણપ્રતિયોગિતાસંબંધથી

વિ ન ભા

अत्र कीदृशी प्रतियोगिता ग्राह्या ? इति पर्यनुयोगे साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्न-प्रतियोगिता ग्राह्या..... इत्याद्युत्तरप्रदानेऽनवस्था, अतः विलक्षणप्रतियोगिता ग्राह्या इत्येव उत्तरः प्रदत्तः । विलक्षणप्रतियोगिता नाम कीदृशी प्रतियोगिता ? इति पर्यनुयोगे यादृशप्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वं शुद्धसाध्यतावच्छेदकतात्वभेदे एव वर्तते, नान्यत्र तादृश-प्रतियोगिता ग्राह्या - इत्येव उत्तरः दातव्यः, नाऽत्र अन्यत्स्पष्टताऽवकाशः, तत्करणेऽ-नवस्थादिदोषजालप्रसङ्गात् । तथा च विलक्षणप्रतियोगितानिवेशे एव निस्तारः, प्रतिप्रतियोगित्वं स्वकीयं स्वकीयं विलक्षणं वैलक्षण्यं वर्तते, तत्र साध्यतावच्छेदकतात्वभेदीयप्रतियोगितायाः एव ग्रहणाय विलक्षणत्वनिवेशे सा एव प्रतियोगिता प्राप्यते, नान्या काऽपीति विलक्षणत्वनिवेशः इति सम्यग् विभावनीयम् ।

●

साध्यताअवच्छेदकतात्वविशिष्ट જે ભેદ હોય તે જ ભેદ લઈ શકાય. આ વિલક્ષણ-પ્રતિયોગિતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વવિશિષ્ટભેદ માત્ર શુદ્ધસાધ્યતાઅવચ્છેદકતાત્વનો ભેદ જ આવશે. સાધ્યતાઅવચ્છેદકતાત્વ-ગગનઉભયનો ભેદ નહીં આવે. કારણ કે તે વિલક્ષણપ્રતિયોગિતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વથી વિશિષ્ટ નથી. હા ! પ્રતિયોગિતા-સંબંધથી સાધ્યતાઅવચ્છેદકતાત્વથી વિશિષ્ટ સાધ્યતાઅવચ્છેદકતાત્વ-ગગનઉભયનો ભેદ થઈ જાય. પરંતુ વિલક્ષણપ્રતિયોગિતાસંબંધથી તો સાધ્યતાઅવચ્છેદકતાત્વથી વિશિષ્ટ માત્ર સાધ્યતાઅવચ્છેદકતાત્વભેદ જ થશે. આ શુદ્ધસાધ્યતાઅવચ્છેદકતાત્વભેદથી વિશિષ્ટ માત્ર સાધ્યતાઅવચ્છેદકતાત્વભિન્ન ધર્મો જ થશે. મતલબ કે વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્ય વગેરે જ થશે. પરંતુ સાધ્યતાઅવચ્છેદકતાત્વ નહીં થાય. આ સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નત્વ જ સાધ્યતા-અવચ્છેદકતાનિષ્ઠપ્રતિયોગિતામાં રહેલું છે. વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્ય વગેરેથી અવચ્છિન્નત્વ નથી રહ્યું. કિંતુ, અવચ્છિન્નત્વનો અભાવ જ રહેલો છે. આમ, વહ્નિત્વવૃત્તિસાધ્યતા-અવચ્છેદકતાનિષ્ઠપ્રતિયોગિતા જ વિલક્ષણપ્રતિયોગિતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વથી વિશિષ્ટ જે ભેદ તેનાથી વિશિષ્ટ જે વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્ય વગેરે તેનાથી અવચ્છિન્નત્વના અભાવવાળી થઈ જશે. કારણ કે વહ્નિત્વવૃત્તિ ઉક્તસાધ્યતાઅવચ્છેદકતામાં રહેલી પ્રતિયોગિતા માત્ર સાધ્યતાઅવચ્છેદકતાત્વથી જ અવચ્છિન્ન છે. આ પ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતા-અવચ્છેદકરૂપ વહ્નિત્વગતએકત્વ થશે. આ વહ્નિત્વગતએકત્વમાં વહ્નિઅભાવીયપ્રતિયોગિતા વિલક્ષણપ્રતિયોગિતાસંબંધથી પ્રતિયોગિતાઅવચ્છેદકતાત્વવિશિષ્ટભેદવિશિષ્ટઅવચ્છિન્નત્વના અભાવવિશિષ્ટપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વસંબંધથી વૃત્તિ છે. કારણ

प्रकृतमनुसरामः - एतत्स्थले विलक्षणप्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वविशिष्टभेदवद्-धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वमेव लब्धम्। प्रकृते यदि महानसीयवह्न्यभावः धर्तुमिष्यते तदा विलक्षणप्रतियोगितासंसर्गेण महानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं स्यात्, तदावश्यकम् । तत्र महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं न वर्तते, किन्तु महानसीयत्व-वह्नित्वगतद्वित्वम्, वह्नित्ववृत्तितावच्छिन्नमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं भवतीति यदि वह्नित्ववृत्तितावच्छिन्नमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता विलक्षणप्रतियोगितासंसर्गेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते तदैव विलक्षणप्रतियोगितासंसर्गेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्व-

य शो ल ता

●

के प्रतियोगिताअवच्छेदकतात्व-गगनउभयभेद अने मात्र प्रतियोगिताअवच्छेदकतात्वभेद - आ बन्ने भेदीयप्रतियोगिता भिन्न-भिन्न छे. प्रतियोगिताअवच्छेदकतात्व-गगनउभय-भेदनिरूपित जे प्रतियोगिता प्रतियोगिताअवच्छेदकतात्वमां रहे अने प्रतियोगिता-अवच्छेदकतात्वभेदनिरूपित जे प्रतियोगिता प्रतियोगितांअवच्छेदकतात्वमां रहे - ते बन्ने भिन्न-भिन्न छे. माटे, जे प्रतियोगितासंबंधथी प्रतियोगिताअवच्छेदकतात्व प्रतियोगिता-अवच्छेदकतात्व-गगनउभयभेदमां रहे ते प्रतियोगिता करतां विलक्षण एवी प्रतियोगितारूप संबंधथी प्रतियोगिताअवच्छेदकतात्व प्रतियोगिताअवच्छेदकतात्वभेदमां रहे.

वि न भा

✲ विलक्षण प्रतियोगिता तरीके ग्राह्य प्रतियोगिता ✲

बस ! विलक्षण प्रतियोगिता तरीके आ ज प्रतियोगिता लेवानी. मतलब के जे प्रतियोगितासंबंधथी प्रतियोगिताअवच्छेदकतात्व शुद्ध प्रतियोगिताअवच्छेदकतात्वभेदमां रहे ते प्रतियोगितासंबंधथी = विलक्षणप्रतियोगितासंबंधथी जे भेदमां प्रतियोगिता-अवच्छेदकतात्व रहे तेनाथी विशिष्ट एवा धर्मोथी अवच्छिन्नत्वनो अभाव जे प्रतियोगितामां रहे ते प्रतियोगिता लेवानी. तादृश विलक्षणप्रतियोगितासंबंधथी प्रतियोगिताअवच्छेदक-तात्वविशिष्टभेद मात्र प्रतियोगिताअवच्छेदकतात्वनो भेद ज बनी शके. गगन-प्रतियोगिता-

गतैकत्वं स्यात्। तत्र वह्नित्ववृत्तितावच्छिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्येन प्रतियोगितावच्छेदकतात्वेन चाऽवच्छिन्ना। विलक्षणप्रतियोगितासंसर्गेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदविधया शुद्धमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदः एव धर्तुं शक्यते, यतः विलक्षणप्रतियोगितारूपेण यादृशप्रतियोगितासंसर्गेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वं शुद्धमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदे वर्तते तादृशप्रतियोगिता एव गृह्यते। ततश्च तथाविधविलक्षणप्रतियोगितासंसर्गेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वं शुद्धमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदे एव स्यात्, नान्यत्र कुत्रचित्, शुद्धमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदीयप्रतियोगितायाः अन्यभेदीयप्रतियोगिताभ्यः सर्वाभ्यः विलक्षणत्वात्, तादृशविलक्षणप्रतियोगितानिरूपकत्वस्य महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदे एव वर्तमानत्वात्, नान्यस्मिन् भेदे । इत्थञ्च विलक्षणप्रतियोगितासंसर्गेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदविधया शुद्धमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदः एव प्राप्यते इति सिध्यति, महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्व-गगनोभयभेदादिकं न लभ्यते, तेषु भेदेषु शुद्धमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदीय-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वनिष्ठप्रतियोगितानिरूपकत्वस्याऽसम्भवात् ।

અવચ્છેદકતાત્વઉભયનો ભેદ ન બની શકે. અને તે શુદ્ધપ્રતિયોગિતાઅવચ્છેદકતાત્વનો ભેદ પ્રતિયોગિતાઅવચ્છેદકતાત્વમાં ન રહે. ઘટત્વ વગેરેમાં રહે. આ ઘટત્વ વગેરેથી વહ્નિઅભાવીયવહ્નિત્વવૃત્તિપ્રતિયોગિતાઅવચ્છેદકતાનિષ્ઠપ્રતિયોગિતા અનવચ્છિન્ન જ છે. તાદશપ્રતિયોગિતા માત્ર પ્રતિયોગિતાઅવચ્છેદકતાત્વથી જ અવચ્છિન્ન છે.

આમ, વહ્નિઅભાવીય-વહ્નિત્વવૃત્તિપ્રતિયોગિતાઅવચ્છેદકતામાં રહેનારી પ્રતિયોગિતામાં વિલક્ષણપ્રતિયોગિતાસંબંધથી પ્રતિયોગિતાઅવચ્છેદકતાત્વથી વિશિષ્ટ એવા પ્રતિયોગિતાઅવચ્છેદકતાત્વના શુદ્ધ ભેદથી વિશિષ્ટ જે ઘટત્વાદિધર્મો તેનાથી અવચ્છિન્નત્વનો અભાવ રહેલો હોવાથી તે પ્રતિયોગિતા લઈ શકાશે. તાદશપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપ પણ વહ્નિત્વગતએકત્વ જ થશે.

આ રીતે, વહ્નિઅભાવીયપ્રતિયોગિતા વિલક્ષણપ્રતિયોગિતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વવિશિષ્ટભેદવિશિષ્ટઅવચ્છિન્નત્વઅભાવવિશિષ્ટપ્રતિયોગિતાનિરૂપકપર્યાપ્તિ-

तादृशशुद्धमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वे न वर्तते, किन्तु वह्नित्ववृत्तितावैशिष्ट्ये तु वर्तते एव, वह्नित्ववृत्तितावैशिष्ट्यस्य महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वरूपत्वाऽसम्भवात् । ततश्च वह्नित्ववृत्तितावैशिष्ट्यावच्छिन्ना वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता विलक्षणप्रतियोगितासंसर्गेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्ना कथं कथ्यते ? वह्नित्ववृत्तितावैशिष्ट्यस्य विलक्षणप्रतियोगितासंसर्गेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवत्त्वात् । तथा च विलक्षणप्रतियोगितासंसर्गेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितारूपेण वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं न शक्यते। या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा विलक्षणप्रतियोगितासंसर्गेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते, तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेनैव अवच्छिन्नत्वात्, वह्नित्ववृत्तितावैशिष्ट्यादिना अनवच्छिन्नत्वात्, तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वस्य विलक्षणप्रतियोगिता-

●

અનુયોગિતાઅવચ્છેદક વહ્નિત્વગતએકત્વરૂપમાં વિલક્ષણપ્રતિયોગિતાસંબંધથી સ્વઅવચ્છેદકતાત્વવિશિષ્ટભેદવિશિષ્ટઅવચ્છિન્નત્વઅભાવવિશિષ્ટપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વસંબંધથી વૃત્તિ હોવાથી તાદૃશપ્રતિયોગિતાનિરૂપક વહ્નિઅભાવ લઈ શકાશે. તેનું અધિકરણ જલહ્રદ. ધૂમ ત્યાં અવૃત્તિ. આમ, લક્ષણસમન્વય થઈ જવાથી અસંભવને કે અવ્યાપ્તિને કોઈ અવકાશ રહેતો નથી.

❋ જો મહાનસીયવહ્નિઅભાવ લેવો હોય તો... ❋

જો અહીં મહાનસીયવહ્નિઅભાવ લેવો હશે તો મહાનસીયવહ્નિઅભાવીયપ્રતિયોગિતા વિલક્ષણપ્રતિયોગિતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વવિશિષ્ટભેદવિશિષ્ટઅવચ્છિન્નત્વઅભાવવિશિષ્ટપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદક વહ્નિત્વગતએકત્વરૂપમાં વિલક્ષણપ્રતિયોગિતાસંબંધથી સ્વઅવચ્છેદકતાત્વવિશિષ્ટભેદવિશિષ્ટઅવચ્છિન્નત્વઅભાવવિશિષ્ટપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વસંબંધથી વૃત્તિ હોવી જોઈએ.

આ વાત તો જ શક્ય બને કે જો વિલક્ષણપ્રતિયોગિતાસંબંધથી મહાનસીયવહ્નિઅભાવીય-

संसर्गेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदाऽविशिष्टत्वाच्च । किन्तु तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्य प्राप्तेः तादृशविलक्षणप्रतियोगितासंसर्गेण महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यादिति महानसीयवह्न्यभावः नैव धर्तुं शक्यते ।

वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेवाऽस्ति । तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता च वह्न्य-भावीयप्रतियोगितावच्छेदकतात्वेनैव अवच्छिन्ना, वह्नित्ववृत्तितावैशिष्ट्यादिना अनवच्छिन्ना, वह्न्यभावीयप्रतियोगितावच्छेदकतात्वे च वह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदः शुद्धः नैव

●

પ્રતિયોગિતાઅવચ્છેદકતાત્વવિશિષ્ટભેદવિશિષ્ટઅવચ્છિન્નત્વઅભાવવિશિષ્ટપ્રતિયોગિતા-નિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વ વહ્નિત્વગતએકત્વમાં રહે. વાસ્તવમાં મહાનસીયવહ્નિ-અભાવીયપ્રતિયોગિતાઅવચ્છેદકતા મહાનસીયત્વમાં અને વહ્નિત્વમાં - બન્નેમાં રહે છે. માટે, માત્ર પ્રતિયોગિતાઅવચ્છેદકતાત્વથી અવચ્છિન્ન પ્રતિયોગિતા લો તો તે પ્રતિયોગિતા તો મહાનસીયત્વવૃત્તિપ્રતિયોગિતાઅવચ્છેદકતામાં પણ રહે અને વહ્નિત્વવૃત્તિપ્રતિયોગિતા-અવચ્છેદકતામાં પણ રહે. તેથી તાદૃશપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપ મહાનસીયત્વ-વહ્નિત્વગતદ્વિત્વ જ થાય, વહ્નિત્વગતએકત્વ નહીં.

જો પ્રતિયોગિતાઅવચ્છેદકતાત્વ-વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્ય-ઉભયઅવચ્છિન્નપ્રતિયોગિતા લો તો તે પ્રતિયોગિતા માત્ર વહ્નિત્વવૃત્તિપ્રતિયોગિતાઅવચ્છેદકતામાં જ રહેતી હોવાથી તાદૃશપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વ વહ્નિત્વગતએકત્વમાં જ રહે. પરંતુ, નૂતનપરિષ્કાર મુજબ વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્ય-પ્રતિયોગિતાઅવચ્છેદકતાત્વઉભયઅવચ્છિન્ન-પ્રતિયોગિતા વિલક્ષણપ્રતિયોગિતાસંબંધથી પ્રતિયોગિતાઅવચ્છેદકતાત્વવિશિષ્ટભેદવિશિષ્ટ-અવચ્છિન્નત્વઅભાવવાન્ થવી જોઈએ. વિલક્ષણપ્રતિયોગિતાસંબંધથી પ્રતિયોગિતા-અવચ્છેદકતાત્વથી વિશિષ્ટ ભેદ શુદ્ધ પ્રતિયોગિતાઅવચ્છેદકતાત્વનો ભેદ જ મળે. પ્રતિયોગિતાઅવચ્છેદકતાત્વ-ગગનઉભયનો ભેદ ન મળે. આ પ્રતિયોગિતાઅવચ્છેદકતાત્વ-વિશિષ્ટભેદથી વિશિષ્ટ વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્ય થઈ જાય, અને વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્ય-

वर्तते । विलक्षणप्रतियोगितासंसर्गेण वह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदविधया शुद्धवह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदः एव प्राप्यते, विलक्षणप्रतियोगिताविधया तादृशी एव प्रतियोगिता प्राप्यते यादृशप्रतियोगितासंसर्गेण वह्न्यभावीयप्रतियोगितावच्छेदकतात्वं वह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदे शुद्धे वर्तते, ततश्च विलक्षणप्रतियोगितासंसर्गेण तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतात्वं शुद्धवह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदे एव स्यात्, अन्यत्र कथं स्यात् ? तादृशशुद्धवह्न्यभावीयप्रतियोगितावच्छेदकतात्वभेदः वह्न्यभावीयप्रतियोगितावच्छेदकतात्वे तु नैव वर्तते इत्युक्तम्, तथा च वह्न्यभावीयप्रतियोगितावच्छेदकतात्वेनैव अवच्छिन्ना वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता विलक्षणप्रतियोगितासंसर्गेण वह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं शक्यते एवेति विलक्षणप्रतियोगितासंसर्गेण तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि वह्नित्वगतैकत्वमेव स्यात् । तथा च वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोः अवृत्तितया लक्षणसमन्वयः सुकरः ।

य शो ल ता

●

અવચ્છિન્નત્વ જ તાદશપ્રતિયોગિતામાં રહેલું છે. વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્યઅવચ્છિન્નત્વનો અભાવ નથી રહ્યો.

માટે જે પ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપ વહ્નિત્વગતએકત્વ થાય છે તે મહાનસીયવહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાત્વ-વહ્નિત્વવૃત્તિતાવૈશિષ્ટ્યઉભયઅવચ્છિન્નપ્રતિયોગિતામાં વિલક્ષણપ્રતિયોગિતાસંબંધથી પ્રતિયોગિતાઅવચ્છેદકતાત્વવિશિષ્ટભેદવિશિષ્ટવહ્નિત્વવૃત્તિતાવૈશિષ્ટ્યઅવચ્છિન્નત્વનો અભાવ નથી રહેતો. માટે, તાદશપ્રતિયોગિતા લઈ નહીં શકાય. માત્ર પ્રતિયોગિતાઅવચ્છેદકતાત્વથી જ અવચ્છિન્ન પ્રતિયોગિતા લેવી પડશે. વિલક્ષણ પ્રતિયોગિતાસંબંધથી પ્રતિયોગિતાઅવચ્છેદકતાત્વથી વિશિષ્ટ જે શુદ્ધપ્રતિયોગિતાઅવચ્છેદકતાત્વનો ભેદ છે તેનાથી વિશિષ્ટ જે ઘટત્વ-વહ્નિત્વ-વૃત્તિતાવૈશિષ્ટ્ય વગેરે પ્રતિયોગિતાઅવચ્છેદકતાત્વ સિવાયના દુનિયાના તમામ ધર્મો તે સર્વ ધર્મોથી અવચ્છિન્નત્વનો અભાવ તાદશપ્રતિયોગિતામાં રહેલો જ છે. કારણ કે તે પ્રતિયોગિતા માત્ર પ્રતિયોગિતાઅવચ્છેદકતાત્વથી જ અવચ્છિન્ન છે.

વિ ન ભા

❋ वह्नित्ववृत्तितावैशिष्ट्यअवच्छेदकतावृत्ति प्रतियोगिता अग्राह्य ❋

આમ, વિલક્ષણપ્રતિયોગિતાસંબંધથી પ્રતિયોગિતાઅવચ્છેદકતાત્વવિશિષ્ટભેદવિશિષ્ટ-

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्रापि वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितावैलक्षण-प्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितावैधया धर्तुं न शक्यते, यतः वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्येनाऽपि अवच्छिन्ना, साध्यतावच्छेदकतात्वेनाऽपि अवच्छिन्ना, तत्र वह्नित्ववृत्तितावैशिष्ट्ये शुद्धः साध्यतावच्छेदकतात्वभेदः वर्तते, साध्यतावच्छेदकतात्वे न वर्तते । विलक्षणप्रतियोगिता-वैधया यादृशप्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वं शुद्धसाध्यतावच्छेदकतात्वभेदे वर्तते, तादृशप्रतियोगितायाः एव प्राप्तेः विलक्षणप्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वविशिष्टभेद-वैधया शुद्धः साध्यतावच्छेदकतात्वभेदः एव प्राप्यते । ततश्च वह्नित्ववृत्तितावैशिष्टत्वधर्मा-वच्छिन्ना। तादृशवह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता विलक्षणप्रतियोगिता-संसर्गेण साध्यतावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितारूपेण धर्तुं न शक्यते ।

अवच्छिन्नत्वअभाववैशिष्टप्रतियोगिता तरीके मात्र प्रतियोगिताअवच्छेदकतात्वथी अवच्छिन्न प्रतियोगिता જ પકડાશે. प्रतियोगिताअवच्छेदकतात्व-वह्नित्ववृत्तितावैशिष्ट्य-उभयअवच्छिन्नप्रतियोगिता લઈ નહીં શકાય. અને માત્ર प्रतियोगिताअवच्छेदकतात्व-अवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदक રૂપ તો વહ્નિત્વગતએકત્વ નથી થતું, મહાનસીયત્વ-વહ્નિત્વગતદ્વિત્વ જ થાય છે.

માટે, મહાનસીયવહ્નિઅભાવીયપ્રતિયોગિતા વિલક્ષણપ્રતિયોગિતાસંબંધથી साध्यता-अवच्छेदकतात्वविशिष्टभेदविशिष्टअवच्छिन्नत्वअभाववैशिष्टप्रतियोगितानिरूपकपर्याप्ति-अनुयोगिताअवच्छेदकवह्नित्वगतएकत्वरूपમાં વિલક્ષણપ્રતિયોગિતાસંબંધથી પ્રતિયોગિતા-अवच्छेदकतात्वविशिष्टभेदविशिष्टअवच्छिन्नत्वअभाववैशिष्टप्रतियोगितानिरूपकपर्याप्ति-अनुयोगिताअवच्छेदकत्वसंबंधथी વૃત્તિ નહીં થાય. માટે, તાદશપ્રતિયોગિતાનિરૂપક મહાન-સીયવહ્નિઅભાવ લઈ નહીં શકાય. માટે, તેના અધિકરણ એવા પર્વત ઉપર ધૂમ વૃત્તિ હોવા છતાં પણ અવ્યાપ્તિને કોઈ અવકાશ રહેતો નથી.

❁ ઉભયભેદનું ગ્રહણ અશક્ય ❁

આ જ રીતે साध्यताअवच्छेदकतात्व-गगनउभयभेदને લઈને જે અસંભવ દોષ આપ્યો હતો તે પણ નહીં આવે. કારણ કે साध्यताअवच्छेदकतात्वને તમે साध्यताअवच्छेदक-

या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा साध्यतावच्छेदकतात्वेनैवाऽवच्छिन्ना, नान्येन केनचित् । साध्यतावच्छेदकतात्वे च शुद्धसाध्यतावच्छेदकतात्वभेदस्य अवर्तमानत्वात् तादृश-विलक्षणप्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वविशिष्टभेदवद्धर्मविधया साध्यतावच्छेदकता-त्वस्याऽप्राप्तिः, विलक्षणप्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वविशिष्टभेदविधया पूर्वोक्तरीत्या शुद्धसाध्यतावच्छेदकतात्वभेदस्यैव प्राप्तेः । अतः साध्यतावच्छेदकतानिष्ठप्रतियोगिता विलक्षण-प्रतियोगितासंसर्गेण साध्यतावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगिताविधया धर्तुं शक्यते। तथा च तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः, वह्नित्वगतैकत्वस्य अप्राप्तेश्च विलक्षणप्रतियोगिता-

य शो ल ता

●

तात्वनिष्ठप्रतियोगितानिरूपक-साध्यताअवच्छेदकतात्व-गगनउभयभेदथी विशिष्ट बनाव्युं हतुं. परंतु हवेना लक्षण मुजब साध्यताअवच्छेदकतात्व-गगनउभयभेद लई ज नहीं शकाय. कारण के जे भेद विलक्षणप्रतियोगितासंबंधथी साध्यताअवच्छेदकतात्वथी विशिष्ट थाय ते ज भेद लई शकाय छे. पूर्वे जोई गया ते मुजब विलक्षणप्रतियोगितासंबंधथी साध्यता-अवच्छेदकतात्वथी विशिष्ट मात्र शुद्धसाध्यताअवच्छेदकतात्वभेद ज थाय छे. साध्यता-अवच्छेदकतात्व-गगनउभयभेद नहीं. माटे, विलक्षणप्रतियोगितासंबंधथी साध्यता-अवच्छेदकतात्वथी विशिष्ट भेद तरीके मात्र शुद्धसाध्यताअवच्छेदकतात्वभेद ज मळी शके अने ते भेद साध्यताअवच्छेदकतात्वमां तो रहे ज नहीं. घटत्वादि धर्मोमां रहे. मात्र साध्यताअवच्छेदकतात्वथी अवच्छिन्न एवी ते प्रतियोगिता साध्यताअवच्छेदकतात्वथी अतिरिक्त घटत्वादि तमाम धर्मोथी अनवच्छिन्न ज छे. माटे, ते प्रतियोगितामां विलक्षण-प्रतियोगितासंबंधथी साध्यताअवच्छेदकतात्वविशिष्टभेदविशिष्ट घटत्वादि धर्मोथी अवच्छि-न्नत्वनो अभाव रही जशे. माटे, असंभव दोषनी आपत्ति पण दूर - सुदूर फेंकाई जशे.

वि न भ्रा

आम, अमारुं लक्षण थयुं -

विलक्षणप्रतियोगितासंबंधथी साध्यताअवच्छेदकतात्वविशिष्टभेदविशिष्टअवच्छिन्नत्व-अभावविशिष्टप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकरूपमां विलक्षणप्रतियोगिता-संबंधथी स्वअवच्छेदकतात्वविशिष्टभेदविशिष्टअवच्छिन्नत्वअभावविशिष्टप्रतियोगिता-निरूपकपर्याप्तिअनुयोगिताअवच्छेदकत्वसंबंधथी वृत्तिप्रतियोगितानिरूपकअभावअधिकरण-अवृत्तित्व. छे कोई तकलीफ आ लक्षणमां ?

संसर्गेण साध्यतावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् । विलक्षणप्रतियोगितासंसर्गेण तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव वर्तते इति वह्न्यभावः धर्तुं न शक्यते, किन्तु विलक्षणप्रतियोगितासंसर्गेण तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं भवेदिति महानसीयवह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयः इति कुतः लक्षणाऽसमन्वयसम्भव्यसम्भवाद्याशङ्काऽपि ?

एवं द्वितीयलक्षणानुसारेण = 'निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकतानिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नाऽवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभिन्नप्रतियोगितावच्छेदकताऽनिरूपित-निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतानिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यादिलक्षणानुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयाद्यभावमादाय असम्भवादिवारणाय निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभिन्नत्वं = निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः इत्येवं नाभ्युपगम्यते, किन्तु विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदः.... इत्यादि परिष्क्रियते । तथा चैवं लक्षणम् - "विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-स्वनिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदवदनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदवदनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः" इति । अत्र विलक्षणप्रतियोगितासंसर्गेणेत्येतत्पदं निरूपितत्वसम्बन्धावच्छिन्न

-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदः - इत्यत्रापि अन्वेति, अवच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदः - इत्यत्रापि अन्वेति इति बोध्यम् ।

तथा च निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेदः विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताविशिष्ट-भेदविधया धर्तुं न शक्यते, यतः विलक्षणप्रतियोगितविधया तादृशी प्रतियोगिता एव धर्तुं शक्यते यादृशप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदे शुद्धे निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता वर्तते । तथा च तथाविध-विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-विशिष्टभेदविधया शुद्धः निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदः धर्तुं शक्यते, निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेदः धर्तुं न शक्यते, यादृशप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदे वर्तते तादृश-प्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेदे अवर्तमानत्वात् । तथा च विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदविधया शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगिता-वच्छेदकताभेदः एव गृह्यते ।

एवं विलक्षणप्रतियोगितासंसर्गेण अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेद-विधया शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदः एव गृह्यते, अवच्छेदकतात्वनिष्ठप्रतियोगि-तावच्छेदकता यादृशप्रतियोगितासंसर्गेण अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदे शुद्धे वर्तते तादृशप्रतियोगितायाः एव विलक्षणप्रतियोगितासंसर्गविधया ग्राह्यत्वात् । यादृशप्रतियोगिता-संसर्गेण अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-भेदे वर्तते, न हि तादृशप्रतियोगितासंसर्गेणैव अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतागगनोभय-भेदेऽपि वर्तते इति विलक्षणप्रतियोगितासंसर्गेण अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्ट-भेदविधया अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-गगनोभयभेदः धर्तुं न शक्यते । शुद्ध-साध्यतानिष्ठ-निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितावच्छेदकताभेदः शुद्धावच्छेदकतात्वनिष्ठप्रति-

या शो ल ता

योगितावच्छेदकताभेदश्च उभयं साध्यतानिष्ठ-निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितावच्छेदकतायां न वर्तते, शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदसत्त्वेऽपि शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदस्याभावात्, अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतायामपि न वर्तते, निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदस्य शुद्धस्य सत्त्वेऽपि अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदस्य शुद्धस्याऽसत्त्वात् । किन्तु वह्नित्व-वृत्तितावैशिष्ट्यादिनिष्ठप्रतियोगितावच्छेदकतायामेव तादृशभेदद्वितयं भवेत् ।

पर्वतो वह्निमान् धूमाद् - इत्यत्र वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितायान्तु शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदविशिष्ट-शुद्धावच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभेदविशिष्टवह्नित्ववृत्तितावैशिष्ट्यादिनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वं नास्ति, तादृशप्रतियोगितायाः साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्नत्वेन, वह्नित्ववृत्तिता-वैशिष्ट्यादिना अनवच्छिन्नत्वेन च निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-निरूपितत्वात्, अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वाच्च, वह्नित्ववृत्तिता-वैशिष्ट्यादिनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वं तत्र न सम्भवतीति विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवद्-वह्नित्ववृत्तितावैशिष्ट्यादिनिष्ठप्रतियोगितावच्छेदकताऽ-निरूपितत्वमेव वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां स्यात्, न तु निरूपितत्वम् ।

अतः विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगिता-वच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदवत्प्रतियोगिता-वच्छेदकताऽनिरूपितप्रतियोगितात्वविधया वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते। वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्व-गतैकत्वस्यैव प्राप्तेः विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवत्प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत् ।

वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यदि गृह्यते तदा तादृशप्रतियोगितायां वह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वं

वर्तते एव, तादृशप्रतियोगितायाः वह्नित्ववृत्तितावैशिष्ट्येनाऽवच्छिन्नत्वात् । पूर्वोक्तरीत्या विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदविधया शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदः एव गृह्यते, न तु निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेदः, यादृशप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठप्रतियोगितावच्छेदकता निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगितानिष्ठप्रतियोगितावच्छेदकताभेदे शुद्धे वर्तते तादृशप्रतियोगितायाः एव विलक्षणप्रतियोगितासंसर्गविधया ग्राह्यत्वात्, न हि यादृशप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकता शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदे वर्तते तादृशप्रतियोगितासंसर्गेणैव निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेदेऽपि वर्तते ।

एवं विलक्षणप्रतियोगितासंसर्गेण अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदविधयाऽपि शुद्धः अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदः एव धर्तुं शक्यते, न अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-गगनोभयभेदः, विलक्षणप्रतियोगिताविधया यादृशप्रतियोगितासंसर्गेण अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदे वर्तते तादृशप्रतियोगितायाः एव ग्रहणात् । तथा च यादृशप्रतियोगितासंसर्गेण अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदे वर्तते तादृशप्रतियोगितासंसर्गेण अन्यत्र कुत्रापि नैव वर्तते, अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-गगनोभयभेदेऽपि नैव वर्तते इति विलक्षणप्रतियोगितासंसर्गेण अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदविधया शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदः एव प्राप्यते। वह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगितावच्छेदकतायां शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदोऽपि वर्तते, शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदोऽपि वर्तते इति विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदवत्प्रतियोगितावच्छेदकताविधया वह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगितावच्छेदकता गृह्यते, वह्नित्ववृत्तितावैशिष्ट्येनाऽवच्छिन्ना वह्नित्ववृत्तितावैशिष्ट्यमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्ति-

य शो ल ता

प्रतियोगिता वह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगितावच्छेदकतानिरूपिता एव वर्तते, नाऽनिरूपिता इति विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगिता-निष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदवत्-प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितात्वविधया वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता कथं धर्तुं शक्यते ?

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, न वह्नित्ववृत्तितावैशिष्ट्यादिना इति तादृशमहानसीयवह्न्य-भावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीय-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतानिरूपितत्वम्, अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-निरूपितत्वञ्च वर्तते, वह्नित्ववृत्तितावैशिष्ट्यादिनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वं नैव। तत्र शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-तादृशमहानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदोभयविशिष्टप्रतियोगितावच्छेदकताविधया निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकता नैव प्राप्यते, अवच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकताभेदस्य शुद्धस्य सत्त्वेऽपि शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगिता-निष्ठ-प्रतियोगितावच्छेदकताभेदस्याऽसत्त्वात्, अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताऽपि नैव धर्तुं शक्यते, निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदस्य शुद्धस्य सत्त्वेऽपि शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदस्याऽसत्त्वात् । तथा च निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतानिरूपितत्वस्य अवच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकतानिरूपितत्वस्य चैव सत्त्वाद् वह्नित्ववृत्तितावैशिष्ट्यादिनिष्ठप्रतियोगिता-वच्छेदकतानिरूपितत्वस्य असत्त्वाच्च महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-तादृशमहानसीयवह्न्यभावीयप्रतियोगिता-निष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदवत्प्र-तियोगिताऽवच्छेदकताऽनिरूपितप्रतियोगितारूपेण धर्तुं शक्यते । तादृशमहानसीयवह्न्यभावीय-प्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-तादृश-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठ-

य शो ला ता

प्रतियोगितावच्छेदकताविशिष्टभेदवत्प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात्, न वह्नित्वगतैकत्वमिति कथं महानसीयवह्न्यभावः धर्तुं शक्यः भवेत् ?

या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता साऽपि प्रतियोगित्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, वह्नित्ववृत्तितावैशिष्ट्यादिना अनवच्छिन्ना इति वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां निरूपितत्वसम्बन्धावच्छिन्न-वह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकतानिरूपितत्वम् अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वञ्चैव स्याताम्, वह्नित्ववृत्तितावैशिष्टत्वनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वं नैव स्यात् । अत्र पूर्वोक्तरीत्या एव विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-वह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदविधया अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदविधया च शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-वह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदस्य शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदस्य चैव प्राप्तिः । शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदवच्छुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदवत्प्रतियोगितावच्छेदकताविधया निरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताऽपि नैव प्राप्यते, शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदस्य सत्त्वेऽपि शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदस्य असत्त्वात्, एवम् अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताऽपि न प्राप्यते, शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-प्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताभेदसत्त्वेऽपि शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदस्याऽसत्त्वात्, किन्तु वह्नित्ववृत्तितावैशिष्ट्यादिनिष्ठप्रतियोगितावच्छेदकता एव प्राप्यते, तया च वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिताऽनिरूपिता एव वर्तते इति विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-वह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदवत्प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितावधया वह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-तादृशवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदव-

या शो ल ता

त्प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत् । तथा च वह्न्यभावः धर्तुं शक्यते, तदधिकरणे धूमहेतोरवृत्तितया लक्षणसमन्वयः सुसम्भवः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र यदि वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता गृह्यते तर्हि तादृशप्रतियोगितायाः वह्नित्ववृत्तितावैशिष्ट्येन साध्यत्वेन अवच्छेदकतात्वेन चाऽवच्छिन्नत्वात् तस्यां निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतानिरूपितत्वम् अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वं वह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगितावच्छेदकतानिरूपितत्वञ्च स्युः । अत्रापि विलक्षणप्रतियोगिताविधया यादृशप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदे शुद्धे वर्तते तादृशप्रतियोगितायाः, यादृशप्रतियोगितासंसर्गेण अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदे वर्तते तादृशप्रतियोगितायाश्चैव ग्रहणाद् विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदविधया अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदविधया च शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदः शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदश्चैव प्राप्येते, निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेदः अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-गगनोभयभेदः वा नैव प्राप्यते, यादृशप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता च यथासङ्ख्यं शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदे अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदे च वर्तेते तादृशप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-गगनोभयभेदे अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-गगनोभयभेदे चाऽवर्तमानत्वात् ।

वह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगितावच्छेदकतायां शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदोऽपि वर्तते, शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदोऽपि वर्तते इति वह्नित्ववृत्तितावैशिष्ट्यनिष्ठप्रतियोगितावच्छेदकतानिरूपिता वह्नित्ववृत्तिता-

विशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्ट-भेदवत्प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगिताविधया कथं धर्तुं शक्यते ?

या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा साध्यत्वेन अवच्छेदकतात्वेन चैवाऽवच्छिन्ना, नान्येन केनचित्, वह्नित्ववृत्तितावैशिष्ट्यादिना अनवच्छिन्ना एव सा । तथा च तादृशप्रतियोगिता-यां निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकतानिरूपितत्वम्, अवच्छेदकतात्व-निष्ठप्रतियोगितावच्छेदकतानिरूपितत्वञ्चैव वर्तते, वह्नित्ववृत्तितावैशिष्ट्यादिनिष्ठप्रतियोगिताव-च्छेदकतानिरूपितत्वं नैव वर्तते । शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगिता-वच्छेदकताभेद-शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदोभयविशिष्टप्रतियोगितावच्छेदकता-विधया तु निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताऽपि नैव प्राप्यते, तत्र शुद्धावच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदसत्त्वेऽपि निरूपितत्वसम्बन्धावच्छिन्न-साध्यता-निष्ठ-प्रतियोगितावच्छेदकताभेदस्य शुद्धस्य असत्त्वात्, अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकता-ऽपि नैव गृह्यते, शुद्धनिरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताभेदसत्त्वे-ऽपि अवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताभेदस्याऽसत्त्वाद् वह्नित्ववृत्तितावैशिष्ट्यादिनिष्ठ-प्रतियोगितावच्छेदकता एव प्राप्यते । तयाऽनिरूपिता साध्यतावच्छेदकतानिष्ठप्रतियोगिता विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकता-विशिष्टभेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदवत्प्रतियोगितावच्छेदकताऽ-निरूपितप्रतियोगिताविधया धर्तुं शक्यते । साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्याऽप्राप्तेः महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेश्च विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-साध्यतानिष्ठ-प्रतियोगितावच्छेदकताविशिष्ट-भेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदवत्प्रतियोगितावच्छेदकताऽनिरूपितप्रति-योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि वह्नित्वगतैकत्वं नैव स्यात्, महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् ।

विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-तादृशवह्न्यभावीयप्रतियोगिता-निष्ठ-प्रतियोगितावच्छेदकताविशिष्टभेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेद-

य शो ल ता

वत्प्रतियोगितावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वमेव प्राप्यते इति वह्न्यभावः धर्तुं न शक्यते, विलक्षणप्रतियोगितासंसर्गेण निरूपितत्वसम्बन्धावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितानिष्ठ-प्रतियोगितावच्छेदकताविशिष्ट-भेदवदवच्छेदकतात्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टभेदवत्प्रतियोगितावच्छेदकताऽनिरूपित-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगतद्वित्वमेव विद्यते, न वह्नित्वगतैकत्वमिति महानसीयवह्न्यभावः एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयः इति नास्त्येवाऽसम्भवादिदोषगन्धोऽपि ।

एवं तृतीयलक्षणानुसारेण = 'यत्किञ्चित्स्वावच्छेदकताऽवृत्तिधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तिधर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः' - इत्येवं लक्षणानुसारेण पर्वतो वह्निमान् धूमाद् - इत्यत्र साध्यतावच्छेदकतात्व-स्याऽपि यत्किञ्चित्साध्यतावच्छेदकतावृत्ति-गगनोभयभेदवत्त्वाद् यत्किञ्चित्साध्यतावच्छेदकता-ऽवृत्तिधर्मविधया ग्राह्यत्वसिद्धिः, ततश्चाऽसम्भवादिकं यदापादितं तदधुना नूतनपरिष्कारेण विशरारुतामेष्यति, यतः यत्किञ्चित्साध्यतावच्छेदकताऽवृत्तित्वं न केवलं यत्किञ्चित्साध्यता-वच्छेदकतावृत्तिनिष्ठप्रतियोगितानिरूपकभेदरूपमपि तु विलक्षणप्रतियोगितासंसर्गेण यत्कि-ञ्चित्साध्यतावच्छेदकतावृत्तिविशिष्टभेदरूपमेव । तथा चैवं लक्षणम् - विलक्षणप्रतियोगिता-संसर्गेण यत्किञ्चित्स्वावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकत्वसम्बन्धेन विलक्षणप्रतियोगितासम्बन्धेन यत्किञ्चित्साध्यतावच्छेदकतावृत्ति-विशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगिता-निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणानुसारेण पर्वतो वह्निमान् धूमाद् - इत्यत्र महानसीयवह्न्यभावमादाय लक्षणाऽ-समन्वयः नैव स्यात्, यतः विलक्षणप्रतियोगितासंसर्गविधया यादृशप्रतियोगितासंसर्गेण यत्किञ्चित्-साध्यतावच्छेदकतावृत्तिधर्माः शुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्तिभेदे वर्तेरन्, तादृशप्रतियोगिता एव धर्तुं शक्यते । शुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्तिभेदः यत्किञ्चित्साध्यतावच्छेदकता-वृत्ति-गगनोभयभेदश्च द्वौ अपि परस्परं भिन्नौ इति तादृशोभयभेदीयप्रतियोगिताभेदोऽपि अवश्य-

मनुगन्तव्यः । ततश्च यादृशप्रतियोगितानिरूपकत्वं शुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्ति-भेदे वर्तते न हि तादृशप्रतियोगितानिरूपकत्वमेव यत्किञ्चित्साध्यतावच्छेदकतावृत्ति-गगनोभयभेदे-ऽपि वर्तते, अतः यादृशप्रतियोगितानिरूपकत्वसंसर्गेण = यादृशप्रतियोगितासंसर्गेण यत्किञ्चित्-साध्यतावच्छेदकतावृत्ति शुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्तिभेदे वर्तते न हि तादृशप्रतियोगिता-निरूपकत्वसंसर्गेणैव = तादृशप्रतियोगितासंसर्गेणैव यत्किञ्चित्साध्यतावच्छेदकतावृत्ति यत्किञ्चित्-साध्यतावच्छेदकतावृत्तिगगनोभयभेदे वर्तते । ततश्च प्रकृते विलक्षणप्रतियोगितविधया यादृशप्रतियोगितासंसर्गेण यत्किञ्चित्साध्यतावच्छेदकतावृत्ति शुद्धयत्किञ्चित्साध्यतावच्छेदकता-वृत्तिभेदे वर्तते तादृशप्रतियोगितायाः एव ग्रहणाद् विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्साध्यता-वच्छेदकतावृत्तिविशिष्टभेदविधया शुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्तिभेदः एव धर्तुं शक्यते, यत्किञ्चित्साध्यतावच्छेदकतावृत्ति-गगनोभयभेदः नैव ।

साध्यतावच्छेदकतात्वे शुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्तिभेदस्तु नैव वर्तते, साध्यता-वच्छेदकतात्वस्य यत्किञ्चित्साध्यतावच्छेदकतावृत्तित्वात् । अतः विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्साध्यतावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मविधया साध्यतावच्छेदकतात्वं न गृह्यते । तथा च साध्यतावच्छेदकतात्वेनैवाऽवच्छिन्ना, तदतिरिक्तेन अनवच्छिन्ना सा साध्यतावच्छेदकतानिष्ठ-प्रतियोगिता विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्साध्यतावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मा-नवच्छिन्नप्रतियोगितविधया साध्यतावच्छेदकतानिष्ठप्रतियोगिता धर्तुं शक्यते । तादृशसाध्यता-वच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्साध्यतावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेत् ।

वह्नित्ववृत्तितविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता वह्नित्व-वृत्तितावैशिष्ट्येन प्रतियोगितावच्छेदकतात्वेन चाऽवच्छिन्ना । अत्रापि विलक्षणप्रतियोगितविधया यादृशप्रतियोगितासंसर्गेण यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्ति शुद्धयत्किञ्चित्प्रतियोगिता-वच्छेदकतावृत्तिभेदे वर्तते तादृशप्रतियोगिता एव गृह्यते इति विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिविशिष्टभेदविधया शुद्धयत्किञ्चित्प्रतियोगितावच्छेदकता-वृत्तिभेदः एव गृह्यते, यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्ति-गगनोभयभेदादि न गृह्यते ।

तादृशशुद्धयत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिभेदः प्रतियोगितावच्छेदकतात्वे न वर्तते, किन्तु वह्नित्ववृत्तितावैशिष्ट्ये स्यादेव, यत्किञ्चित्प्रतियोगितावच्छेदकतायां = महानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायामवर्तमानत्वात्तस्य । तथा च वह्नित्ववृत्तितावैशिष्ट्यावच्छिन्ना वह्नित्ववृत्तितावैशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता शुद्धयत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिभेदवद्धर्मावच्छिन्ना भवतीति विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितावविधया तादृशप्रतियोगिता कथं धर्तुं शक्यते ?

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा प्रतियोगितावच्छेदकतात्वेनैवाऽवच्छिन्ना, वह्नित्ववृत्तितावैशिष्ट्यादिना अनवच्छिन्ना एव, प्रतियोगितावच्छेदकतात्वे च शुद्धयत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिभेदः नैव वर्तते इति विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितावविधया महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते, तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्ववह्नित्वगतद्वित्वस्यैव प्राप्तेः विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यादिति महानसीयवह्न्यभावः धर्तुं न शक्यते ।

या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता सा प्रतियोगितावच्छेदकतात्वेनैवाऽवच्छिन्ना, प्रतियोगितावच्छेदकतात्वे च शुद्धयत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिभेदः नैव वर्तते, तादृशप्रतियोगितावच्छेदकतात्वस्य यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तित्वात्, प्रकृतेऽपि विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिविशिष्टभेदविधया शुद्धयत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिभेदः एव प्राप्यते, तथा च प्रतियोगितावच्छेदकतात्वेनैवाऽवच्छिन्ना, वह्नित्ववृत्तितावैशिष्ट्यादिना अनवच्छिन्ना सा वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितावविधया धर्तुं शक्यते, वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्प्रतियोगितावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं

वह्नित्वगतैकत्वमेव स्यादिति वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयः ।

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्राऽपि वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतावृत्तिप्रतियोगिता वह्नित्व-वृत्तितावैशिष्ट्येन साध्यतावच्छेदकतात्वेन चाऽवच्छिन्ना, अत्रापि विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्साध्यतावच्छेदकतावृत्तिविशिष्टभेदविधया शुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्तिभेदः एव धर्तव्यः, विलक्षणप्रतियोगिताविधया यादृशप्रतियोगितासंसर्गेण यत्किञ्चित्साध्यतावच्छेदकता-वृत्ति शुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्तिभेदे वर्तते तादृशप्रतियोगिताया एव ग्रहणात् । शुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्तिभेदस्तु वह्नित्ववृत्तितावैशिष्ट्ये अस्त्येवेति वह्नित्ववृत्तिता-वैशिष्ट्येनाऽवच्छिन्ना वह्नित्ववृत्तितावैशिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगिता शुद्धयत्किञ्चित्-साध्यतावच्छेदकतावृत्तिभेदवद्धर्मावच्छिन्ना एव भवेदिति विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्-साध्यतावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितावैधया वह्नित्ववृत्तितावैशिष्ट-साध्यतावच्छेदकतानिष्ठप्रतियोगिता कथं धर्तुं शक्यते ?

या साध्यतावच्छेदकतानिष्ठप्रतियोगिता सा साध्यतावच्छेदकतात्वेनैवाऽवच्छिन्ना, साध्यता-वच्छेदकतात्वे च शुद्धयत्किञ्चित्साध्यतावच्छेदकतावृत्तिभेदः नैव वर्तते इति विलक्षणप्रतियोगिता-संसर्गेण यत्किञ्चित्साध्यतावच्छेदकतावृत्तिविशिष्टभेदविशिष्टधर्मविधया साध्यतावच्छेदकतात्वं नैव गृह्यते, तथा च साध्यतावच्छेदकतात्वेनैवाऽवच्छिन्ना साध्यतावच्छेदकतात्वभिन्नवह्नित्ववृत्तिता-वैशिष्ट्यादिना अनवच्छिन्ना सा साध्यतावच्छेदकतानिष्ठप्रतियोगिता विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्साध्यतावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितावैधया धर्तुं शक्यते, साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्व-स्याऽप्राप्तेः महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेश्च विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्-साध्यतावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-रूपविधया महानसीयत्व-वह्नित्वगतद्वित्वमेव प्राप्यते। विलक्षणप्रतियोगितासंसर्गेण यत्किञ्चित्वह्न्यभा-वीयप्रतियोगितावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छे-दकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः वह्न्यभावः धर्तुं न शक्यते । विलक्षणप्रतियोगिता-

संसर्गेण यत्किञ्चिद्महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिविशिष्टभेदवद्धर्मानवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वमेव वर्तते इति महानसीयवह्न्यभावः धर्तुं शक्यते, तदधिकरणे च तज्ज्ञानत्वहेतोः अवृत्तितया लक्षणसमन्वयः स्यादेवेति एतल्लक्षणमपि नूतनपरिष्कारपरिशोभितं सुचारु समजनि इति ।

अधुना 'यावत्स्वावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिता-वच्छेदकत्वसम्बन्धेन यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभिन्नप्रतियोगिताऽनिरूपकपर्याप्त्य-नुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यादि-चतुर्थलक्षणानुसारेण असम्भवादिनिराकरणं चिन्त्यते - अत्र यावत्प्रतियोगितावच्छेदकतापर्याप्त-प्रतियोगिताभिन्नत्वं = यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभेदः = यावत्प्रतियोगितावच्छे-दकतापर्याप्तप्रतियोगितानिष्ठप्रतियोगिताकभेदः इत्येवं नोच्यते, किन्तु यावत्प्रतियोगितावच्छेदकता-पर्याप्तप्रतियोगिताभिन्नत्वं विलक्षणप्रतियोगितासंसर्गेण यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-विशिष्टभेदरूपमभ्युपगम्यते । तथा चैवं लक्षणम् -

'विलक्षणप्रतियोगितासंसर्गेण यावत्स्वावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदवत्प्रति-योगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन विलक्षणप्रतियोगितासंसर्गेण यावत्साध्यता-वच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदवत्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति-प्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' इति ।

पर्वतो वह्निमान् धूमाद् - इत्यत्र लक्षणसमन्वयश्चैवम् - प्रकृते विलक्षणप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदविधया शुद्धयावत्साध्यतावच्छेदकता-पर्याप्तप्रतियोगिताभेदः एव प्राप्यते, यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदः नैव प्राप्यते, यतः विलक्षणप्रतियोगिताविधया यादृशप्रतियोगितासंसर्गेण (= स्वनिष्ठयादृशप्रतियोगिता-निरूपकत्वसंसर्गेण) यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता शुद्धयावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगिताभेदे वर्तते तादृशप्रतियोगितायाः एव ग्रहणमभिप्रेतम् । यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगिता-गगनोभयभेदः शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदः - द्वौ अपि एतौ परस्परं भिन्नौ भिन्नौ एवेति यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदीयप्रतियोगितातः शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदीयप्रतियोगिता विलक्षणा एव स्यात् । अतः

य शो ल ता

यादृशप्रतियोगितानिरूपकत्वं तादृशयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदे वर्तते न हि तादृशप्रतियोगितानिरूपकत्वमेव शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदे वर्तते, यादृशप्रतियोगितानिरूपकत्वञ्च शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदे वर्तते न हि तादृशप्रतियोगितानिरूपकत्वमेव यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदे वर्तते। तथा च यादृशप्रतियोगितासंसर्गेण (= स्वनिष्ठयादृशप्रतियोगितानिरूपकत्वसम्बन्धेन) यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदे वर्तते न हि तादृशप्रतियोगितासंसर्गेणैव (= स्वनिष्ठतादृशप्रतियोगितानिरूपकत्वसंसर्गेणैव) यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदे वर्तते । अतः विलक्षणप्रतियोगितासंसर्गविधया यदि यादृशप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदे वर्तते तादृशप्रतियोगिता एव गृह्यते तदा विलक्षणप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदविधया शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदः एव प्राप्यते, यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदः नैव प्राप्यते ।

तादृशशुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदः वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितायां नैव वर्तते, तादृशप्रतियोगितायाः यावत्साध्यतावच्छेदकतायां वर्तमानत्वात्, तदितरस्मिंश्च अवर्तमानत्वात् । किन्तु तादृशभेदः अन्यत्र कुत्रचिद् वर्तमानप्रतियोगितायामेव स्यात्, तादृशप्रतियोगितानिरूपकत्वं वह्नित्वनिष्ठसाध्यतावच्छेदकतावृत्तिप्रतियोगितामात्रनिरूपकपर्याप्त्यनुयोगितायां नैव वर्तते इति वह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकानुयोगिता विलक्षणप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदवत्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिताविधया धर्तुं शक्यते, तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वस्यैव प्राप्तेः विलक्षणप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदवत्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव स्यात् ।

वह्नित्ववृत्तिताविशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता यावद्-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्ता नास्ति, महानसीयत्वनिष्ठमहानसीयवह्न्य-

भावीयप्रतियोगितावच्छेदकतायां तादृशप्रतियोगितायाः अवर्तमानत्वात्, तथा च वह्नित्ववृत्तिता-विशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां शुद्धयावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभेदः स्यादेव । प्रकृते विलक्षणप्रतियोगिताविधया यादृशप्रतियोगिता-संसर्गेण यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता शुद्धयावत्प्रतियोगितावच्छेदकतापर्याप्त-प्रतियोगिताभेदे एव वर्तते तादृशप्रतियोगिता एव गृह्यते । यादृशप्रतियोगितासंसर्गेण यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता शुद्धयावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-भेदे वर्तते न हि तादृशप्रतियोगितासंसर्गेणैव यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदेऽपि वर्तते इति विलक्षणप्रतियोगिता-संसर्गेण यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदविधया शुद्धयावत्प्रतियोगिता-वच्छेदकतापर्याप्तप्रतियोगिताभेदः एव प्राप्यते, यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता -गगनोभयभेदः नैव प्राप्यते ।

वह्नित्ववृत्तितावच्छिन्नमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां शुद्ध-यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभेदस्य सत्त्वाद् विलक्षणप्रतियोगितासंसर्गेण याव-त्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदवत्प्रतियोगिताविधया वह्नित्ववृत्तितावच्छिन्न-महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता धर्तुं शक्यते इति तन्निरूपकानु-योगिता विलक्षणप्रतियोगितासंसर्गेण यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदव-त्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिताविधया कथं धर्तुं शक्यते ?

या महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपिका अनुयोगिता सा महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः एव निरूपिका, वह्नित्ववृत्तिता-विशिष्टमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः अनिरूपिका । महान-सीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां शुद्धयावत्प्रतियोगितावच्छेदकतापर्याप्त-प्रतियोगिताभेदः नैव वर्तते, तादृशप्रतियोगितायाः यावत्प्रतियोगितावच्छेदकतापर्याप्तत्वात्, तथा च विलक्षणप्रतियोगितासंसर्गेण यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदव-त्प्रतियोगिताविधया तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता नैव धर्तुं शक्यते, तादृशप्रतियोगितानिरूपकानुयोगिता विलक्षणप्रतियोगितासंसर्गेण यावत्प्रतियोगितावच्छे-

दकतापर्याप्तप्रतियोगितावि‌शिष्टभेदवत्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावि‌धया धर्तुं शक्यते। तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवि‌धया महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्तेः, वह्नित्वगतैकत्वस्याऽप्राप्तेः वि‌लक्षणप्रतियोगितासंसर्गेण यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितावि‌शिष्टभेदवत्प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवि‌धया महानसीयत्व-वह्नित्वगतद्वित्वमेव प्राप्यते, वह्नित्वगतैकत्वं नैवेति महानसीयवह्न्यभावः धर्तुं नैव शक्यते ।

या वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगिता तस्यां वि‌लक्षणप्रतियोगितासंसर्गेण यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितावि‌शिष्टभेदः नैव वर्तते, यतः वि‌लक्षणप्रतियोगितासंसर्गेण यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितावि‌शिष्टभेदवि‌धया पूर्वोक्तरीत्या शुद्धयावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभेदः एव धर्तुं शक्यते, तादृशशुद्धयावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताभेदः वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायां नैव वर्तते, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तत्वात् । अतः तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकानुयोगिता वि‌लक्षणप्रतियोगितासंसर्गेण यावत्प्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितावि‌शिष्टभेदवत्प्रतियोगिताऽनिरूपिका एव स्यात्, तादृशानुयोगितायाः वह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाः एव निरूपकत्वात्, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितायाश्च वि‌लक्षणप्रतियोगितासंसर्गेण यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितावि‌शिष्टभेदवत्प्रतियोगितावि‌धया अग्राह्यत्वात् । तथा च तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतावृत्तिप्रतियोगितानिरूपकानुयोगिता वि‌लक्षणप्रतियोगितासंसर्गेण यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितावि‌शिष्टभेदवत्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावि‌धया धर्तुं शक्यते, तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव विद्यते इति वि‌लक्षणप्रतियोगितासंसर्गेण यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगितावि‌शिष्टभेदवत्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वमेव भवेदिति वह्न्यभावः धर्तुं शक्यते एव, तादृशवह्न्यभावाधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयः स्यादेव ।

य शो ल ता

एवम् 'अत्र महानसीयवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन महानसीयवह्निमत्, तज्ज्ञानत्वाद् - इत्यत्र वह्न्यभावमादाय लक्षणाऽसमन्वयः नैव सम्भवेत्, यतः प्रकृतेऽपि विलक्षणप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदे वर्तते तादृशप्रतियोगिता एव गृह्यते, न हि यादृशप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदे वर्तते तादृशप्रतियोगितासंसर्गेणैव यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदे वर्तते, यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेद-शुद्धयावत्साध्यता-वच्छेदकतापर्याप्तप्रतियोगिताभेदयोः परस्परं विलक्षणत्वेन यादृशप्रतियोगितानिरूपकत्वस्य शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदे वर्तते, तादृशप्रतियोगितानिरूपकत्वस्य यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिता-गगनोभयभेदे अवर्तमानत्वात् । तथा च विलक्षण-प्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगितावि‌शिष्टभेदविधया शुद्धयावत्साध्यता-वच्छेदकतापर्याप्तप्रतियोगिताभेदः एव धर्तुं शक्यते । वह्नित्ववृत्तितावि‌शिष्टसाध्यतावच्छेदकता-निष्ठप्रतियोगितायां शुद्धयावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताभेदः वर्तते एव, वह्नित्ववृत्तिता-वि‌शिष्टसाध्यतावच्छेदकतानिष्ठप्रतियोगितायाः महानसीयत्वनिष्ठसाध्यतावच्छेदकतायामवर्त-मानत्वेन यावत्साध्यतावच्छेदकतापर्याप्तत्वाभावात् । तथा च तादृशवह्नित्ववृत्तितावि‌शिष्टसाध्यता-वच्छेदकतानिष्ठप्रतियोगितानिरूपकानुयोगिता विलक्षणप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकता-पर्याप्तप्रतियोगितावि‌शिष्टभेदवत्प्रतियोगितानिरूपिका एव भवेत्, वह्नित्ववृत्तितावि‌शिष्टसाध्यता-वच्छेदकतानिष्ठप्रतियोगिताया एव विलक्षणप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगितावि‌शिष्टभेदवत्त्वात्, तथा च विलक्षणप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगितावि‌शिष्टभेदवत्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावि‌धया वह्नित्ववृत्तितावि‌शिष्ट-साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकानुयोगिता धर्तुं न शक्यते ।

या साध्यतावच्छेदकतानिष्ठप्रतियोगिता तस्यां तादृशविलक्षणप्रतियोगितासंसर्गेण याव-त्साध्यतावच्छेदकतापर्याप्तप्रतियोगितावि‌शिष्टभेदविधया ग्राह्यशुद्धयावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगिताभेदः नैव वर्तते, तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितायाः महानसीयत्वनिष्ठ-साध्यतावच्छेदकतायां वह्नित्वनिष्ठसाध्यतावच्छेदकतायाञ्चोभयत्र वर्तमानत्वात्, तदितरेषु अवर्तमानत्वाच्च यावत्साध्यतावच्छेदकतापर्याप्तत्वात् । तथा च तादृशसाध्यतावच्छेदकतानिष्ठ-

प्रतियोगितानिरूपकानुयोगितायां विलक्षणप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्त-प्रतियोगिताविशिष्टभेदवत्प्रतियोगितानिरूपकत्वं नैव स्यादिति विलक्षणप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदवत्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगिताविधया तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता धर्तुं शक्यते, तादृशसाध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया महानसीयत्व-वह्नित्वगत-द्वित्वस्यैव प्राप्तेः, वह्नित्वगतैकत्वस्याऽप्राप्तेः तादृशविलक्षणप्रतियोगितासंसर्गेण यावत्साध्यतावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदवत्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वं नैव स्यात्, महानसीयत्व-वह्नित्वगतद्वित्वमेव स्यात् ।

विलक्षणप्रतियोगितासंसर्गेण यावद्वह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिता-विशिष्टभेदवत्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया वह्नित्वगतैकत्वमेव लभ्यते, विलक्षणप्रतियोगितासंसर्गेण यावद्महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतापर्याप्तप्रतियोगिताविशिष्टभेदवत्प्रतियोगिताऽनिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं महानसीयत्व-वह्नित्वगतद्वित्वं प्राप्यते इति वह्न्यभावः धर्तुं न शक्यते, महानसीयवह्न्यभावः एव धर्तव्यः । महानसीयवह्न्यभावाधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयः स्यादेव, एवं सर्वत्र लक्षणसमन्वयः समजनि, अनवस्थादिकञ्च परिहृतमिति ।

●●●

पूज्य आचार्य भगवंत **श्री यशोविजयसूरीश्वरजी महाराजा**
द्वारा रचित-संपादित-अनुवादित साहित्य सूचि

नं.	पुस्तक का नाम	भाषा/विषय	किंमत ₹
१.	न्यायालोक	संस्कृत+गुजराती	१७०/-
२.	भाषारहस्य	संस्कृत+गुजराती	१६०/-
३.	स्याद्वाद रहस्य (भाग १ से ३)	संस्कृत+हिन्दी	४३५/-
४.	वादमाला	संस्कृत+हिन्दी	१२०/-
५.	षोडशक (भाग १-२)	संस्कृत+हिन्दी	२००/-
६.	अध्यात्मोपनिषत् (भाग १-२)	संस्कृत+गुजराती	१९०/-
७.	द्वात्रिंशद् द्वात्रिंशिका (भाग १ से ८)	संस्कृत+गुजराती	२०००/-
८.	FRAGRANCE OF SENTIMENTS	ENGLISH	25 /-
९.	GLIMPSES OF SENTIMENTS	ENGLISH	30 /-
१०.	ABUNDANT JOY OF SENTIMENTS	ENGLISH	25 /-
११.	WHAT IS SUPERIOR ? INTELLECT OR FAITH ?	ENGLISH	10 /-
१२.	LUST GETS DEFEATED, DEVOTION WINS...	ENGLISH	10 /-
१३.	WHAT IS SUPERIOR ? SADHANA OR UPASANA ?	ENGLISH	10 /-
१४.	द्विवर्ण रत्नमालिका	संस्कृत+गुजराती	अमूल्य
१५.	वासना हारे, उपासना जीते	गुजराती	अमूल्य
१६.	बुद्धि हारे, श्रद्धा जीते	गुजराती	अमूल्य
१७.	साधना चढे के उपासना?	गुजराती	अमूल्य
१८.	संवेदननी सुवास	परमात्मभक्ति/गुजराती	अमूल्य
१९.	संवेदननी झलक	परमात्मभक्ति/गुजराती	अमूल्य
२०.	संवेदननी मस्ती	परमात्मभक्ति/गुजराती	अमूल्य
२१.	संवेदननी सरगम	परमात्मभक्ति/गुजराती	अमूल्य
२२.	संयमीना कानमां	साधु-साध्वीजी भगवंतो के लिए	अमूल्य
२३.	संयमीना दिलमां	साधु-साध्वीजी भगवंतो के लिए	अमूल्य
२४.	संयमीना रोमरोममां	साधु-साध्वीजी भगवंतो के लिए	अमूल्य
२५.	संयमीना सपनामां	साधु-साध्वीजी भगवंतो के लिए	अमूल्य
२६.	संयमीना व्यवहारमां	साधु-साध्वीजी भगवंतो के लिए	अमूल्य

२७.	विद्युतप्रकाशनी सजीवता अंगे विचारणा	गुजराती	१०/–
२८.	विद्युतप्रकाश : सजीव या निर्जीव?	हिन्दी	१०/–
२९.	यशोविजय छत्रीशी	अभिनव प्रभुस्तुति	अमूल्य
३०.	प्रभु वीर की अंतिम देशना	उत्तराध्ययनसूत्र सूक्ति चयन	निःशुल्क
३१.	संवेदन की सुवास	प्रभु भक्ति	
३२.	संवेदन की मस्ती	प्रभु भक्ति	
३३.	संवेदन की झलक	प्रभु भक्ति	
३४.	संवेदन की सरगम	प्रभु भक्ति एवं अध्यात्मसाधना	१००/–
३५.	श्रावक दिनचर्या	गुजराती	अमूल्य
३६.	द्रव्य–गुण–पर्यायनो रास + द्रव्यानुयोगपरामर्श (भाग १ से ७)	संस्कृत + गुजराती	५०००/–
३७.	द्रव्य–गुण–पर्यायनो रास + अध्यात्मअनुयोग (भाग १–२)	संस्कृत + गुजराती	१०००/–
३८.	द्रव्य–गुण–पर्याय का रास + द्रव्यानुयोगपरामर्श (भाग १ से ७)	संस्कृत + हिन्दी	५०००/–
३९.	द्रव्य–गुण–पर्यायनो रास + अध्यात्मअनुयोग (भाग १–२)	संस्कृत + हिन्दी	१०००/–
४०.	पोलिसी	गुजराती	७०/–
४१.	पोलिसी	हिन्दी	१००/–
४२.	POLICY	ENGLISH	100 /-
४३.	जवांमर्दी (भाग १–२)	गुजराती	२००/–
४४.	BATTLE OF THOUGHTS	ENGLISH	125 /-
४५.	अध्यात्मोपनिषत् (भाग १–२)	संस्कृत + हिन्दी	५००/–
४६.	पोलिसी डाइजेस्ट	गुजराती	१०/–
४७.	संमूर्च्छिम मनुष्य : आगमिक अने पारंपरिक सत्य	गुजराती	५०/–
४८.	संमूर्च्छिम मनुष्य : आगमिक और पारंपरिक सत्य	हिन्दी	५०/–

नोंध : अध्ययनशील पू. साधू–साध्वीजी भगवंतो और ज्ञानभंडार को भेट रूप में मिलेगी।

प्राप्ति स्थान : दिव्य दर्शन ट्रस्ट,

३९, कलिकुंड सोसायटी, धोलका, जि. अहमदाबाद – ३८७८१०.

॥ વિભાગવાર પૃષ્ઠ સૂચિ ॥

(ચૌદ વિભાગોમાં કયા વિભાગમાં કેટલા પૃષ્ઠો અને કેટલી દીધિતિઓ સમાવેશ પામી છે તેની સૂચિ અહીં પ્રસ્તુત કરાઇ છે.)

વિભાગ	દીધિતિ	પૃષ્ઠ
વિભાગ - ૧	૧ + ૨	૩૧૨
વિભાગ - ૨	૩	૬૪૪
વિભાગ - ૩	૪	૧૦૮૮
વિભાગ - ૪	૫	૧૩૯૬
વિભાગ - ૫	૫	૧૭૬૬
વિભાગ - ૬	૫	૨૦૯૪
વિભાગ - ૭	૫	૨૪૩૬
વિભાગ - ૮	૫	૨૭૮૨
વિભાગ - ૯	૫ + ૬	૩૧૦૨
વિભાગ - ૧૦	૬	૩૪૧૦
વિભાગ - ૧૧	૭	૩૭૪૬
વિભાગ - ૧૨	૭	૪૦૨૦
વિભાગ - ૧૩	૭ + ૮	૪૨૮૮
વિભાગ - ૧૪	૯ તથા પરિશિષ્ટ	૪૪૨૪ + પરિશિષ્ટ

ઊડાનની પરિસીમા
'GSLV' છે,
ઊંચાઈની પરિસીમા
'એવરેસ્ટ' છે,
ઊંડાઈની પરિસીમા
'પેસેફિક' છે,
તેમ વ્યાપ્તિના વિશ્વમાં
તર્કની ઊડાનની....
તર્કની ઊંચાઈની....
તર્કની ઊંડાઈની.....
પરિસીમા છે :

"गूढार्थतत्त्वालोक"

- प्रकाशक -
श्री दिव्यदर्शन ट्रस्ट

9 789382 019749

MULTY GRAPHICS
(022) 23873222•23884222